# THE JOURNAL

OF THE

# BIHAR AND ORISSA RESEARCH SOCIETY



VOL. XXIV

1938

PATNA

PUBLISHED BY THE BIHAR AND ORISSA RESEARCH SOCIETY

*Price Rs. 20*

APPENDIX TO J. B. O. R. S., VOL. XXIV

# PRAMĀṆAVĀRTTIKAM

*By*

Ācārya Dharmakīrti

*Edited by Rāhula Sāṅkṛtyāyana*

# PREFACE

Dharmakīrti has a unique position not only among the foremost Buddhist logicians and philosophers, but among all Indian Thinkers. If Diṅnāga is the harbinger of a new era in Indian logic and is rightly considered as 'the father of Indian mediæval logic,' Dharmakīrti's contribution is so vast and so profound that after his time the whole Indian philosophical literature, specially logic, bears the stamp of his master mind. How Jaina logic originated imbibing most of Dharmakīrti's original thoughts, and how the Navya-Nyāya discarded many of the points condemned by Dharmakīrti, points which the old Naiyāyikas so keenly contested, is not my theme here. Suffice it to quote Jayanta Bhaṭṭa, the author of Nyāyamañjarī, a valiant opponent of Dharmakīrti—

"इति सुनिपुणबुद्धिर्लक्षणं वक्तुकामः
पदयुगलमपीदं निर्ममे नानवद्यम् ।
भवतु मतिमहिम्नश्चेष्टितं दृष्टमेत—
ज्जगदभिभवधीरं धीमतो धर्म्मकीर्तेः ॥"

—Nyāyamañjarī (P. 100)

Śrīharṣa, the greatest Vedantist, writes in his Khaṇḍana-khaṇḍa-khādya

"दुरावाध इव चायं धर्म्मकीर्तेः पन्था इत्यवहितेन भाव्यमिहेति ।" (Chapter I).

Vācaspati Miśra has criticised Dharmakīrti in his Tātparyaṭīkā and Bhāmatī. The Sammati-tarka has many quotations from Dharmakīrti. The same is the

case with Sālikanātha Miśra and Pārthasārathi Miśra, the authors of the commentaries on Vṛhatī and Śloka-vārttika respectively. Sometimes he is quoted as Kīrti, and sometimes his full name is mentioned. Though in the Tanjur we have the translations of some works on Tantra and poetry[1] attributed to Dharmakīrti, their authorship is doubtful. Dharmakīrti's nine works—seven original works and two commentaries on his own works—are translated into Tibetan.[2] They are all works on logic. Among them Pramāṇavārttika is his masterpiece. It is written as an independent commentary on Diṅnāga's *Pramāṇa-samuccaya*, but the treatment of the subject and method of explanation are such that it is accepted as an original work on logic. In fact, the Pramāṇa-samuccaya was, as observed above, superseded by this work.

The popularity of the Pramāṇa-vārttika in Nālandā and other centres of Buddhist learning in India is evidenced by the number of commentaries and sub-commentaries on it,[3] eight of which are preserved in Tibetan translations. The commentaries by Manorathanandin and Karṇakagomin, which I discovered in Tibet, were never translated into Tibetan. There might have been some more commentaries on this important work which are now lost.

The Pramāṇa-samuccaya contains two hundred

[1] Jātakamālāṭīkā [Tanjur, Mdo, XCI; 2] Buddhaparinirvāṇa Stotra [Tanjur, Sto, I : 47] : and small treatises on Tantrikism [Tanjur XII : 23, XVII : 6, LI : 6, LXIII : 10].

[2] See my appendix G to the Vādanyāya (1935-36). JBORS.

[3] Out of about hundred and seventy thousand Ślokas on logic translated into Tibetan about hundred and thirty-seven thousand are on Dharmakīrti's works and one hundred and five thousand are on Pv. alone.



and forty-seven verses which are divided into the following chapters :—

| Chapter | Subject | Ślokas |
|---|---|---|
| I | प्रत्यक्ष-परीक्षा | 48 |
| II | स्वार्थानुमान | 51 |
| III | परार्थानुमान | 50 |
| IV | दृष्टान्त-परीक्षा | 21 |
| V | अपोहपरीक्षा | 52 |
| VI | जाति-परीक्षा | 25 |
| | | 247 |

The Pramāṇa-vārttika deals with the first three chapters of the Pramāṇa-Samuccaya. Out of its four chapters the three are devoted to *Pratyakṣa, Svārthānumāna* and *Parārthānumāna* and one chapter is to support and explain the first salutation verse of the Pramāṇa-Samuccaya.[4]

The order of Chapters in the Pv. is not the same in all the works dealing with it. Our manuscript of the text and the commentaries translated into Tibetan give the following order :—

| Chapter | Subject | Ślokas |
|---|---|---|
| I | स्वार्थानुमान | 342 |
| II | प्रमाणसिद्धि | 285½ |
| III | प्रत्यक्ष | 541 |
| IV | परार्थानुमान | 286 |
| | | 1454½ |

[4] प्रमाणभूताय जगद्धितैषिणे प्रणम्य शास्त्रे सुगताय तायिने ।
प्रमाणसिद्धयै स्वमतात्समुच्चयः करिष्यते विप्रसितादिहैकक: ।।

This arrangement of chapters is not correct as it will be seen if we compare it with the arrangement of chapters in the Pramāṇa-Samuccaya or if we take into account the logical order which should be:—I Pramāṇa-Siddhi, II Pratyakṣa, III Svārthānumāna, and IV Parārthānumāna. In the commentary of Manorathanandin we find the above order followed. Hereby the Pramāṇa-siddhis meant the Pramāṇa-siddhi ('The establishment of proof') of the Buddha, referring to the first verse of the PS. The reason for the change of order of chapters is this. Dharmakīrti wrote his own commentary on the Svārthānumāna chapter of Pv. and most of the earliest commentators like Devendrabuddhi (Devendramati) and Prajñākaragupta did not comment on the chapter which has Dharmakīrti's own commentary. It seems that for this reason the Svārthānumāna chapter was separated from the other three and was made Chapter I. There are many commentaries on the Pv. in Tibetan written by Tibetan scholars; they also follow this irregular arrangement found in the Pv. MS.

Vārttika means a commentary which has the freedom to criticise the author wherever necessary to do so. We know the Vārttika of Kātyāyana on Pāṇini's grammar which is not a commentary but a critical appendix. The new style of Vārttikas begins with the Nyāya-vārttika of Udyotakara (550 A.C.). Kumārila (600 A.C.) brought it to a very high standard in his Śloka-vārttika. In naming his treatise as *Pramāṇa-vārttika*, Dharmakīrti was influenced by Nyāyavārttika and Ślokavārttika which were the main target of his criticism.



In his second verse the author explains the aim of his work—"The ordinary people of feeble intellect generally not only show indifference to the good work (of Diṅnāga) but become malicious on account of their envy and jealousy. Therefore, it was not of great use. Thinking so, and with my aptitude developed with the long and continuous study of the good work (of Diṅnāga) I undertook my present work".

This work of Dharmakirti is most difficult in its construction of sentences. It seems that the author wants to put so many ideas of his deep thinking in as compact a manner as possible. This is the reason why the Pv. is so difficult to follow. In fact, many portions of it would have remained sealed if we had not been able to get Manorathanandin's commentary. It seems that the works of Dharmakīrti did not find general approval in his own lifetime. A verse of his is quoted by Śrīdharadāsa in which Dharmakīrti throws contempt on general opinion regarding his composition:

> "Nobody blames Vālmīki for saying that a dyke across the sea was made of rocks brought by monkeys; nor Vyāsa for exaggeration in attributing it to the arrows of Pārtha. But people open their mouth to criticise my composition wherein I have weighed every word and sense. Recognition! I do bow to thee!"[5]

[5] Sadūktikarṇāmṛta (p. 327). (Punjab Sanskrit Book Depot, Lahore).

शैलैर्बन्धयति स्म वानरहृतैर्वाल्मीकिरम्भोनिधिं,
व्यासः पार्थशरैस्तथापि न तयोरत्युक्तिरुद्भाव्यते।

Indeed every word and its meaning in the Pv. is as it were weighed on scales.

We are not in a position to state the chronological order of Dharmakīrti's seven treatises, and we are not aware of the length of life which he lived, but the Pv. cannot be his first work, since it is the product of a mature intellect. Dharmakīrti was conscious of his intellectual performance, and he knew the fate of Diṅnāga's great work whose merits were not properly recognized, and so he was rather pessimistic about the reception of his own work which is reflected by the last verse of the Pv.[6]

"My view whose depth has not been reached by the power of mighty brains, whose real purport has not been perceived even with great efforts, and which has not found in this world an appreciator (taker) befitting it, will, like the water of the ocean, attain old age within its own confines."

But his fears were not justified, as we see his works admired equally both by his friends and foes.

वागर्थौ च तुलाधृताविव तथाप्यस्मत्प्रबन्धानयं
लोको दूषयितुं प्रसारितमुखस्तुभ्यं प्रतिष्ठे नमः ॥

[6] अनध्यवसितावगाहनमनल्पधीशक्तिना—
प्यदृष्टपरमार्थसारमधिकाभियोगैरपि ।
मतं मम जगत्यलब्धसदृशप्रतिग्राहकं
प्रयास्यति पयोनिधेः पय इव स्वदेहे जराम् ॥



## *MSS and Text*

Owing to the importance of the Pramāṇa-vārttika by Dharmakīrti in the history of Indian thought for the post-Diṅnāga-period, I started restoring it from the Tibetan version into Sanskrit in 1930. I stopped the restoration on hearing of the existence of a MS. of the PV. in the MSS. library of the Rājaguru Pandit Hemarāja Śarman, Nepal. I obtained its photographs, and in my second journey to Tibet I made a special search for the PV., and was able to find an incomplete MS. of the *Bhāṣya* (on the Pv.) by Prajñākaragupta which contained Dharmakīrti's original Kārikās of a portion of the third and the whole of the fourth chapter. Taking together the photographs of the MS. of the Rājaguru which he kindly gave me and the fragment book of Prajñākaragupta, about three hundred Kārikās of the Pv. were still found missing. I restored the three hundred missing verses from the Tibetan translation. At that moment I had no hope of recovering the original three chapters of the Pv. In my third journey to Tibet (1936), however, I had the good fortune of realizing my great desire discovering the whole text of the Pv., in addition I found a complete literature on it, which is briefly described in the March issue of the Journal of Bihar and Orissa Research Society, 1937. From the monastery of Ṣhalu, I recovered material to fill up the missing three chapters. At the monastery of Sā-skya, I discovered a complete commentary. I also recovered a fragmentary commentary by Dharmakīrti himself on the first chapter of Pv. Although this latter was not a complete copy, the deficiency was more than compensated by the discovery of a ṭikā—a sub-commentary

on it, and a commentary on the whole Pv. by Manorathanandin, which has the value of making the Pv. easy of comprehension.

*The description of the MSS. utilized for the Text*

1. PH.—A palm-leaf MS. of the Pv. belonging to the Rājaguru Pt. Hemarāja Śarman of Nepal. The script is Māgadhī, i.e., the Script prevalent in Eastern India during the twelfth and thirteenth centuries. In the colophon, we find:

"लिखितमिदं पुस्तकं पक्कडिद्वीपमण्डलपालेने[ति]।"

This shows that it was written by a Maṇḍalapāla (the head of a district-Saṅgha) of Pakkaḍidvīpa. Though the MS. was discovered in Nepal, the word 'Pakkaḍi' shows that it was written in the plains where we have got plenty of पकड़ी's, *Pakaḍī* is a common name for many villages in eastern U. P. and Bihar. The MS. has not many mistakes, but there are many lacunae; and as many as ten leaves are missing.

2. PS.—A palm-leaf MS. of PV., belonging to the monastery of Ṣhalu. The size is $12\frac{1}{2}'' \times 1\frac{3}{4}''$. There are 31 leaves; each page containing seven lines. The character is Kuṭilā of the 12th century. It has no colophon. The MS. is mostly correct. The first chapter was not included in this MS.

3. P.V.—A palm-leaf MS. of the Pramāṇa-vārttika-virtti by Dharmakīrti, belonging to Sa-skya monastery. The Size is $22\frac{1}{4}'' \times 2\frac{1}{8}''$. The number of leaves is eleven, each page containing seven to eight lines. The script is Māgadhī. It is only a fragment of the whole work. Probably it was carried to Tibet by Śākyaśrībhadra



and his companions who reached Tibet in 1203 A.C. I made a search for the missing leaves of this MS., but I could not succeed. I still hope that some of the leaves may be found in Chhag-pe-lha-khang if a thorough search is made.

4. PVT.—A palm-leaf MS. of a commentary on No.3 by Karṇakagomin. The size is $32\frac{1}{2}'' \times 2''$, and it contains 250 leaves, each page having six lines. Only the twelfth and the thirty-seventh leaves are missing. The script is Māgadhī. There is no colophon, but it may belong to Śākyaśrībhadra or his party. Only in a few places it was helpful in reconstructing the Kārikās. It will also greatly help in restoring Dharmakīrtī's commentary which has also a Tibetan translation in Tanjur.

5. VA.—A paper MS. of the P.V.-Bhāshya or *Vārttikālaṅkāra* by Prajñākaragupa belonging to Sa-skya monastery. Size $27'' \times 4''$. Leaves 59, each page containing 10 to 19 lines. It is an incomplete MS. written by Vibhūtichandra who accompanied Śākyaśrībhadra into Tibet. The colophon says "लिखितमुत्तरस्याम्" (written in the north). This shows that Vibhūtichandra copied it after his arrival in Tibet. The MS. has not many mistakes.

6. VB.—A palm-leaf MS. of the P.V. Bhāshya belonging to the monastery of Sa-skya (chhag-pe-lha-khaṇg). Size $22'' \times 2\frac{1}{8}''$. Leaves 340, each page containing six to eight lines. The script is Māgadhī. This MS. originally belonged to Dānaśrī, a companion of Śākyaśrībhadra. The MS. is complete and contains the Kārikās of three chapters.

7. PVM.—A paper MS. of a commentary on PV. by Manorathanandin belonging to the monastery of Ṣhalu. Size× 26½″×2″. Leaves 105, each page containing six to seven lines. It is a complete MS. written by Vibhūtichandra (Māgadhī Script). Though Kārikās are not given, the author comments on each and every word of PV., so it was a great help in getting the correct reading in so many doubtful cases.

8. BB.—A block print of Tibetan translation of the PV. from the monastery of Sa-skya. I used it in comparing the readings of the MSS. mentioned above, and the variations are given in the foot-notes. The PV. was translated into Tibetan by Pt. Subhūtiśrīśānti with the help of Lotsava (Tibetan translator) Dge-bai-blo-gros at the command of King Dvang-sde (1080 A.C.) of Western Tibet. This translation was revised by Bhāvyarāja of Kashmere with the help of Lotsava Blo-ldan-shes-rab (1059-1108 A. C.). The third revision was made by Śākyaśrībhadra (1127-1225 A. C.) and others with the help of Sa-paṇ Kun-dgaḥ-rgyal-tṣhan (1182-1225 A. C.) during the former's sojourn in Tibet (1203-1213 A.C.). The translation is perfect as is expected from the methods of translation developed in Tibet.

I have included some of the readings from quotations in Brahmanical and Jaina works on logic, but the Pv. is so widely quoted in the post-Dharmakīrti literature that my comparison with quotations is anything but complete.

In all the MSS., no distinction is made between व and ब, and often श and स are interchanged. Throughout the MSS. anusvāras at the end of a sentence are employed instead of म्. This seems to be a common practice during that time. I have retained this feature in the text.



The divisions of sections and sub-sections are my own in making which I am helped by the commentaries.

Patna
28-7-37

Rāhula Sāṅkṛtyāyana

# विषय-सूची

## प्रथम-परिच्छेदः


| स्वार्थानुमानम् | कारिकाङ्कः |
|---|---|
| नमस्कारश्लोकः | १।१ |
| शास्त्रारम्भप्रयोजनम् | १।२ |
| **१. हेतुचिन्ता** | **१।३** |
| (१) हेतुलक्षणम् | १।३ |
| (२) हेतुस्त्रिधा | १।३ |
| (३) हेत्वाभासाः | १।३ |
| **२. अनुपलब्धिचिन्ता** | **१।५** |
| (१) व्याप्तिचिन्ता | १।१७ |
| (२) सामान्यचिन्ता | १।४० |
| क. न्यायमीमांसामतनिरासः | १।५७ |
| ख. सांख्यमतनिरासः | १।१६४ |
| ग. जैनमतनिरासः | १।१८२ |
| **३. शब्दचिन्ता** | **१।१८६** |
| (१) निर्हेतुकविनाशः | १।१९४ |
| (२) अनुपलब्धिचिन्ता | १।१९९ |
| **४. आगमचिन्ता** | **१।२१४** |
| (१) पौरुषेत्वे | १।२२१ |
| **५. अपौरुषेयत्वे** | **१।२२५** |
| (१) वेदप्रामाण्यनिरासः | १।२२६ |
| क. अपौरुषेयत्वेऽप्यप्रामाण्यम् | १।२२९ |
| ख. सम्बन्धचिन्ता | १।२३३ |
| ग. नापौरुषेयता | १।२४१ |

| | |
|---|---|
| घ. न नित्यता | १।२४२ |
| (क) गुर्वध्ययनपूर्वकत्वादपि न नित्यता | १।२४२ |
| (ख) अनादित्वेऽर्थसंस्कारभेदेन संशयः | १।२४९ |
| (ग) स्फोटनिरासः | १।२५३ |
| (घ) वर्णानुपूर्विचिन्ता | १।२६१ |
| (ङ) निर्हेतुको विनाशः | १।२७१ |
| (२a.) नव्यमीमांसक (भाट्ट) मतनिरासः | १।२८६ |
| क. अपौरुषेयत्वेपि दोषाः | १।२८६ |
| ख. कृतकत्वेऽपि न दोषः | १।२८९ |
| ग. नित्यत्वे दोषाः | १।२९६ |
| घ. समयकारणामुकूल्या फलविशेषः | १।३०२ |
| ङ. वर्णानुपूर्विचिन्ता | १।३०३ |
| च. आप्तचिन्ता | १।३११ |
| (२b.) वृद्धमीमांसक (जैमिनि) मतनिरासः | १।३३२ |
| क. वेदैकदेशसंवादित्वान्न सर्वस्य प्रामाण्यम् | १।३३२ |
| ख. वेदप्रामाण्यघोषणा जैमिनेर्धार्ष्ट्यम् | १।३३४ |


## द्वितीय-परिच्छेदः

प्रमाणसिद्धिः


| | |
|---|---|
| **१. प्रमाणलक्षणम्** | २।१ |
| (१) अविसंवादि ज्ञानम् | २।१ |
| (२) अज्ञातार्थप्रकाशकम् | २।५ |
| (३) भगवतः प्रामाण्यम् | २।७ |
| (४) ईश्वरादेरप्रामाण्यम् | २।८ |
| क. नित्यानित्ययोरप्रमाणता | २।८ |
| ख. ईश्वरदूषणम् | २।१० |
| **२. भगवान् प्रमाणम्** | २।२९ |
| (१) ज्ञानवत्त्वात् | २।२९ |
| (२) हेयोपादेयवेदकत्वात् न तु सर्ववेदकत्वात् | २।३२ |
| (३) कारुणिकत्वात् | २।३४ |
| क. जन्मान्तरसिद्धिः | २।३४ |





| | |
|---|---|
| (क) भूतचैतन्यमतनिरासः | २।३५ |
| (ख) विज्ञानासिद्धिः | २।३९ |
| (ग) पुनर्जन्मपरिग्रहः (अवयविनिरासः) | २।८४ |
| (घ) विज्ञानं कारणम् | २।१०३ |
| (ङ) कर्मसिद्धिः | २।११४ |
| ख. युक्तः करुणाभ्यासः | २।१२२ |
| (४) शास्तृत्वाद् भगवान् प्रमाणम् (शास्तृत्वव्याख्यानम्) | २।१३२ |
| (५) सुगतत्वाद् भगवान् प्रमाणम् | २।१३९ |
| (६) तायित्वाद् भगवान् प्रमाणम् | २।१४५ |
| क. तायः चतुः सत्यप्रकाशनम् | २।१४६ |
| ख. चत्वारि आर्यसत्यानि | २।१४७ |
| (क) दुःखसत्त्यम् | २।१४७ |
| a. दुखं संसारिणः स्कन्धाः | २।१४७ |
| b. रागादीनां वातादिदोषजत्वनिरासः | २।१४८ |
| c. रागादीनां भुतधर्मत्वनिरासः | २।१५८ |
| d. चतुराकारं दुःखसत्यम् | २।१७६ |
| (ख) समुदयसत्त्यम् | २।१७९ |
| a. चतुराकारः समुदयः | २।१७९ |
| b. तृष्णाकर्मणी जन्मसमुदयः | २।१८९ |
| (ग) निरोधसत्यम् | २।१९० |
| a. संसार्यभावे मुक्तिव्यवस्था | २।१९१ |
| b. मुक्तानां संसारे स्थितिः | २।१९३ |
| c. सत्कायदृष्टेर्विगमः | २।१९९ |
| d. बन्धमोक्षव्यवस्था | २।२०२ |
| (घ) मार्गसत्यम् (चतुराकारम्) | २।२०५ |
| ग. सत्कायदृष्टिः | २।२०६ |
| घ. आगममात्रेण न मुक्तिः (मार्गभावना) | २।२५७ |
| (क) दीक्षाऽकिञ्चित्करी | २।२५८ |
| a. आत्मनोऽमूर्त्तत्वे न पापगौरवलाघवम् | २।२५९ |
| b. आत्मनो नित्यत्वे न पुनर्जन्म | २।२६७ |
| c. नैरात्म्ये स्मृतिसंगतिः | २।२६९ |
| ङ. सम्यग्दृष्टिर्नैरात्म्यदृष्टिः | २।२७१ |
| (क) तृष्णाक्षयान्मोक्षः | २।२७२ |

(ख) अक्षीणकर्मणो न मोक्षः २।२७४
च. तायात् सुगतत्वसिद्धिः २।२८०
(७) संवादकत्वाद् भगवान् प्रमाणम् २।२८३


## तृतीय-परिच्छेदः

प्रत्यक्षम्


**१. प्रमाणसंख्याविप्रतिपत्तिनिरासः** **३।१**
**२. सत्यद्वयचिन्ता** **३।३**
**३. सामान्यतत्कल्पनानिरासः** **३।३-१७३**
(१) सामान्यचिन्ता ३।५
(२) परमते दोषः ३।१९
**४. अनुमानचिन्ता** **३।५५**
(१) अनुमानसिद्धिः ३।५५
(२) अनुपलब्धिचिन्ता ३।८५
**५. प्रत्यक्षचिन्ता** **३।१२३-२८७**
(१) प्रत्यक्षलक्षणविप्रतिपत्तिनिरासः ३।१२३
(२) सामान्यनिरासः ३।१४५
(३) अवयविनिरासः ३।१५०
(४) नानुमानतः सामान्यसिद्धिः ३।१५४
(५) अन्यापोहचिन्ता ३।१६३
(६) प्रत्यक्षे शब्दकल्पनानिरासः ३।१७४
**६. प्रत्यक्षभेदाः** **३।१९१**
(१) इन्द्रियप्रत्यक्षम् ३।१९१
(२) मानसप्रत्यक्षम् ३।२३९-४९
(३) स्वसंवेदनप्रत्यक्षम् ३।२४९-८०
(४) योगिज्ञानप्रत्यक्षम् ३।२८१
**७. प्रत्यक्षाभासचिन्ता** **३।२८८**
**८. प्रमाणफलचिन्ता** **३।३००-१९**
**९. विज्ञप्तिमात्रताचिन्ता** **३।३२०-५३९**





(१) अर्थसंवेदनचिन्ता ३।३२०
(२) स्मृतिचिन्ता ३।३७४
(३a.) स्वसंवेदनचिन्ता ३।४२३
(३b.) स्वसंवित्तिसिद्धिः ३।४८५
(४) प्रत्यभिज्ञाचिन्ता ३।५०३
(५) योगिनां ज्ञानम् ३।५३२
(६) हेतुसामग्र्याः सर्वसंभवः ३।५३६
(७) आत्मानुभूतं प्रत्यक्षम् ३।५३९


## चतुर्थ-परिच्छेदः

परार्थानुमानम्


**१. परार्थानुमानलक्षणम् (दिग्नागस्य)** **४।१**
(१) तत्र स्वदृष्टग्रहणफलम् ४।१
(२) तत्र अर्थग्रहणफलम् ४।१३
**२. पक्षचिन्ता** **४।१५-१८८**
(१) पक्षहेतुवचनमसाधनम् ४।१५
(२) प्रतिज्ञा न साधनावयवः ४।२३
(३) पक्षलक्षणकरणे प्रयोजनम् ४।२८
(४) आत्मार्थत्वविवादे दोषः ४।३१
(५) स्वयंशब्दग्रहणफलम् ४।४२
**३. शब्दाप्रामाण्यचिन्ता** **४।४८**
(१) शास्त्रविरोधोऽकिञ्चित्करः ४।४८
(२) अन्यथा स्वयंशब्दोऽनर्थकः ४।७२
(३) सहानिराकृतग्रहणफलम् ४।९१
(४) बाधा चतुर्विधा ४।९२
(५) आगमस्ववचनयोस्तुल्यबलता ४।९३
(६) प्रतीतिबाधा ४।१०८
(७) प्रत्यक्षबाधा ४।१३१
**४. सामान्यचिन्ता** **४।१३१**
(१) सामान्यं व्यावृत्तिलक्षणम् ४।१३३

(२) स्वधर्मिग्रहणप्रयोजनम् ४।१३६–४६
(३) धर्मिस्वरूपनिरासः ४।१४७

**५. पक्षदोषाः** **४।१४९**

(१) हेतुनिरपेक्षः पक्षदोषः ४।१४९
(२) अवयविनिरासः ४।१५२
(३) नैयायिकपक्षलक्षणे दोषः ४।१६४
(४) प्रतिज्ञालक्षणे दोषः ४।१७२
(५) सामान्यचिन्ता ४।१७६

**६. हेतुचिन्ता** **४।१८९**

(१) हेतुलक्षणम् ४।१८९
(२) हेतुभेदाः ४।१९५
(३) कार्यस्वभावहेत्वोर्निर्देशस्य फलम् ४।१९९–२०४
(४) विवादाद् भेदसामान्य इत्यस्य व्याख्यानम् ४।२०५
(५) साध्याभावस्य साधनाभावेन न व्याप्तता ४।२०८
(६) सामग्रीशक्तिभेदाद् विश्वरूपता ४।२४८

**७. अनुपलब्धिचिन्ता** **४।२६०**

**८. भावस्वभावचिन्ता** **४।२८०**


---

## BIBLIOGRAPHY


PSA. **प्रमाणसमुच्चय** (restored Ch. 1) by **दिग्नाग** (Mysore University)

NR. **न्यायरत्नाकर (श्लोकवार्त्तिकटीका)** by **पार्थसारथिमिश्र** (Chaukhamba Sanskrit Series, Benares)

VP. **बृहतीपंजिका** by **शालिकनाथ** (Madras University)

P. **प्रमेयकल्पमार्त्तण्ड** by **प्रभाचन्द्र** (Nirṇaya Sāgar Press, Bombay)

S. **सन्मतितर्क** by **सिद्धसेनदिवाकर** (Gujrat Vidyapith, Ahmedabad)

N. **न्यायमंजरी** by **जयन्तभट्ट** (Vizianagaram Sanskrit Series, Benares)

V. **न्यायवार्त्तिकतात्पर्यटीका** by **वाचस्पतिमिश्र** (Kashi Sanskrit Series, Benares)

KKK. **खण्डनखण्डखाद्य** by **श्रीहर्ष** (Chaukhamba Sanskrit Series, Benares)

B. **भामती** by **वाचस्पतिमिश्र** (Nirṇayasāgar Press, Bombay)

VN. वादन्यायटीका by धर्मकीर्ति, with a commentary by शान्तिरक्षित (The Mahabodhi Society, Sarnath, Benares)

SD. शास्त्रदीपिका by पार्थसारथिमिश्र (Pandit 1891, Benares)

SH. साहित्यदर्पण by विश्वनाथ (Nirṇayasāgar Press, Bombay)

## MSS. CONSULTED

1. PH. प्रमाणवार्तिककारिका Palm on which is based this edition (belonging to राजगुरु पंडित हेमराज शर्मा, Nepal)
2. PS. प्रमाणवार्तिककारिका Palm (Ṣhalu monastery, Tibet)
3. PV. प्रमाणवार्तिकवृत्ति by धर्मकीर्ति (Ṣa-skya Chhag-pe-lha-khang, Tibet)
4. PVT. प्रमाणवार्तिकवृत्तिटीका by कर्णकगोमी (Sa-skya Chhag-pe-lhakhang, Tibet)
5. VA. वार्तिकालङ्कार by प्रज्ञाकरगुप्त (Sa-skya Gu-rim-lha-khang, Tibet)
6. VB. वार्तिकालङ्कार (Sa-skya Chhag-pe-lha-khang, Tibet)
7. PVM. प्रमाणवार्तिकवृत्ति by मनोरथनन्दी (Ṣhalu monastery, Tibet)
8. भो० भा० Tibetan translation of P.V.

# प्रमाणवार्त्तिकम्

## प्रथमः परिच्छेदः[1]

### स्वार्थानुमानम्

क. नमस्कारश्लोकः

[विधूतकल्पनाजालगम्भीरोदारमूर्त्तये ।
नमः समन्तभद्राय समन्तस्फरणत्विषे ॥ (१)

ख. शास्त्रारम्भप्रयोजनम्

प्रायः प्राकृतसक्तिरप्रतिबलप्रज्ञो जनः केवलं,
नानर्थ्येव सुभाषितैः परिगतो विद्वेष्ट्यपीर्ष्यामलैः ।
तेनायं न परोपकार इति नः चिन्तापि चेतश्चिरं ।
सूक्ताभ्यासविवर्द्धितव्यसनमित्यत्रानुबद्धस्पृहम् ॥ (२)]

१. हेतुचिन्ता

(१) हेतुलक्षणम्; (२) हेतुस्त्रिधा; (३) हेत्वाभासाः

[2][पक्षधर्मस्तदंशेन व्याप्तो हेतुः, त्रिधैव सः ।
अविनाभावनियमात्; हेत्वाभासास्ततोऽपरे ॥ (३)
कार्यं स्वाभावैर्यावद्भिरविनाभावि कार्यवत् ।
अप्रवृत्तिः प्रमाणानां, हेतुभेदव्यपेक्षया ॥ (४)
2a विरुद्धकार्ययोः सिद्धिरथ हेतुस्व]भावयोः ।

२. अनुपलब्धिचिन्ता

दृश्यात्मनोरभावात्मानुपलब्धिश्चतुर्विधा ॥ (५)
तद्विरुद्धनिमित्तस्य [3]सोपलब्धिः प्रयुज्यते ।
निमित्तयोर्विरुद्धत्वाभावो[1]हि व्यभिचारवान् ॥ (६)

---

[1] चतुरस्रबन्धनी [ ] निवद्धः पाठ आचार्यमनोरथनन्दिकृतप्रमाणवार्त्तिक-वृत्ति (PVM.) साहाय्येन पूरितोऽस्मिन् परिच्छेदेऽन्यत्र तु VA. पाठः
[2] PVT. [3] PVM. योप० ।

(इष्टं विरुद्धका)र्येपि देशकालाद्यपेक्षणः ।
अन्यथा व्यभिचारी स्यात् (भस्मेवा)शीतसाधने ॥ (७)
हेतुना यः समग्रेण कार्येत्पादो(ऽनुमीयते)[२] ।
[१]इतरार्थानपेक्षत्वात्स स्वभावोऽनुवर्णितः ॥ (८)
सामग्रीफलशक्तीनां परिणामानुबन्धिनि ।
अनैकान्तिकता कार्य[२]प्रतिबन्धस्य स[म्भवात् ॥ (९)
एकसामग्र्यधी][8]नस्य रूपादेरसतो गतिः ।
हेतुतुल्यानुमानेन[३] धूमेन्धनविकारवत् ॥ (१०)
शक्तिप्रवृत्त्या न विना रसः सैवान्यकारणः ।
इत्य(तीताध्वनां बोधो जायते)[4]कार्यलिङ्गतः ॥ (११)
हेतुना च समग्रेण यत्कार्यमनुमीयते ।
भेदे च भेदसामर्थ्याद्देहाद्रागानुमानवत् ॥ (१२)
2b [२][विपक्षेऽदृष्टिमात्रेण कार्यं][5]सामान्यदर्शनात् ।
हेतुज्ञानप्रमाणाभं वचनाद्रागितादिवत् ॥ (१३)
न चादर्शनमात्रेण विपक्षेऽव्यभिचारिता ।
संभाव्यव्यभिचारित्वात्स्थालीतंडुलपाकवत् ॥ (१४)
[२][यस्यादर्शनमात्रेण व्यतिरेकः][1]प्रदर्श्यते ।
तद्धि[४] संशयहेतुत्वाच्छेषवत्तदुदाहृतं ॥ (१५)

(ईश्वरसेनमतनिरासः)

हेतोस्त्रिष्वपि रूपेषु निश्चयस्तेन वर्णितः ।
असिद्धविपरीतार्थव्यभिचारिविपक्षतः ॥ (१६)

(१) व्याप्तिचिन्ता

(व्यभिचारिविपक्षेण)[2] वैधर्म्यवचनञ्च यत् ।
यद्य[५]व्यक्तिफलं तच्च तदनुक्तेपि गम्यते ॥ (१७)
न च नास्तीति वचनात्तन्नास्त्येव यथा यदि ।
नास्ति सं[६]ख्याप्यते चायमु(क्तौ) नेति गतिस्तदा[3] ॥ (१८)

---

[१]PVM. अर्थान्तरा [२]PVM. कार्ये [३]PVM. हेतुधर्मानुमानेन ।
[४]PVM. तस्य । [५] PVM. यद्यदृष्टि० । [६] PVM. स ख्याप्यते ।



यद्यदृष्ट्या[१] निवृत्तिः स्याच्छेषवद् व्यभिचारि किं ।
व्यतिरेक्यपि हेतुः स्यान्न वाच्याऽसिद्धियोजना ॥ (१९)
विशेषस्य व्यवच्छेदहे[तुता स्याददर्शनात् ।
प्रमा][4]णान्तरबाधा चेन्नेदानीन्नास्ति तादृशः ॥ (२०)
तथान्यत्रापि संभाव्यं प्रमाणान्तरबाधनं ।
दृष्टा युक्तिरदृष्टेश्च[२][स्यात् स्पर्शस्याविरोधिनी ॥ (२१)
3a देशादि]भेदाद् दृश्यन्ते भिन्ना द्रव्येषु शक्तयः ।
तत्रैकदृष्टया नान्यत्र युक्तस्तद्भावनिश्चयः ॥ (२२)
आत्ममृच्चेतनादीनां यो भावस्याप्रसाधकः ।
स एव[ानुपलंभः किं हेत्वभावस्य साधकः[३] ॥][1] (२३)
तस्मात्तन्मात्रसंबन्धः स्वभावो भावमेव वा ।
निवर्तयेत्कारणं वा कार्यमव्यभिचारतः ॥ (२४)
अन्यथैकनिवृत्त्यान्यविनिवृत्तिः कथं भवेत् ।
नाश्ववानिति संदेहे किं न वा पशुसंशयः ॥[2] (२५)
सन्निधानात्तथैकस्य कथमन्यस्य सन्निधिः ।
गोमानित्येव म(र्त्ये)न भाव्यमश्ववतापि किं ॥ (२६)
तस्माद्वैधर्म्यदृष्टान्ते नेष्टोवश्यमिहाश्र[यः ।
तदभावेपि तन्नेति वचना][3]दपि तद्गतेः[४] । (२७)
तद्भावहेतुभावौ हि दृष्टान्ते तदवेदिनः ।
ख्याप्येते विदुषां वाच्यो हेतुरेव हि केवलः ॥[५] (२८)
तेनैव ज्ञातसंबन्धे द्वयोरन्यत[रोक्तितः ।
अर्थापत्त्या द्वितीये][4]पि स्मृतिः समुपजायते ॥ (२९)
हेतुस्वभावाभावतः[६] प्रतिषेधे च कस्यचित् ।
हेतुर्युक्तोपलम्भस्य तस्य चानुपलम्भनं ॥ (३०)
इतीयन्त्रिविधो[क्ताप्यनुपलब्धिरनेकधा ।
3b ते च तेषां][5]विरुद्धा[७]दिगतिभेदप्रयोगतः ॥ (३१)

---

[१]PVM. यद्यदृष्टौ । [२] PVM. दृष्टाऽयुक्ति० ।
[३] VN. टीका पृ० १४० (४५) । [४] PVM. तद्गतिः ।
[५] तद्भानेति भेदेन VN. टीका पृ० ११०(४४) । [६] PVM.०भावोत
[७] PVM. तत्तद्विरुद्धाद्यगतिगति० ।

कार्यकारणभावाद्वा स्वभावाद्वा नियामकात् ।
अविनाभावनियमोऽदर्शनान्न न दर्शनात् ॥ (३२)
[अवश्यंभावनियमोऽन्यथा परस्य कः परैः ।[1]
अर्थान्तर]निमित्ते वा धर्मे वाससि रागवत् ॥ (३३)
अर्थान्तरनिमित्तो हि धर्मः स्यादन्य एव सः ।
पश्चाद्भावान्न हेतुत्वं फलेप्येकान्तता कुतः ॥ (३४)
कार्यं [धूमो हुतभुजः कार्यधर्मानुवर्त्त[1]नात्[2] ।
स[2] भवन् तस्या]भावे तु हेतुमत्तां विलंघयेत् ॥ (३५)
नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात् ।
अपेक्षातो हि[3] भावानां कादाचित्कस्य संभवः ॥ (३६)
[अग्निस्वभावः शक्रस्य मूर्द्धा यद्य][3]ग्निरेव सः ।
अथानग्निस्वभावोसौ धूमस्तत्र कथं भवेत् ॥ (३७)
धूमहेतुस्वभावो हि वह्निस्तच्छक्तिभेदवान् ।
अधूमहेतोर्धूमस्य भावे स स्याद[हेतुकः ॥ (३८)
अन्वयव्यतिरेकाभ्यां) य[4]स्य दृष्टोनुवर्तकः ।
स्वभावस्तस्य तद्धेतुर[तोभिन्नान्न सम्भवः(३९) ] ॥ (–संग्रहश्लोकः ।)

(२) सामान्यचिन्ता

[स्वभावे]प्यविनाभावो भावमात्रानुरोधिनि ।
तदभावे स्वयम्भावस्या[भावः स्यादभेदतः (४०) ] ॥
[सर्वे भावाः स्वभावेन स्वस्वभावव्यवस्थितेः ।
स्वभावपरभावाभ्यां व्यावृत्तिभगिनो यतः ॥ (४१)
तस्माद् व्यावृत्तिरर्थानां यतश्च तन्निबन्धनाः ।
जातिभेदाः प्रकल्प्यन्ते तद्विशेषावगाहिनः ॥[4] (४२)
तस्माद् विशेषो यो येन धर्मेण संप्रतीयते ।
न स शक्यस्ततोन्येन तेन भिन्ना व्यवस्थितिः ॥ (४३)
एकस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम् ।
कोन्यो भागो न दृष्टः स्यात् यैः प्रमाणैः परीक्ष्यते ॥ (४४)[5]

[1] PVM. ० वृत्तितः । [2] PVM. तस्याभावे तु स भवन् ।
[3] PVM. अपेक्षातश्च ।
[4] NR. (पृ० ५७८)० द्यतो यतोऽर्थानां व्यावृत्तिः ०।
[5] NR. (पृ० ५९०)



नो चेद् भ्रान्तिनिमित्तेन संयोज्येत गुणान्तरम् ।
शुक्तौ वा रजताकारो रूपसाधर्म्यदर्शनात् ॥ (४५)
तस्माद् दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः ।
भ्रान्त्या[1] न निश्चय इति साधनं संप्रवर्त्तते ॥ (४६)
वस्तुग्रहेनुमानाच्च धर्मस्यैकस्य निश्चये ।
सर्वग्रहो ह्यपोहे तु नायं दोषः प्रसज्यते ॥ (४७)
तस्मादपोहविषयं लिङ्गमिति प्रकीर्तितम् ।
अन्यथा धर्मिणः सिद्धौ किमतः साधकं परम् ॥ (४८)
क्वचित् सामान्यविषयं दृष्टे ज्ञानमलिङ्गजम् ।
कथमन्यापोहविषयं तन्मात्रापोहगोचरः ॥ (४९)
निश्चयारोपमनसोर्व्वाध्यवाधकभावतः ।
समारोपविवेकेऽस्य प्रवृत्तिरिति गम्यते ॥ (५०)
यावन्तोंऽशसमारोपा निश्चयास्तन्निरासतः ।
तावन्त एव शब्दाभिन्नव्यवच्छेदगोचराः ॥ (५१)
अन्यथा वस्तु विषयीकुरुत एकेन वा धिया ।
एकत्र नान्यो विषयोस्तीति स्यात् पर्यायता ॥ (५२)
नानोपाधिविशिष्टस्य भेदिनोर्थस्य ग्राहिका ।
उपकाराङ्गशक्तिभ्योऽभिन्नात्मनिश्चयग्रहे ॥ (५३)
सर्वात्मना कृते ग्राहे को भेदः स्यादनिश्चितः ।
तयोरात्मनि सम्बन्धादेकज्ञाने द्वयग्रहः ॥ (५४)
धर्मोपकारशक्तीनां भेदे ताः तस्य किं यदि ।
नोपकारस्ततः तासां तथा स्यादनवस्थितिः ॥ (५५)
एकोपकारके ग्राह्येऽदृष्टाः तस्मिन्न सन्ति ते ।
सर्वोपकारकं ह्येकं तद्ग्रहे सकलग्रहः ॥ (५६)]

क. न्यायमीमांसामतनिरासः

5a [2]यदि भ्रा[5]न्तिनिरासार्थं गृहीतेप्यन्यदिष्यते ।
तद्व्यवच्छेदविषयः सिद्धोतोन्योपि तादृशः ॥ (५७)

[1] PVM. भ्रान्तेर्न ।
[2] PVM. यदि भ्रान्तिनिवृत्यर्थं गृहीतेप्यन्यदिष्यते । तद्व्यवच्छेदविषयं सिद्धन्तद्वत् ततोऽपरम् ।

तद्विपक्षसमारोपविषये यदि निश्चयैः ।
निश्चीयते न यद् रूपं तत्तेषां विषयः कथम् ॥ (५८)
प्रत्यक्षेण गृहीतेऽपि वि][1]शेषेंऽशविवर्जिते ।
यद्विशेषावसायोस्ति प्रत्ययः स प्रतीयते ॥ (५९)
[१]प्रत्यये चान्यव्यावृत्तिरन्यव्यावृत्ति(प्र)त्ययः ।
शब्दाश्च निश्चया[श्चैव निमित्तमनुरुन्धते ॥ (६०)]
द्वयोरेका[२]भिधानेपि विभक्तिर्व्यतिरेकिणी ।
भिन्नमर्थमिवान्वेति वाच्यते स विशेषतः ॥ (६१)
भेदान्तरप्रतिक्षेपाप्रतिक्षेपौ तयोर्द्वयोः ।
[ तयोः सङ्केतभेदस्य ज्ञातृवाञ्छा][३]नुरोधिनः ॥ (६२)
भेदोयऽमेव सर्व्वत्र द्रव्यभावाभिधायिनोः ।
शब्दयोर्न तयोर्वाच्ये विशेषस्तेन कश्चन ॥ (६३)
जिज्ञापयिषुरर्थं त[न्तद्धितेन कृतापि वा ।
अन्येन वा यदि ब्रू][४]याद्भेदो नास्ति ततोऽपरः ॥ (६४)
तेनान्यापोहविषये तद्वत्पक्षोपवर्णनं[२] ।
प्रत्याख्यातं पृथक्त्वे हि स्याद्दोषो जातितद्वतोः ॥ (६५)
येषां वस्तुवशा वाचो न विवक्षा[३][पराश्रयाः ।
5b षष्ठीवच(न)भेदादि चोद्यं][6]न्तान् प्रति युक्तिमत् ॥ (६६)
यद्यथा वाचकत्वेन वक्तृभिर्विनियम्यते ।[४]
अनपेक्षितवाह्यार्थन्तत्तथा वाचकं वचः ॥ (६७)
दाराः षण्णगरीत्यादौ भेदाभेदव्यवस्थितेः ।
खस्य स्वभावः खत्वं वेत्यत्र वा किं निबन्धनं ॥ (६८)
पररूपं स्वरूपेण यया संव्रियते धिया ।[५]
ए[1]कार्थप्रतिभासिन्या भावानाश्रित्य भेदिनः ॥ (६९)
तया संवृतनानार्थाः[६] संवृत्या भेदिनः स्वयं ।
अभेदिन इवाभान्ति भावा[७] रूपेण केनचित् ॥ (७०)

---

[१] PVM. तत्रापि चान्यव्यावृत्तिरन्यव्यावृत्त इत्यपि ।
[२] PVM. तद्दोषोपवर्ण्णनं । [३] खण्डितोंशो VN. टीकायां पृ० ३०(९)।
[४] VN. टीका पृ० ३० (१०)।
[५] कारिकार्द्धमिदं VV. भोटभाषान्तरे PVM च।
[६] PVM. ०नानात्वाः। [७] PVM. भेदा ।



तस्या अभिप्रायवशात्सामान्यं सत्प्रकीर्तितं ।
(तदसत्परमार्थेन यथा संकल्पितं तथा ॥ ७१)[१]
(व्य)[2]क्तयो नान्व[२]यन्त्यन्यदनुयायि न भासते ।
ज्ञानादव्यतिरिक्तञ्च[३] कथमर्थान्तरं व्रजेत् ॥ (७२)
तस्मान्मिथ्याविकल्पोयमर्थेष्वेकात्मताग्रहः ।
इतरेतरभेदोस्य बीजसंज्ञा यदर्थिका ॥ (७३)
एकप्रत्यवमर्शार्थ[ज्ञानाद्येकार्थसाधने ।
केचिद्भेदेपि नियताः][3]स्वभावेनेन्द्रियादिवत् ॥ (७४)
ज्वरादिशमने काश्चित् सह प्रत्येकमेव वा ।
दृष्टा यथा वौषधयो नानात्वेपि न चापराः ॥ (७५)
अविशेषान्न सामान्यमविशेषप्रसङ्गतः ।
तासां क्षेत्रादि[भेदेपि ध्रौव्याच्चानुपकारतः ॥ (७६)
तत्स्वभावविकल][4]पा धीस्तदर्थेवाप्यनर्थिका ।
विकल्पिकाऽतत्कार्यार्थभेदनिष्ठा प्रजायते ॥ (७७)
तस्यां यद्रूपमाभाति बाह्यमेकमिवान्यतः ।
व्यावृत्तमिव निस्तत्वं परीक्षानङ्गभावतः ॥ (७८)
अर्थाज्ञान[निविष्टास्त एवं व्यावृत्तरूपकाः ।
अभिन्ना इव चाभान्ति] [5]व्यावृत्ताः पुनरन्यतः । (७९)
त एव तेषां सामान्यसमानाधारगोचरैः ।
ज्ञानाभिधानै[र्व्यवहारे मिथ्यार्थः स[४]] प्रतन्यते ॥ (८०)
स च सर्वपदार्थानामन्योन्याभावसंश्रयः ।
तेनान्या[पोहविषयः तदतत्कार्यकारिणाम् ॥ (८१)
वस्तुलाभाश्रयो यत्र] [6]यथोक्तानुमितौ यथा ।
नान्यत्र भ्रान्ति[साम्येपि दीपतेजो मणौ यथा ॥ (८२)]
तत्रानेकापि[५] कार्यैका न तत्कार्यपराश्रया[६] ।[7]
[ज्ञानाभिधानैरेकत्वात् व्यवहारः प्रतार्यते ॥ (८३)
ततश्चैकोप्यनेककृत् तद्भावपरिदीपनात् ।]
6a अतत्कार्यार्थभेदेन नाना धर्मः प्रतीयते ॥ (८४)

---

[१]VV. (पृ० ५२) ६९-७९ कारिकाः, कोष्ठकपाठस्तु ततः ।
[२] PVM. ०नुयन्ति। [३] PVM. वा। [४] PVM. नास्ति।
[५] PVM. ०कोपि। [६] PVM. ०श्रयैः।

यथाप्रतीतिकथितः शब्दार्थेसावसन्नपि ।
सामानाधिकरण्यञ्च वस्तुन्यस्य न संभवः ॥ (८५)
धर्म्मधर्म्मिव्यवस्थानं भेदोभेदश्च यादृशः ।
असमीक्षिततत्वार्थो[१] यथा लोके प्रतीयते ॥ (८६)
तत्तथैव समाश्रित्य साध्यसाधनसंस्थितिः[1] ।]
परमार्थावताराय विद्वद्भिरवकल्प्यते ॥ (८७)
संसृज्यन्ते न भिद्यन्ते स्वतोर्थाः पारमार्थिकाः ।
रूपमेकमनेकञ्च तेषु बुद्धेरुपप्लवः ॥ (८८)
भेदस्ततोपि बौद्धेऽर्थे सामान्यं भेद इत्यपि ।
तस्यैव चान्यव्यावृत्या धर्मभेदः प्रकल्प्यते ॥ (८९)
[साध्यसाधनसंकल्पे वस्तु][2]दर्शनहानितः ।
भेदः [२]सामान्यसंसृष्टो ग्राह्यो नात्र स्वलक्षणं ॥ (९०)
समानभिन्नाद्याकारैर्न तद् ग्राह्यं कथञ्चन ।
भेदानां बहुभेदानां तत्रैकस्मिन्नयोगतः ॥ (९१)
तद्रूपं सर्वतो भिन्नं तथा तत्प्रतिपादिका ।
न श्रुति [: कल्पना वास्ति सामान्येनैव वृत्ति][3]तः ॥ (९२)

(—इति) संग्रहश्लोकाः ॥

शब्दाः सङ्केतितं प्राहुर्व्यवहाराय स स्मृतः ।
तदा स्वलक्षणन्नास्ति सङ्केतस्ते(न) तत्र न ॥ (९३)
अपि प्रवर्तेत पुमान्विज्ञायार्थक्रियाक्षमान् ।
तत्साधनायेत्यर्थेषु संयोज्यन्तेऽभि(धाक्रियाः) ॥ (९४)
(अत्रानर्थक्रियायोग्यो नास्ति)[4]तद्वानलं स च ।
साक्षान्न योज्यते कस्मादानंत्याच्चेदिदं समं ॥ (९५)
तत्कारिणामतत्कारिभेदसाम्ये न किं कृतः ।
तद्वद्दोषस्य साम्याच्चेदस्तु जातिरलं परा ॥ (९६)
तदन्यपरिहारेण प्रवर्तेतेति च ध्वनेः ।
ते(न तेभ्योऽव्यवच्छेदे )[5]प्रवर्त्तेत कथञ्च सः ॥ (९७)
व्यवच्छेदोस्ति चेदस्य नन्वेतावत् प्रयोजनं ।
शब्दानामिति किं तत्र सामान्येनापरेण वः ॥ (९८)

---

[१] PVM. ०तत्त्वोर्थो । [२]PVT. सामान्येनैव शब्दस्य कल्पनायाश्च वृत्तितः ।



ज्ञानाद्यर्थक्रियां तांस्तां दृष्ट्वा भेदेपि[१] कुर्वतः ।
अर्थान् तदन्यविश्लेषविषयैर्ध्वनिभिः सह ॥(९९)
संयो[ज्य प्रत्यभिज्ञा[२]ने पूर्वदृष्टान्यदर्श][6]ने ।
परस्यापि न सा बुद्धिः सामान्यादेव केवलात् ॥ (१००)
नित्यं तन्मात्रविज्ञाने व्यक्त्यज्ञानप्रसङ्गतः (।)
तदा कदाचित्संब[३]न्धस्यागृहीतस्य तद्वतः ॥ (१०१)
तद्वत्तानिश्चयो न स्याद् व्यवहारस्ततः कथं ।
एकवस्तुस(हायश्चेद् व्यक्तिर्ज्ञानस्य कारणं)[7] ॥ (१०२)
6b प्रत्येकं[४] वस्तु किं तासां नानात्वं समपोहति ।
नानात्वाच्चैकविज्ञानहेतुता तासु नेष्यते ॥ (१०३)
अनेकमपि यद्येकमपेक्ष्याभिन्नबुद्धिकृत् ।
ताभिर्विनापि प्रत्येकं क्रियमाणान्धियं प्रति ॥ (१०४)
तेनैकेनापि सामान्यात्तासां नेत्यग्रहे (धिया ।[1]
नीलादेर्नेत्रविज्ञाने पृथक् ) सामर्थ्यदर्शनात् ॥ (१०५)
शक्तिसिद्धिः समूहेपि नैवं व्यक्तेः कथञ्चन ।
तासामन्यतमापेक्षं[५] तच्चेच्छक्तं न केवलं[1] ॥ (१०६)
तदैकमुपकुर्युस्ताः कथमेकां धियञ्च न ।
कार्यश्च तासां प्राप्तोसौ जननं यदुपक्रिया ॥ (१०७)
[अभिन्नप्रतिभासा धी[६]र्भिन्नेष्वि][2]तिचेन्मतं ।
प्रतिभासो धियां[७] भिन्नः समाना इति तद्ग्रहात् ॥ (१०८)
कथन्ता भिन्नधीग्राह्याः समाश्चेदेककार्यता ।
सादृश्यं ननु धीः कार्यं तासां सा च विभिद्यते ॥ (१०९)
एकप्रत्यवमर्शस्य हेतुत्वाद्धीरभेदिनी ।
एकधा[८] हे[तुभात्वेन व्यक्तीनामप्यभिन्नता[९]][3] ( ॥११०)

---

[१] PVM. भेदेन ।
[२] PVM. प्रत्यभिज्ञानं ।
[३] PVM. ० सम्बद्धस्य ।
[४] PVM. तदेकं ।
[५] PVM. ०पेक्ष्यं ।
[६] PVM. धीर्नभिन्ने० ।
[७] PVM. धिया ।
[८] PVM. एकधीहेतु० ।
[९] VN. टीका पृ० ८४ (२५) ।

स[1] चातत्कार्यविश्लेषस्तदन्यस्यानुवर्तिनः ।
अदृष्टेः प्रतिषेधाच्च संकेतस्तद्विदर्थिकः ॥ (१११)
[2]अतत्कारिविवेकेन प्रवृत्त्यर्थतया श्रुतिः ।
अकार्यकृतितत्कारितुल्यरूपावसायिनो[3] ॥ (११२)
धियं वस्तु(पृथग्भूतामेव बीजमनर्थिकां)[4] ।
जनयन्त्यप्यतत्कारिपरिहाराङ्गभावतः ॥ (११३)
वस्तुभेदाश्रयाच्चार्थे न विसंवादिकामतः ।
ततोन्यापोहविषया तत्कर्त्राश्रितभावतः ॥ (११४)
अवृत्तव्यतिरेकेण वृत्तार्थग्रहणे द्वयं ।
अ[न्योन्याश्रयत[4] एकग्रहाभावे][5] द्वयाग्रहः ॥ (११५)
सङ्केतासंभवस्तस्मादिति केचित्प्रचक्षते ।
तेषामवृत्तास्सङ्केते व्यवच्छिन्ना न वा यदि ॥ (११६)
व्यवच्छिन्नाः कथं ज्ञाताः प्राग्वृत्तग्रहणादृते ।
अनिराकरणे ते[षां सङ्केते व्यवहारिणां ॥[6] ११७]
न स्यात्तत्परिहारेण प्रवृत्तिर्वृत्तभेदवत् ।
अविधाय निषिध्यान्यत्प्रदर्श्यैकं पुरःस्थितं ॥ (११८)
वृत्तोयमिति संकेतः क्रियते तत्प्रपद्यते ।
व्यवहारेपि तेनायमदोष इति चेत्तरुः ॥ (११९)
अयमप्ययमेवेति [प्रसङ्गो न निवर्त्तते][7] ।
7a एकप्रत्यवमर्शश्चेज्ज्ञान[5] एकत्र हि स्थितः ॥ (१२०)
प्रपत्ता तदतद्धेतूनर्थान् विभजते स्वयं ।
तद्बुद्धिवर्तिनो भावा(न्) भातो[6] हेतुतया धियः ॥ (१२१)
अहेतुरूपविकलानेकरूपानिव स्वयं ।
भेदेन प्रतिपद्येतेत्युक्तिर्भेदे नियु[ज्यते ॥ (१२२)
(तं तस्या धीर्विकल्पिका भ्रान्त्यै)[1]कं वस्त्ववेक्षते ।
क्वचिन्निवेशनायार्थे विनिवर्त्य कुतश्चन ॥ (१२३)

[1] PVM. सा। [2] नास्ति भोटभाषान्तरे।
[3] PVM. तुल्यरूपावभासिनीं—भोट-भाषान्तरे च।
[4] PVM. अन्योन्याश्रयमित्येक०। [5] PVM. एकप्रत्यमर्शाख्ये ज्ञाने
[6]भान्ति—भो० भा०।



बुद्धेः प्रयुज्यते शब्दस्तदर्थस्यावधारणात् ।
व्यर्थोन्यथा प्रयोगः स्यात्तज्ज्ञेयादिपदेष्वपि ॥ (१२४)
व्यवहारोपनीतेषु व्यवच्छेद्यो[1]स्ति कश्चन ।
निवेशनं च यो यस्माद् भिद्यते तन्निवर्तना][2]त् ॥ (१२५)
तद्भेदे भिद्यमानानां समानाकारभासिनि ।
स चायमन्यव्यावृत्त्या गम्यते तस्य वस्तुनः ॥ (१२६)
कश्चिद्भाग इति प्रोक्तो रूपं नास्यापि किञ्चन ।
तद्गतावेव शब्देभ्यो गम्यतेन्यनिवर्तनं ॥ (१२७)
न तत्र गम्य[ते कश्चित् केनचिद् भेदवान् परः][3] ।
न चापि शब्दो द्वयकृदन्योन्याभाव इत्यसौ ॥ (१२८)
अरूपे रूपवत्त्वेन दर्शनं बुद्धिविप्लवः ।
तेनैवापरमार्थोसावन्यथा न हि वस्तुनः ॥ (१२९)
व्यावृत्तिर्वस्तु भवति भेदोस्यास्मादितीरणात् ।
एकार्थश्ले[षविच्छेद एको व्याप्रियते ध्वनिः ॥[4] १३०]
लिङ्गं वा तत्र विच्छिन्नं वाच्यं वस्तु न किञ्चन ।
यस्याभिधानतो वस्तुसामर्थ्यादखिले गतिः ॥ (१३१)
[2]भवेन्नानाफलः शब्द एकाधारो भवत्यतः ।
विच्छेदं सूचयन्नेकमप्रतिक्षिप्य वर्तते ॥ (१३२)
यदान्यं तेन स[व्याप्त एकत्वेन च भासते][5] ।
सामानाधिकरण्यं स्यात्तदा बुद्ध्यनुरोधतः ॥ (१३३)
वस्तुधर्म्मस्य संस्पर्शो विच्छेदकरणे ध्वनेः ।
स्यात्सत्यं सति तत्त्वे हि नैकवस्त्वभिधायिनि ॥ (१३४)
बुद्धावभासमानस्य दृश्यस्याभावनिश्चयात् ।
तेनान्या[पोहविषयाः श[3]ब्दाः सामा][6]न्यगोचराः ॥ (१३५)
शब्दाश्च बुद्धयश्चैव वस्तुन्येषामसम्भवात् ।
एकत्वाद्वस्तुरूपस्य भिन्नरूपा मतिः कुतः ॥ (१३६)
अन्वयव्यतिरेकौ वा नैकस्यैकार्थगोचरौ ।
अभेदव्यवहाराश्च भेदे[ स्युरनिबन्धनाः ॥[7] १३७]

[1] व्यवच्छेदो—भो० भा०। [2] PVM. भूयान्ना ०
[3] PVM. प्रोक्ताः।

7b सर्वत्र भावाद् व्यावृत्तेनैते दोषाः प्रसङ्गिनः।
एककार्येषु भेदेषु[१] तत्कार्यपरिचोदने[२] ॥ (१३८)
गौरवाशक्तिवैफल्याद्भेदाख्यायाः समा श्रुतिः।
कृता वृद्धैरतत्कार्यव्यावृत्तिविनिबन्धना ॥ (१३९)
न भावे सर्वभावानां [स्वस्वभावव्यवस्थितेः।
यद्रूपं][1]शावलेयस्य बाहुलेयस्य नास्ति तत् ॥ (१४०)
अतत्कार्यपरावृत्तिर्द्वयोरपि च[३] विद्यते।
[४]अर्थाभेदेन च विना शब्दाभेदो न युज्यते ॥ (१४१)
तस्मात्तत्कार्यतापीष्टाऽतत्कार्यादेव भिन्नता।
चक्षुरादा[वनेकत्र रूपविज्ञानके][५][2]क्वचित् ॥ (१४२)
अविशेषेण तत्कार्यचोदनासंभवे सति।
सकृत्सर्वप्रतीत्यर्थं कश्चित्साङ्केतिकीं श्रुतिं ॥ (१४३)
कुर्याद्दतेपि तद्रूपसामान्याद् व्यतिरेकिणः।
एकप्रवृत्तेरनेकोपि [यद्येकश्रुतिमान् भवेत् ॥ (१४४)
वृत्तिराधेय][3]ता व्यक्तिरिति तस्मिन्न युज्यते।
नित्यस्यानुपकार्यत्वान्नाधारः प्रविसर्पतः ॥ (१४५)
शक्तिस्तद्देशजननं कुण्डादेर्बदरादिषु।
न संभवति साप्यत्र तदभावेप्यवस्थितेः ॥ (१४६)
न स्थितिः साप्ययुक्तैव भेदाभेदविवेच[ने।
विज्ञानोत्पत्तियोग्यत्वाया][4]त्मन्यन्यानुरोधि यत् ॥ (१४७)
तद् व्यंग्यं योग्यतायाश्च कारणं कारकं मतं।
प्रागेवास्य च योग्यत्वे तदपेक्षा न युज्यते ॥ (१४८)
सामान्यस्याविकार्यस्य तत्सामान्यवतः कुतः।
अञ्जनादेरिव व्यक्तेः संस्कारो[ऽक्षस्य न भवेत् ॥ (१४९)
तत्प्रपत्तेरभि][5]न्नत्वात्तद्भावाभावकालयोः।
व्यञ्जकस्य च जातीनां जातिमत्ता यदीष्यते ॥ (१५०)

---

[१] PVM. भावेषु [२] परिवेदनात्--भो० भा०।

[३] विद्यते--भो० भा०। अतद्रूपपरावृत्तिरित्येतेन पाठभेदेन सह यद्रूपमित्यादि श्लोकः श्लोकवार्त्तिकटाकायां न्यायरत्नाकरे (NR. पृष्ठे ५६६तमे)।

[४] अर्थभेदेन च विना शब्दभेदो न युज्यते--भो० भा०।

[५] भोटभाषान्तरे तु--विज्ञानकार्यवत्।



प्राप्तो गोत्वादिना तद्वान् प्रदीपादिः[१] प्रकाशकः।
व्यक्तेरन्याथवानन्या येषां जातिस्तु विद्यते ॥ (१५१)
तेषां व्यक्तिष्वपूर्वासु क(थं सामान्यबुद्धयः।
एकत्र दृष्टस्या)[6]न्यत्र दर्शनासम्भवात्सतः ॥ (१५२)
अनन्यत्वेऽन्वयाभावादन्यत्वेप्यनपाश्रयात्।
न याति न च तत्रासीदस्ति पश्चान्न चांशवत्[२] ॥ (१५३)
जहाति पूर्वं नाधारमहो व्यसनसन्ततिः।
अन्यत्र वर्तमानस्य ततो[न्यस्थानजन्मनि ॥ (१५४)
8a स्वस्थानादचलतोन्यत्र वृत्तिर][7]युक्तिमत्।
यत्रासौ वर्तते भावस्तेन संबध्यतेपि न ॥ (१५५)
तद्देशिनञ्च व्याप्नोति किमप्येतन्न चाद्भुतं[३]।
व्यक्त्येवैक[व्यक्ताऽथ सर्वगा जातिरिष्यते][1] ॥ (१५६)
सर्वत्र दृश्येताभेदात्साऽपि न व्यक्त्यपेक्षणात्[४]।
व्यंजकाकल्पनायान्तु व्यंग्ये सम्यङ् न कल्पितम् ॥ (१५७)
विपर्ययः पुनः) कस्मादिष्टः सामान्यतद्वतोः।
पाचकादिष्वभिन्नेन विनाप्यर्थेन वाचकः ॥[५] (१५८)
भेदान्न हेतुः कर्मास्य न जातिः कर्म[संश्रयात्]।
[श्रोत्र[६]न्तरनिमित्तान्न कर्मणोप्यस्ति वर्तनम् ॥ १५९
असं]बन्धान्न सामान्यं नायुक्तं शब्द[कारणात्।
अतिप्रसंगात् कर्मा][2]पि नासञ्ज्ञानाभिधानयोः[७] ॥ (१६०)
अनैमित्तिकतापत्तेर्न च शक्तिरनन्वयात्।
सामान्यं पाचकत्वादि यदि प्रागेव तद्भवेत् ॥ (१६१)
व्यक्तिः[८] सत्तादिवन्नो चेन्न पश्चादविशेषतः।
क्रियोपकारापेक्ष्यस्य व्यञ्जकत्वेऽविक[ारिणः ॥ १६२

---

[१] PVM. प्रदीपादिप्रकाशकः।

[२] SD. नायातीति पाठभेदः पृ० ७३ (Reprint from the Pandit 1891)

[३] PVM. ० तन्महाद्भुतं। [४] PVM. व्यक्त्यपेक्षिणी।

[५] VN. टीका पृ० २७ (७)।

[६] PVM. श्रुत्यन्तरनिमित्तत्वात्कर्मणो न निमित्तता।

[७] न सञ्ज्ञानाभिधानयोः--भो० भा०। [८] PVM. व्यक्तं।

अतिशये वा ह्य][3]प्यस्य क्षणिकत्वात्क्रिया कुतः ।
तुल्ये भेदे यया जातिः प्रत्यासत्त्या प्रसर्पति ॥ (१६३)
कचिन्नान्यत्र सैवास्तु शब्दज्ञाननिबन्धनं ।

ख. सांख्यमतनिरासः

न निवृत्तिं विहायास्ति यदि भावान्वयोपरः ॥ (१६४)
एकस्य कार्यमन्यस्य न स्यादत्यन्तभेदतः ।
यद्येकात्मतयानेक(कार्यस्यैकस्य)[4]कारकः ॥ (१६५)
आत्मैकत्रापि[1] सोस्तीति व्यर्थाः स्युः सहकारिणः ।
नापैत्यभिन्नं तद्रूपं विशेषाः खल्वपायिनः ॥ (१६६)
एकापाये फलाभावाद्विशेषेभ्यस्तदुद्भवः ।
स पारमार्थिको भावो य एवार्थक्रियाक्षमः ॥ (१६७)
स च नान्वेति यो[न्वेति न तस्मात् [5]का]र्यसंभवः ।
तेनात्मना हि भेदेपि हेतुः कश्चिन्न चापरः ॥ (१६८)
स्वभावोयमभेदे तु स्यातां नाशोद्भवौ सकृत् ।
भेदोपि तेन नैवं चेद्य एकस्मिन्विनश्यति ॥ (१६९)
तिष्ठत्यात्मा न तस्यातो न स्यात्सामान्यभेदधोः ।
निवृत्तेर्निः[स्वभावत्वान्न] [6]स्थानास्थानकल्पना ॥[2] (१७०)
उपप्लवश्च सामान्यधियस्तेनाप्यदूषणा ।
यत्तस्य जनकं रूपं ततोन्यो जनकः कथं ॥ (१७१)
भिन्ना विशेषा जनका अप्यभेदोपि तेषु चेत् ।
8b (तेन)[6] ते जनकाः प्रोक्ताः प्रतिभासोपि भेदकः ॥ (१७२)
अनन्यभाक् स एवार्थस्तस्य व्यावृत्तयोपरे ।
तत् कार्यं कारणञ्चोक्तं तत्स्वलक्षणमिष्यते ॥ (१७३)
तत्त्यागाप्तिफलाः सर्वाः पुरुषाणां प्रवृत्तयः ।
यथा भेदाविशेषेपि न सर्व्वं सर्व्वसाधनं ॥ (१७४)
तथा[ऽ] भेदा[ऽविशेषेऽपि][1]न सर्व्वं सर्व्वसाधनं ।
भेदे हि[3] कारकं किञ्चिद्वस्तुधर्म्मतया भवेत् ॥ (१७५)

[1] PVM. वास्तीति। [2] VPT. व्यावृत्तेर्न स्व०
[3] भेदेपि—भो० भा०।



अभेदे तु विरुध्येते तस्यैकस्य क्रियाक्रिये ।
भेदोप्यस्त्यक्रियातश्चेत् न कुर्युः सहकारिणः ॥ (१७६)
पर्यायेणाथ कर्तृत्वं स किं तस्यैव वस्तुनः ।
अत्यन्तभेदाभेदौ तु [स्यातां तद्वति][2]वस्तुनि ॥ १७७)
अन्योन्यं वा तयोर्भेदः सदृशासदृशात्मनोः ।
तयोरपि भवेद्भेदो यदि येनात्मना तयोः ॥ (१७८)
भेदः सामान्यमित्येतद्यदि भेदस्तदात्मना ।
भेद एव तथा च स्यान्निःसामान्यविशेषता ॥ (१७९)
भेदसामान्ययोर्य[द्वत् घटादीनां][3] परस्परं ।
यमात्मानं पुरस्कृत्य पुरुषोयं प्रवर्तते ॥ (१८०)
तत्साध्यफलवाञ्छावान् भेदाभेदौ तदाश्रयौ ।
चिन्त्येत स्वात्मना भेदो व्यावृत्त्या च समानता ॥ (१८१)
अस्त्येव वस्तु नान्वेति प्रवृत्त्यादिप्रसङ्गतः ।

ग. जैनमतनिरासः

एतेनैव[1] य[त्किंचिदयुक्तम][4]श्लीलमाकुलं ॥ (१८२)
प्रलपन्ति प्रतिक्षिप्तं तदप्येकान्तसम्भवात् ।
सर्वस्योभयरूपत्वे तद्विशेषनिराकृतेः ॥ (१८३)
चोदितो दधि खादेति किमुष्ट्रं नाभिधावति ।
अथास्त्यतिशयः कश्चिद्येन भेदेन व[र्त्तते ॥ (१८४)
स एव विशेषोऽन्यत्र][5] नास्तीत्यनुभयं परं ।
सर्वात्मत्वे च सर्वेषां भिन्नौ स्यातां न धीध्वनी ॥ (१८५)
भेदसंभारवादस्य तदभावाद[2][संभवः] ।

३. शब्दचिन्ता

द्रव्याभावादभावस्य शब्दा रूपाभिधायिनः ॥ (१८६)
[नाशंक्या] एव सि[द्धास्तेऽतो व्यवच्छेदवाचकाः]।[6]
तया[3] विभेदापेक्षो वा स्वभावः केवलोऽथवा ॥ (१८७)

[1] PVM. एतेनैव यदाह्लीकाः किमप्ययुक्तमाकुलम् ।
[2] PVM. तदभेदात् ।
[3] PVM. क्वचित् ।

उच्यते साध्यसिद्ध्यर्थं नाशे कार्यत्वसत्ववत् ।
सत्ता[स्वभावो हेतुश्चेत् सा सत्ता साध्यते कथम्[7] ॥ (१८८)
भेदेनानन्वयात् सोयं व्याहतो हेतुसाध्ययोः ।
9a भ]ावोपादानमात्रे[1] तु साध्ये सामान्यधर्मिणि ॥ (१८९)
न कश्चिदर्थः सिद्धः स्यादनिषिद्धश्च तादृशं ।
उपात्तभेदे साध्येस्मिन् भवेद्धेतुरनन्वयः ॥ (१९०)
सत्तायां तेन साध्यायां [विशेषः साधितो भवेत् ।
अपरामृष्टतद्भेदे वस्तुमात्रस्य[2] साधने ॥ (१९१)
तन्मात्रव्य][1]ापिनः साध्यस्यान्वयो न विहन्यते ।
नासिद्धे भावधर्म्मोस्ति व्यभिचार्युभयाश्रयः ॥ (१९२)
धर्मो विरुद्धोऽभावस्य सा सत्ता साध्यते कथं ।
सिद्धःस्वभावो गमकोऽतो गम्यस्तस्य व्यापकः ॥ (१९३)
स्व[3]भावनियतो बोध्यः तत्सि)[2]द्धौ वा निवर्तकः ।

(१) निर्हेतुकविनाशः

अनित्यत्वे यथा कार्यमकार्ये[4] वाऽविनाशिनि ॥ (१९४)
अहेतुत्वाद्विनाशस्य स्वभावादनुबन्धिता ।
सापेक्षाणां हि भावानां नावश्यम्भाव[5]तेद्यते ॥ (१९५)
बाहुल्ये[पीति चेत् तस्य हेतोः क्वचिदसम्भवः ।][3]
एतेन व्यभिचारित्वमुक्तं कार्याव्यवस्थितेः ॥ (१९६)
सर्व्वेषां नाशहेतूनां हेतुमन्नाशवादिनां ।
असामर्थ्याच्च तद्धेतोर्भवत्येव स्वभावतः ॥ (१९७)
यत्र नाम भवत्यस्मादन्यत्रापि स्वभावतः ।
या [ भाव[6]विषया काचिद्[4] द्विधैवानुमितिः ततः ॥ (१९८)
स्वसाध्ये कार्यभावाभ्यां संबन्धनियमात्तयोः ।

(२) अनुपलब्धिचिन्ता

प्रवृत्तेर्बुद्धिपूर्वत्वात्तद्भावानुपलम्भने ॥ (१९९)

[1] सत्ताविशेषमात्रे—भो० भा० । [2] PVM. वस्तुमात्रे तु ।
[3] PVM. सिद्धः स्वभावो नियतः स्वनिवृत्तौ निवर्त्तकः ।
[4] PVM. अकार्यं । [5] PVM. ०भाविता ।
[6] PVM. या काचिद्भावविषयाऽनुमितिर्द्विविधैव सा ।



प्रवर्तितव्यं नेत्युक्ताऽनुपलब्धेः प्रमाणता ।
शास्त्राधिकारासम्बद्धा बहवो[ऽर्थाकृतेन्द्रियाः[1] ॥[5] २००]
अलिङ्गाश्च कथन्तेषां अभावानुपलब्धितः ।
सदसन्निश्चयफला न हि स्याद्वाऽप्रमाणता ॥ (२०१)
प्रमाणमपि काचित्स्याल्लिङ्गातिशयभाविनो ।
स्वभावज्ञापकाज्ञानस्यायं न्याय उदाहृतः ॥ (२०२)
9b [कार्ये तु कारकाज्ञान][6]मभावस्यैव साधकं ।
स्वभावानुपलम्भश्च स्वभावेऽर्थस्य लिङ्गिनि ॥ (२०३)
तदभावः प्रतीयेत हेतुना यदि केनचित् ।
दृश्यस्य दर्शनाभावकारिणो[2]ऽसम्भवे सति ॥ (२०४(
भावस्यानुपलम्भस्य [भावा]भाव[ः प्रतीयते][1] ।
विरुद्धस्य च भावस्य भावे तद्भावबाधनात् ॥ (२०५)
तद्विरुद्धोपलब्धौ स्यादसत्ताया विनिश्चयः ।
अनादि[3]वासनोद्भूतविकल्पपरिनिष्ठितः ॥ (२०६)
शब्दार्थस्त्रिविधो धर्मी भावाभावोभयाश्रयः ।
तस्मिन्भावानुपा[दाने साध्येऽ][2] स्यानुपलम्भनं ॥ (२०७)
तथा हेतुर्न्न तस्यैवाभावे[4] शब्दप्रयोगतः ।
परमार्थैकतानत्वे शब्दानामनिबन्धना ॥[5] (२०८)
न स्यात् प्रवृत्तिरर्थेषु दर्शनान्तरभेदिषु ।
अतीताजातयोर्वापि न च [स्यादनृतार्थ[6]][3]ता ॥ (२०९)
वाचः कस्याश्चिदित्येषा बौद्धार्थविषया मता ।
शब्दार्थापह्नवे साध्ये धर्माधारनिराकृतेः ॥ (२१०)
न साध्यः समुदायः स्यात्सिद्धो धर्मश्च केवलः ।
सदसत्पक्षभेदेन [शब्दार्थानप][4]वादिभिः ॥ (२११)
वस्त्वेव चिन्त्यते ह्यत्र प्रतिबद्धफलोदयः ।
अर्थक्रिया[ऽ]समर्थस्य विचारैः किं तदर्थिनां ॥ (२१२)

[1] VN. ०कथन्तेषामभावोऽनुपलम्भता—इति भेदेन टीकायां पृ० २४(५)।
[2] PVM. ०कारणासंभवे । [3] असङ्गवासना—भो० भा० ।
[4] PVM. ०भावः । [5] VN. टीका पृ० ७२ (२३, २४) ।
[6] धर्मे वस्त्वाश्रयासिद्धिरयं—भो० भा० ।

षण्ढस्य रूपवैरूप्यकादिभिः[१] किं परीक्षया ।
[शब्दार्थः कल्पनाज्ञानविष][5]यत्वेन कल्पितः ॥ (२१३)
धर्म्मो वस्त्वाश्रया[ऽ]सिद्धि[२]रस्योक्ता न्यायवादिना ।

## ४. आगमचिन्ता

नान्तरीयकता(ऽ)भावाच्छब्दानां वस्तुभिस्सह ॥ (२१४)
10a नार्थसिद्धिस्ततस्तद्धि वक्तुर[6]र्थाभिधायकं ।
[आप्तवादाविसंवादसामान्यादनुमानता ॥ (२१५)
सम्बन्धाऽनुगुणोपायं पुरुषार्थाभिधायकम् ।]
परीक्षाधिकृतं वाक्यं अतोनधिकृतम्परं ॥ (२१६)
प्रत्यक्षेणानुमानेन द्विविधेनाप्यबाधनं ।
दृष्टादृष्टार्थयोरस्याविसंवादः तदर्थयोः ॥ (२१७)
आप्तवादाविसंवाद[सामान्यादनुमा]नता ।
बुद्धेरगत्याभि(हिता निषिद्धाप्यस्य गो)[1]चरे ॥ (२१८)
हेयोपादेयतत्वस्य सोपायस्य प्रसिद्धितः ।
प्रधानार्थाविसंवादादनुमानम्परत्र वा ॥ (२१९)
पुरुषातिशयापेक्षं यथार्थमपरे विदुः ।
इष्टोयमर्थः[प्रत्येतुं शक्यः] सोतिशयो यदि ॥ (२२०)
अयमेवं न वे[त्यन्यदो][2]षानिर्दोषतापि वा ।
दुर्लभत्वात्प्रमाणानां दुर्बोधेत्यपरे विदुः ॥ (२२१)
सर्वेषां सविपक्षत्वान्निर्ह्रासातिशयश्रिताः ।
सात्मीभावात्तदभ्यासा[द्] हीयेरन्नास्रवाः क्वचित् ॥ (२२२)
(निरु)पद्रवभूतार्थस्वभावस्य विपर्ययैः ।[3]
न बाधा यत्नवत्त्वेपि बुद्धेस्तत्पक्षपाततः ॥ (२२३)
सर्व्वासां दोषजातीनां जातिः सत्कायदर्शनात् ।
साऽविद्या तत्र तत्स्नेहस्तस्माद् द्वेषादिसम्भवः ॥ (२२४)
मोहो निदानं दोषाणां अत एवाभिधीयते ।
सत्कायदृष्टिरन्यन्न त[त्प्रहा][4]णे प्रहाणतः ।०॥ (२२५)

[१] PVM. रूपे वैरूप्ये कामिन्याः । [२] PVM. नार्थसिद्धिस्ततस्ते हि वक्त्रभिप्रायसूचकाः ।—इति VN. टीका पृ० २३ (४) ।



### (१) वेदप्रामाण्यनिरासः

गिराम्मिथ्यात्वहेतूनां दोषाणां पुरुषाश्रयात् ।
अपौरुषेयं सत्यार्थमिति केचित्प्रचक्षते ॥ (२२६)
गिरां सत्यत्वहेतूनां गुणानां पुरुषाश्रयात् ।
अपौरुषेयं मिथ्यार्थं किं नेत्थं वै प्रच[5]क्षते ॥ (२२७)
अर्थज्ञापनहेतुर्हि सङ्केतः पुरुषाश्रयः ।
गिरामपौरुषेयत्वेप्यतो मिथ्यात्वसम्भवः ॥ (२२८)

#### क. अपौरुषेयत्वेऽप्यप्रामाण्यम्

सम्बन्धापौरुषेयत्वे स्यात्प्रतीतिरसंविदः ।
सङ्केतात्तदभिव्यक्तावसमर्थान्यकल्पना ॥ (२२९)
10b गिरामेकार्थनि(यमे)[6]न स्यादर्थान्तरे गतिः ।
अनेकार्थाभिसम्बन्धे विरुद्धव्यक्तिसम्भवः ॥ (२३०)
अपौरुषेयतायाञ्च व्यर्था स्यात्परिकल्पना ।
वाच्यश्च हेतुर्भिन्नानां सम्बन्धस्य व्यवस्थितेः ॥ (२३१)
असंस्कार्यतया पुंभिः सर्व्वथा स्यान्निरर्थता ।
संस्कारोपगमे मुख्यं ग[जस्नाननिभं भ][1]वेत् ॥ (२३२)

#### ख. सम्बन्धचिन्ता

संबन्धिनामनित्यत्वान्न संबन्धेस्ति नित्यता ।
[१] नित्यस्यानुपकार्यत्वादकुर्वाणश्च नाश्रयः ॥ (२३३)
अर्थैरतः स शब्दानां संस्कार्यः पुरुषैर्धिया ।
अर्थैरेव सहोत्पादे न स्वभावो[२] विपर्ययः ॥ (२३४)
शब्देषु युक्तः, सम्बन्धे नायं दोषो विकल्पिते ।
नित्यत्वादाश्रया[पा]येप्यनाशो यदि [सम्मतः ।।[2] २३५]
नित्येष्वाश्रयसामर्थ्यं किं येनेष्टः समा[३]श्रयः ।
ज्ञानोत्पादेन हेतूनां संबन्धात्सहकारिणां ॥ (२३६)
तदुत्पादनयोग्यत्वेनोत्पत्तिर्व्यक्तिरिष्यते ।
घटादिष्वपि युक्तिज्ञैरविशेषेऽविकारिणां ॥ (२३७)

[१] नास्तीदं श्लोकार्द्धं भोटभाषान्तरे ।
[२] PVM. स्वभावविपर्ययः । [३] PVM. स चाश्रयः ।

व्यञ्जकैः स्वैः कुतः कोर्थो व्यक्तास्तैस्ते य[तो][8] मताः ।
सम्बन्धस्य च वस्तुत्वे स्याद्भेदाद् बुद्धिचित्रता ॥ (२३८)
ताभ्यामभेदे तावेव नातोन्या वस्तुनो गतिः ।
भिन्नत्वाद्वस्तुरूपस्य सम्बन्धः कल्पनाकृतः ॥ (२३९)
सद्द्रव्यं स्यात्पराधीनं सम्बन्धोऽन्यस्य वा कथं ।
वर्णा निरर्थकाः सन्तः [पदा]'दिपरिकल्पि[1]ताः ॥ (२४०)
अवस्तुनि कथं वृत्तिः सम्बन्धस्यास्य वस्तुनः ।

ग. नापौरुषेयता

अपौरुषेयतापीष्टा कर्तॄणामस्मृतेः किल ॥ (२४१)
सन्त्यस्याप्यनुवक्तार इति धिग् व्यापकं तमः (॥)

घ. न नित्यता

(क) गुर्वध्ययनपूर्वकत्वादपि न

[यथाऽय]मन्यतोऽश्रुत्वा नेमं वर्णपदक्रमं ॥ (२४२)
व[क्तुं स][5]मर्थः पुरुषस्तथान्योपीति कश्चन ।
अन्यो वा रचितो ग्रन्थः सम्प्रदायादृते परैः ॥ (२४३)
दृष्टः कोऽभिहितो येन सोप्येवं नानुमीयते ।
यज्जातीयो यतः सिद्धः स[ोऽविशिष्टोग्निका]ष्ठवत् ॥(२४४)
अदृष्टहेतुरप्यन्य[स्तद्भवः संप्रतीयते][6]।[2]
11a तत्राप्रदर्श्य ये भेदं कार्यसामान्यदर्शनात् ॥(२४५)
हेतवः प्रवितन्यन्ते सर्वे ते व्यभिचारिणः ।
सर्वथानादितः सिद्ध्येदेवं नापुरुषाश्रयः ॥(२४६)
तस्मादपौरुषेयत्वे स्यादन्योऽपुरुषाश्रयः[3] ।
म्लेच्छ[ादिव्यवहारा]णां नास्तिक्यवचसा[मपि ॥२४७
अनादित्त्वाद् भवेदे[4]वं][1] पूर्वसंस्कारसन्ततेः ।
तादृशेऽपौरुषेयत्वे कः सिद्धेपि गुणो भवेत् ॥(२४८)

---

[1] PVM. ०परिकल्पितं
[2] VV. (पृ० १४४) ० तस्मादग्निकाष्ठवत् ।० न्यो विशिष्टः संप्रतीयते ।
[3] PVM. ०नराश्रयः ।
[4] PVM. तथाभावः ।



(ख) अनादित्वेऽर्थसंस्कारभेदेन संशयः

अर्थसंस्कारभेदानां दर्शनात्संशयः पुनः ।
अन्याविशेषाद्वर्णानां साधने किं फलं भवेत् ॥(२४९)
वा[क्यं भिन्नं न व]र्णेभ्यो विद्यतेनुपलंभतः ।
[1](अनेकांगतया)[2]सिद्धेः पृथक् तेषां निरर्थता ॥(२५०)
अतद्रूपे च ताद्रूप्यं कल्पितं सिंहतादिवत् ।
प्रत्येकं सार्थकत्वेपि मिथ्यानेकत्त्वकल्पना ॥(२५१)
एकावयवगत्या च वाक्यार्थप्रतिपद्भवेत् ।
सकृ[च्छ्रुतौ च सर्वे]षां कालभेदो न युज्यते ॥(२५२)

(ग) स्फोटनिरासः

एकत्वेपि [ह्य][3]भिन्नस्य क्रमशो गत्यसम्भवात् ।
अनित्यं यत्नसम्भूतं पौरुषेयं कथन्न तत् ॥(२५३)
नित्योपलब्धिर्नित्यत्वेऽप्यनावरणसम्भवात् ।
अश्रुतिर्व्विकलत्वाच्चेत् कस्यचित्सहकारिणः ॥(२५४)
काममन्यपरोक्षो[2]क्तिर्नियमस्तु विरुध्यते ।[4]
सर्वत्रानुपलम्भः स्यात् तेषामव्यापिता यदि ॥(२५५)
सर्व्वेषामुपलम्भः स्यात् युगपद् व्यापिता यदि ।
संस्कृतस्योपलम्भे च कः संस्कर्त्ताऽविकारिणः ॥(२५६)
इन्द्रियस्य स्यात्संस्कारः शृणुयान्निखिलञ्च तत् ।
संस्कारभे[दभि][5]न्नत्वादेकार्थनियमो यदि ॥ (२५७)
अनेकशब्दसंताने[3] श्रुतिः कलकले कथं ।
ध्वनयः केवलं तत्र श्रूयन्ते चेन्न वाचकाः ॥ (२५८)
ध्वनिभ्यो भिन्नमस्तीति श्रद्धेयमविवक्षितं ।
स्थितेष्वन्येषु शब्देषु श्रूयते वाचकः कथं[6] ॥ (२५९)
11b कथं वा शक्तिनियमाद्भिन्नध्वनिगतिर्भवेत् ।
ध्वनयः संमता यैस्ते दोषैः कैरप्यवाचकाः ॥ (२६०)
ध्वनिभिर्व्यज्यमानेस्मिन् वाचकेपि कथं न ते ।

---

[1] PVM. अनेकावयवात्मत्वे पृथक् ।
[2] PVM. प्रतीक्षोक्ति । [3] PVM. ० संघाते ।

(घ) वर्णानुपूर्विचिन्ता

वर्णानुपूर्वी वाक्यं चेन्न वर्णानामभेदतः ॥ (२६१)
तेषाञ्च न व्यवस्थानं क्रमान्तरविरोधतः ।
देशकालक्रमाभावो व्याप्ति[नित्यत्ववर्णना][1]त् ॥ (२६२)
अनित्याव्यापितायाञ्च दोषः प्रागेव कीर्त्तितः ।
व्यक्तिक्रमोपि वाक्यं न नित्यव्यक्तिनिराकृतेः ॥ (२६३)
व्यापारादेर्हि [1]तत्सिद्धेः करणानाञ्च कार्यता ।
[2]स्वज्ञानेनान्यधीहेतुः सिद्धेर्थे व्यञ्जको मतः ॥ (२६४)
यथा दीपोन्यथा वापि को विशेषोस्य कारकात् ।
कर[णानां][2] समग्राणां व्यापारादुपलब्धितः ॥ (२६५)
नियमेन च कार्यत्वं व्यञ्जके तदसम्भवात् ।
तद्रूपावरणानां च व्यक्तिस्ते विगमो यदि ॥ (२६६)
अभावे करणग्रामसामर्थ्यं किं न तद्भवेत् ।
शब्दाविशेषादन्येषामपि व्यक्तिः प्रसज्यते ॥ (२६७)
तथाभ्युपगमे सर्व्वकार[काणां][3] निरर्थता ।
साधनं प्रत्यभिज्ञानं सत्प्रयोगादि यन्मतं ॥ (२६८)
अनुदाहरणं सर्व्वभावानां क्षणभङ्गतः ।
दूष्यः कुहेतुरन्योपि बुद्धेरपुरुषाश्रये ॥ (२६९)
बाधाभ्युपेतप्रत्यक्षप्रतीतानुमितैः समं ।
आनुपूर्व्याश्च वर्णेभ्यो [भेदः] [4]स्फोटेन चिन्तितः ॥ (२७०)
कल्पनारोपिता सा स्यात् कथं वा पुरुषाश्रया ।

(ङ) निर्हेतुको विनाशः

सत्तामात्रानुबन्धित्वान्नाशस्यानित्यता ध्वनेः ॥ (२७१)
अविनाशात्स एवास्य विनाश इति चेत्कथं ।[3]
अन्यो[ऽ[4]र्थोन्यस्य ना]शोस्तु काष्ठं कस्मान्न दृश्यते ॥ (२७२)

---

[1] PVM. ०देव । [2] SH. स्वज्ञानेनेत्यादिकारिका "यथा दीपोन्यथा-भावे"—इति भेदेन साहित्यदर्पणे तृतीयपरिच्छेदेप्युद्धृता ।

[3] अग्नेरर्थान्तरं जातं काष्ठं हि दृष्टतां व्रजेत् ।—इति भोटभाषान्तरेऽधिकं श्लोकार्द्धम् । [4] PVM. अन्योऽर्थोऽन्यस्य ।



त[त्परिग्रहत][5]श्चेन्न तेनानावरणं यतः ।
विनाशस्य[ा]विनाशित्वं स्यादुत्पत्तेस्ततः पुनः ॥ (२७३)
काष्ठस्य दर्शनं हन्तृघाते चैत्रापुनर्भवः ।
यथात्राप्येवमिति चेत् हन्तुर्न्नामरणत्वतः ॥ (२७४)
[अनन्य]त्त्वे विनाशस्य स्यान्नाशः [काष्ठमेव तु][6] ।
12a तस्यासत्वादहेतुत्वं नातोन्या विद्यते गतिः ॥ (२७५)
अहेतुत्वेपि नाशस्य नित्यत्वाद् भावनाशयोः ।
सहभावप्रसङ्गश्चेदसतो नित्यता कुतः ॥ (२७६)
असत्वे [ऽ]भावनाशित्वप्रसङ्गोपि न युज्यते ।
[नाशेन] यस्माद् भावस्य न विनाशनमिष्यते ॥ (२७७)
[नश्यन् भावोन[1]परापेक्षः तस्य][1]ज्ञापनाय सा ।
अवस्थाऽहेतुरुक्तास्या भेदमारोप्य चेतसा ॥ (२७८)
स्वतोपि भावेभावस्य विकल्पश्चेदयं समः ।
न तस्य किञ्चिद् भवति न भवत्येव केवलं ॥ (२७९)
भावे ह्येष विकल्पः स्याद्विधेर्व्वस्त्व[नुरोधतः] ।
न भावो भवतीत्युक्तमभा[वो भवतीति न ॥[2] (२८०)]
अपेक्षेत परं कार्यं यदि विद्येत किञ्चन ।
यदकिञ्चित्करं वस्तु किं केनचिदपेक्ष्यते ॥ (२८१)
एतेनाहेतुकत्वेपि ह्यभूत्वा नाशभावतः ।
सत्तानाशित्वदोषस्य प्रत्याख्यातं प्रसञ्जनं ॥ (२८२)
यथा केषाञ्चिदेवेष्टः प्र[ति घो ज][3]न्मिनां तथा ।
नाशि[2]स्वभावो भावानां नानुत्पत्तिमतां यदि ॥ (२८३)
स्वभावनियमाद्धेतोः स्वभावनियमः फले ।
नानित्ये रूपभेदोस्ति भेदकानामभावतः ॥ (२८४)
प्रत्याख्येयाऽत एवेषां सम्बन्धस्यापि नित्यता ।
स[म्बन्ध][4]दोषैः प्रागुक्तैः शब्दशक्तिश्च दूषिता ॥ (२८५)

---

[1] PVM. भावः परापेक्षो न ।

[2] PVM. नाशस्वभावो ।

(२ a.) नव्यमीमांसक(भाट्ट)मत-निरासः

क. अपौरुषेयत्वेऽपि दोषाः

नाऽपौरुषेयमित्येव यथार्थज्ञानसाधनं ।
दृष्टोऽन्यथापि वह्न्यादिरदुष्टः पुरुषागसा ॥ (२८६)
न ज्ञानहेतुतैव स्यात् तस्मिन्न कृतके मते ।
नित्येभ्यो वस्तुसामर्थ्यात् न च जन्मास्ति कस्य(चित् ॥)[°] २८७)
विकल्पवासनोद्भूताः समारोपितगोचराः ।
जायन्ते बुद्धयस्तत्र केवलं नार्थगोचराः ॥ (२८८)

ख. कृतकत्वेऽपि दोषाः

मिथ्यात्वं कृतकेष्वेव दृष्टमित्यकृतं वचः ।
सत्यार्थं व्यतिरेकस्य विरोधिव्यापनाद् यदि ॥ (२८९)
12b हेतावसम्भवे(ऽप्यभावात्तत्)तस्यापि शङ्क्यते ।
विरुद्धानाम्पदार्थानामपि व्यापकदर्शनात्॥ (२९०)
नासत्तासिद्धिरित्युक्तं सर्वतोनुपलम्भनात् ।
असिद्धायामसत्तायां संदिग्धा व्यतिरेकिता ॥ (२९१)
अन्वयो व्यतिरेको वा सत्त्वं वा साध्यधर्मिणि ।
तन्निश्चयफलैर्ज्ञानैः सिद्ध्यन्ति यदि साधनं ॥ (२९२)
[यत्र साध्यविपक्षस्य] [1]वर्ण्यते व्यतिरेकिता ।
स एवास्य सपक्षः स्यात् सर्वो हेतुरतो[1]न्वयी ॥ (२९३)
समयत्वे हि मन्त्राणां कस्यचित् कार्यदर्शनं[2] ।
अथापि भावशक्तिः स्यादन्यथाप्यविशेषतः ॥ (२९४)
क्रमस्यार्थान्तरत्वञ्च पूर्व्वमेव निराकृतं ।
नित्यं तदर्थसिद्धिः स्यादसामर्थ्यमपेक्ष्यते[2] ॥ (२९५)
सर्वस्य साधनं ते स्युर्भावशक्तिर्यदीदृशी ।

ग. नित्यत्वे दोषाः

प्रयोक्तृभेदापेक्षा[3] च नासंस्कार्यस्य युज्यते ॥ (२९६)

[1] PVM. ०रनन्वयी। [2] कार्यसाधनं—भो० भा०।
[3] कर्त्तृभेदापेक्षा च—भो० भा०।



संस्कार्यस्यापि भावस्य वस्तुभेदो हि भेदकः ।
प्रयोक्तृभेदान्नियमः शक्तौ न, समये भवेत् ॥ (२९७)
अनाधेयविशेषाणां किंकुर्वाणः प्रयोजकः ।[3]
प्रयोगो यद्यभिव्यक्तिः सा प्रागेव निराकृता ॥ (२९८)
व्यक्तिश्च[1] बुद्धिः सा यस्मात् स फलैर्यदि युज्यते ।
स्याच्छ्रोतुः फलसंबन्धो वक्ता हि व्यक्तिकारणं ॥ (२९९)
अनभिव्यक्तशब्दानां करणानां प्रयोजनं ।
मनोजपो वा व्यर्थः स्याच्छब्दो हि श्रोत्रगोचरः[4] ॥ (३००)
पारम्पर्येण तज्जत्वात्तद्व्यक्तिः सापि चेन्मतिः ।
ते तथा स्युस्तदर्था चेदसिद्धं कल्पनान्वयात् ॥ (३०१)

घ. समयकाराणामुक्त्या फलविशेषः

स्वसामान्यस्वभावानामेकभावविवक्षया ।
उक्तेः समयकाराणामविरोधो न वस्तुनि ॥ (३०२)
आनुपूर्व्यामसत्यां स्यात्सरो रस (इति श्रु)[5]तौ ।

ङ. वर्णानुपूर्विचिन्ता

न कार्यभेद इति चेदस्ति सा पुरुषाश्रया ॥ (३०३)
यो यद्वर्णसमुत्थानज्ञानजाज्ज्ञानतो ध्वनिः ।
जायते तदुपाधिः स श्रुत्या समवसीयते ॥ (३०४)
तज्ज्ञानजनितज्ञानः स श्रुतावपटुश्रुतिः ।
अपेक्ष्य तत्स्मृतिं पश्चात् [स्मृतिमाधत्त आत्म][6]नि ॥ (३०५)
इत्येषा पौरुषेय्यैव तद्धेतुग्राहिचेतसां ।
कार्यकारणता वर्णे ह्यानुपूर्वीति कथ्यते ॥ (३०६)
अन्यदेव ततो रूपं तद्वर्णानां पदापदं[2] ।
कर्तृसंस्कारतो भिन्नं सहितं[कार्यभेद]कृत् ॥ (३०७)
13a सा चानु(पूर्वी वर्णानां वर्तते वा)[7]चनाकृता[3] ।
इच्छा[4]ऽविरुद्धसिद्धीनां स्थि(ि)तक्रमविरोधतः ॥ (३०८)

[1] व्यक्ता च—भो० भा०। [2] PVM. पदे पदे ।
[3] PVM. तद्धेतुग्राहिचेतसां । [4] PVM. श्लोकार्द्धनमिदं नोपलभ्यते।

कार्यकारणतासिद्धेः पुंसां[1] वर्णक्रमस्य च ।
सर्वो वर्णक्रमः पुंभ्यो दहनेन्धनयुक्तिवत् ॥ (३०९)
असाधारणता सिद्धा (च पुंसां क्रम)कारिणां ।
[अतो ज्ञान]प्रभावाभ्यामन्येषां [तदभावतः ॥ (३१०)

च. आप्तचिन्ता

येऽपि[2] त][1]न्त्रविदः केचिन्मन्त्रान्कांश्चन कुर्वते ।
प्रभु[3]प्रभावस्तेषां स तदुक्तन्यायवृत्तितः ॥ (३११)
कृतकाः पौरुषेयाश्च मंत्रा वाच्याः फलेप्सुना ।
अशक्तिसाधनं पुंसामनेनैव निराकृतं ॥ (३१२)
बुद्धीन्द्रियोक्तिपुंस्त्वादिसाधनं यत्तु वर्ण्यते ।
[प्रमाणाभं ][4]यथार्थास्ति न हि शेषवतो गतिः ॥ (३१३)
अर्थोयं नायमर्थो न इति शब्दा वदन्ति न ।
कल्प्योयमर्थः पुरुषैस्ते च रागादिसंयुताः ॥ (३१४)
स एकस्तत्त्वविन्नान्य इति भेदश्च किंकृतः ।
तद्वत्पुंस्त्वे कथमपि ज्ञानी कश्चित्कथं न वः ॥[3] (३१५)
यस्य प्रमाण[4]संवादि वचनं सोर्थविद्यदि ।
न ह्यत्यन्तपरोक्षेषु प्रमाणस्यास्ति सम्भवः ॥ (३१६)
यस्य प्रमाणसंवादि वचनं तत्कृतं वचः ।
स आगम इति प्राप्तं निरर्थाऽपौरुषेयता ॥ (३१७)
यद्यत्यन्तपरोक्षेर्थेऽनागमज्ञानसम्भवः ।
अतीन्द्रियार्थवित्कश्चि[4]दस्तीत्यभिमतं भवेत् ॥ (३१८)
स्वयं रागादिमान्नार्थं वेत्ति वेदस्य नान्यतः ।
न वेदयति वेदोपि वेदार्थस्य कुतो गतिः ॥ (३१९)
तेनाग्निहोत्रं जुहुयात्स्वर्गकाम इति श्रुता ।
खादेच्छ्ववमांसमित्येष नार्थ इत्यत्र का प्रमा ॥ (३२०)
प्रसिद्धो लोक[वा][5]दश्चेत्तत्र कोतीन्द्रियार्थदृक् ।
अनेकार्थेषु शब्देषु येनार्थोयं विवेचितः ॥ (३२१)

[1] PVM. पुंभ्यो ।
[2] PVM. मन्त्रविदः ।
[3] PVM. प्रभोः ।
[4] PVM. प्रमाणमविसम्वादि ।



स्वर्गोर्वश्यादिशब्दश्च दृष्टोऽरूढार्थवाचकः ।
शब्दान्तरेषु तादृक्षु तादृश्येवास्तु कल्पना ॥ (३२२)
13b प्रसिद्धिश्च नृणां वादः प्रमाणं स च[6]नेष्यते ।
ततश्च भूयोर्थगतिः किमेतद् द्विष्ठकामितं ॥ (३२३)
अथ प्रसिद्धिमुल्लंघ्य कल्पने न निबन्धनं ।
प्रसिद्धेरप्रमाणत्वात्तद्ग्रहे किं निबन्धनं ॥ (३२४)
उत्पादिता प्रसिद्ध्यैव शङ्का शब्दार्थनिश्चये ।
यस्मान्नानार्थवृत्तित्त्वं शब्दानां तत्र दृश्यते ॥ (३२५)
अन्यथ[ासंभवाभावात् ][1] नानाशक्तेः स्वयं ध्वनेः ।
अवश्यं शङ्कया भाव्यं नियामकमपश्यतां ॥ (३२६)
एष स्थाणुरयं मार्ग्ग इति वक्तोति कश्चन ।
अन्यः स्वयं व्रवीमीति तयोर्भेदः परीक्ष्यतां ॥ (३२७)
सर्व्वत्र योग्यस्यैकार्थद्योतने संभवः[1] कुतः ।
ज्ञातावातीन्द्रियाः के[न वि][2]वक्षावचनादृते[2] ॥ (३२८)
विवक्षानियमे हेतुः सङ्केतस्तत्प्रकाशनः ।
अपौरुषेये सा नास्ति तस्य सैकार्थता कुतः ॥ (३२९)
स्वभावनियमेन्यत्र न योज्येत तया पुनः ।
सङ्केतश्च निरर्थः स्याद् व्यक्तौ च नियमः कुतः ॥ (३३०)
यत्र स्वातंत्र्यमिच्छाया नियमो नाम तत्र कः ।
द्योत[ये][3]त्तेन सङ्केतो नेष्टामेवास्य योग्यतां ॥ (३३१)

—अन्तरश्लोकाः ।

(२ b.) वृद्धमीमांसक (जैमिनि) मतनिरासः

क. वेदैकदेशसंवादित्वे न सर्वस्य प्रामाण्यम्

यस्मात्किलेदृशं सत्यं यथाग्निः शीतनोदनः ।
वाक्यं वेदैकदेशत्वादन्यदप्यपरोऽब्रवीत् ॥ (३३२)
रसवत्तुल्यरूपत्वादेकभाण्डे च पाकवत् ।
शेषवद् व्यभिचारित्वात्क्षिप्तं न्यायविदेदृशं ॥ (३३३)

[1] PVM. नियमः ।
[2] विवक्षानियमादृते—भो० भा० ।

ख. वेदप्रामाण्यघोषणा जैमिनेर्धार्ष्ट्यम्

निस्य[स्य] [4]पुंसः कर्तृत्वं नित्यान्भावानतीन्द्रियान् ।
ऐन्द्रियान्विषमं हेतुं भावानां विषमां स्थितिं ॥ (३३४)
निवृत्तिश्च प्रमाणाभ्यामन्यद्वा व्यस्तगोचरं ।
विरुद्धमागमापेक्षेणानुमानेन वा वदत् ॥ (३३५)
विरोधमसमाधाय शास्त्रार्थं चाप्रदर्श्य सः ।[5]
सत्यार्थं प्रतिजानानो जयेद्धार्ष्ट्येन वन्धकीं ॥ (३३६)
सिद्ध्येत्प्रमाणं यद्येवमप्रमाणमथेह किं ।
न ह्येकं नास्ति सत्याथ पुरुषे बहुभाषिणि ॥ (३३७)
नायं स्वभावः कार्यं वा वस्तूनां वक्तरि ध्वनिः ।
न च तद्व्यतिरिक्तस्य विद्यते(ऽव्यभिचारिता)[6] ॥ (३३८)
प्रवृत्तिर्वाचकानाञ्च वाच्यदृष्टिकृतेति चेत् ।
परस्परविरुद्धार्था कथमेकत्र सा भवेत् ॥ (३३९)
वस्तुभिर्न्नागमास्तेन कथञ्चिन्नान्तरीयकाः ।
प्रतिपत्तुर्न्नसि[ध्यन्ति] कुतस्तेभ्यो[ऽर्थनिश्च]यः ॥ (३४०)
14a तस्मा[न्न तन्निवृत्यापि वस्त्व[1]भा][1]वः प्रसिध्यति ।
तेनासन्निश्चयफलाऽनुपलब्धिर्न्न सिध्यति ॥०॥ (३४१)
वेदप्रामाण्यं कस्यचित्कर्तृवादः स्नाने धर्मेच्छा जातिवादावलेपः ।
संतापारम्भः पापहानाय चेति ध्वस्तप्रज्ञा(नांप)ञ्च
लिङ्गानि जाड्ये॥प्र॥[2]

[3]इति (ध)र्म्मकीर्तिकीर्त्तितप्रमाण[1]वार्तिके स्वार्थानु-
माननिश्चयपरिच्छेदः ॥(१)॥

---

[1] PVM. भावाभावः । [2] PVM. नास्ति ।

[3] प्रमाणवार्तिककारिकायाः स्वार्थानुमानं नाम प्रथमः परिच्छेदः — भो० भा० ।

# द्वितीयः परिच्छेदः

## प्रमाणसिद्धिः

### १. प्रमाणलक्षणम्

(१) अविसंवादि ज्ञानम्

प्रमाणमविसंवादि ज्ञानम्; अर्थक्रियास्थितिः ।
अविसंवादनं; शाब्देप्यभिप्रायनिवेदनात् ॥ (१)
वक्तृव्यापारविषयो योर्थो बुद्धौ प्रकाशते ।
प्रामाण्यं तत्र शब्दस्य नार्थतत्त्वनिबन्धनं ॥ (२)
गृहीत[ग्रहणा][2]न्नेष्टं साम्वृतं धीप्रमाणता ।
प्रवृत्तेस्तत्प्रधानत्वात् हेयोपादेयवस्तुनि ॥ (३)
विषयाकारभेदाच्च धियोधिगमभेदतः । .
भावादेवास्य तद्भावात् स्वरूपस्य स्वतो गतिः ॥ (४)
प्रामाण्यं व्यवहारेण; शास्त्रं मोहनिवर्तनं ।[3]

(२) अज्ञातार्थप्रकाशकम्

अज्ञातार्थप्रकाशो वा; स्वरूपाधिगतेः परं ॥ (५)
प्राप्तं सामान्यविज्ञानं; नाविज्ञाते स्वलक्षणे ।
यज्ज्ञान[1]मित्यभिप्रायात्; स्वलक्षणविचारतः ॥ (६)

(३) भगवतः प्रामाण्यम्

तद्वत्प्रमाणं भगवान् अभूतविनिवृत्तये ।
भूतोक्तिः; साधनापेक्षा ततो युक्ता [प्रमा][4]णता ॥०॥ (७)

---

[1] VB. तज्ज्ञान ।

(४) ईश्वरादेरप्रामाण्यम्

क. नित्यानित्ययोरप्रमाणता

नित्यं प्रमाणं नैवास्ति प्रामाण्याद्; वस्तुसङ्गतेः ।
ज्ञेयानित्यतया तस्या अध्रौव्यात् क्रमजन्मनः ॥ (८)
नित्यानुत्पत्तिविश्लेषादपेक्षाया अयोगतः ।
कथञ्चिन्नोपकार्यत्वाद्; अनित्येप्यप्रमाणता ॥ (९)

ख. ईश्वरदूषणम्

स्थिति[1]प्रवृत्तिसं[स्थान][5]विशेषार्थक्रियादिषु ।
इष्टसिद्धिरसिद्धिर्वा दृष्टान्ते संशयोऽथवा ॥ (१०)
सिद्धं यादृगधिष्ठातृभावाभावानु[2]वृत्तिमत् ।
सन्निवेशादि तद्युक्तं तस्माद्यदनुमीयते ॥ (११)
वस्तुभेदे प्रसिद्धस्य शब्दसाम्यादभेदिनः ।
14b न युक्ता[नुमितिः][6] पाण्डुद्रव्यादिवद् हुताशने ॥ (१२)
अन्यथा कुम्भकारेण मृद्विकारस्य कस्यचित् ।
घटादेः करणात्सिध्येद् बल्मीकस्यापि तत्कृतिः ॥(१३)
साध्येनानुगमात्कार्ये सामान्येनापि साधने ।
सम्बन्धिभेदाद्भेदोक्तिदोषः कार्यसमो मतः ॥ (१४)
[जात्यन्तरे[3] प्रसि][1]द्धस्य शब्दसामान्यदर्शनात् ।
न युक्तं साधनं गोत्वाच्छशादीनां[4] विषा[5]णवत् ॥ (१५)
विवक्षापरतन्त्रत्वान्न शब्दाः संति कुत्र वा[6] ।
तद्भावादर्थसिद्धौ तु सर्व्वं सर्व्वस्य सिध्यति ॥ (१६)
एतेन *कापिला*दीनामचैतन्यादि[7] चिन्तितं ।
अनित्यादेश्च चैतन्य[2]मरणात्त्वगपेततः[8] ॥ (१७)
वस्तुस्वरूपेऽसिद्धेयं न्यायः सिद्धे[9] विशेषणं ।
अबाधकमसिद्धावप्याकाशाश्रयवद् ध्वनेः ॥ (१८)

---

[1] PS. VB. स्थित्वा । [2] VB. ०वात्तु । [3] VB. जात्युत्तरे प्रसि० ।
[4] PS. PVM. ०त्वाद्वागादीनां । [5] PVM. विषाणिवत् ।
[6] कुत्र न—भो० भा० । [7] PH. ०मिच्छेत्यादि ।
[8] PS. त्वगपोहतः, VB. त्वगपेततम् । [9] PS.VB. सिद्धे ।



असिद्धावपि शब्दस्य सिद्धे वस्तुनि सिध्यति ।
*औलूक्य*स्य यथा बौद्धेनोक्तं मूर्त्या[1]दिसाधनं[2] ॥ (१९)
तस्यैव व्यभिचारादौ शब्देप्यव्यभिचारिणि ।
दोषवत् साधनं ज्ञेयं वस्तुनो वस्तुसिद्धितः ॥ (२०)[2]
यथा तत् कारणं वस्तु तथैव तदकारणं ।
यदा तत् कारणं केन मतं नेष्टमकारणं ॥ (२१)
शस्त्रौषधाभिसंबंधा[4]च्चैत्रस्य व्रणरोहणे ।
असम्बद्धस्य किं स्थाणोः कारणत्वं न कल्प्यते ॥ (२२)
स्वभावभेदेन विना व्यापारोपि न युज्यते ।
नित्यस्याव्यतिरेकित्वात्सामर्थ्यञ्च दुरन्वयं ॥ (२३)
यस्य सत्त्वे[3] भवत्येव यत्तेभ्योन्यस्य (कल्प)णे[4] [5] ।
तद्धेतुत्वेन सर्वत्र हेतूनामनवस्थितिः[5] ॥ (२४)
स्वभावपरिणामेन हेतुरङ्कुरजन्मनि ।
भूम्यादिस्तस्य संस्कारे तद्विशेषस्य दर्शनात् ॥ (२५)
यथा[6] विशेषेण विना विषयेन्द्रियसंहतिः ।
15a बुद्धेर्हेतुस्तथेद[ञ्चेन्न तत्रा][6]पि विशेषतः ॥ (२६)
पृथक् पृथगशक्तानां स्वभावातिशयेऽसति[7] ।
संहतावप्यसामर्थ्यं स्यात्सिद्धोतिशयस्तदा[8] ॥ (२७)
तस्मात्पृथगशक्तेषु येषु संभाव्यते गुणः ।
संहतौ हेतुता तेषां नेश्वरादेरभेदतः ॥ (२८)

---

[1] VB. मूर्त्यादि ।
[2] गमनात्प्राणिमत्त्वाच्च गजः शृङ्गीति साधनम् ।
अस्य शब्दस्य वाच्यं हि प्रसिद्धचा युक्त्यसम्मतम् ॥

अधिकेयं कारिका भोटभाषायाम् ।

[3] PS. PVM. येषु सत्सु । [4] PS. कल्पने ।
[5] VB. येषु सत्सु ० स्य कल्पने । ० त्वेन हेतूनां सर्वेषामन० ।
[6] यदि—भो० भा० । [7] PS. VB. सन्तानातिशये सति ।
[8] PVM. VB. ० स्ततः ।

## २. भगवान् प्रमाणम्

(१) ज्ञानवत्त्वात्

प्रामाण्यञ्च परो[क्षा]र्थज्ञानं तत्साधनस्य च ।
(अभावान्नास्त्यनुष्ठान)[1]मिति केचित्प्रचक्षते ॥ (२९)
ज्ञानवान् मृश्यते[1] कश्चित्तदुक्तप्रतिपत्तये ।
अज्ञोपदेशकरणे विप्रलम्भनशङ्किभिः ॥ (३०)
तस्मादनुष्ठेयगतं ज्ञानमस्य विचार्यतां ।
कीटसंख्यापरिज्ञाने तस्य नाक्षोपि[2] युज्यते ॥ (३१)

(२) हेयोपादेयवेदकत्वात् न तु सर्ववेदकत्वात्

हेयोपादेयत[त्त्वस्य][2] साभ्युपायस्य वेदकः[3] ।
यः प्रमाणमसाविष्टो न तु सर्वस्य वेदकः ॥ (३२)
दूरं पश्यतु वा मा वा तत्त्वमिष्टन्तु पश्यतु ।
प्रमाणं दूरदर्शी चेदेहि गृध्रानुपास्महे[4] ॥ (३३)

(३) कारुणिकत्वात् भगवान् प्रमाणम्

क. जन्मान्तरसिद्धिः

साधनं करुणाभ्यासात् सा बुद्धेर्देहसंश्रयात् ।
असिद्धा[5]भ्या[3]स इति चेन्नाश्रयप्रतिषेधतः ॥ (३४)

(क) भूतचैतन्यमतनिरासः

प्राणापानेन्द्रियधियां देहादेव न केवलात् ।
[6]स्वजातिनिरपेक्षाणां जन्म जन्मपरिग्रहे ॥ (३५)
अतिप्रसंगाद् यद्[7] दृष्टं प्रतिसन्धानशक्तिमत् ।
किमासीत्तस्य यन्नास्ति पश्चाद्येन न सन्धिमत् ॥[4] (३६)
न स कश्चित्पृथिव्यादेरंशो यत्र न जन्तवः ।
संस्वेदजाद्या जायन्ते सर्व्वं बीजात्मकं ततः ॥ (३७)

---

[1] PVM. मृग्यते ।
[2] PS. PVM. VB. तस्य नः क्वोप; NR. (पृष्ठे ८३) ।
[3] VB. हान्युपायस्य वेदकः । [4] VB. चेदेत० ।
[5] PVM. असिद्धो० । [6] PVM. सजाति० । [7] PS. यद्य ।



तत् स्वजात्यनपेक्षाणामक्षादीनां समुद्भवे ।
परिणामो यथैकस्य स्यात्सर्व्वस्याविशेषतः ॥ (३८)

(ख) विज्ञानसिद्धिः

प्रत्येकमुपघा[ते पि] नेन्द्रिया[णां][5]मनोमतेः ।
उपघातोस्ति; भङ्गेस्यास्तेषां भङ्गश्च दृश्यते ॥ (३९)
तस्याः[1] स्थित्याश्रयो बुद्धेर्बुद्धिमेव समाश्रितः ।
कश्चिन्निमित्तमक्षाणां तस्मादक्षाणि बुद्धितः ॥ (४०)
यादृश्याक्षेपिका सासीत् पश्चादप्यस्तु तादृशी ।
15b [तज्ज्ञानै][6]रुपकार्यत्वादुक्तं कायाश्रितं मनः ॥(४१)
यद्यप्यक्षैर्विना बुद्धिर्न्न तान्यपि तया विना ।
तथाप्यन्योन्यहेतुत्वं ततोप्यन्योन्यहेतुके ॥(४२)
नाक्रमात् क्रमिणोऽभावो[2] नाप्यपेक्षाऽविशेषिणः ।
क्रमाद् भवन्ती धीः कायात् क्रमं तस्यापि शंसति ॥(४३)
प्रतिक्षणं न [पूर्वस्य][3][1]पूर्वः पूर्वः क्षणो भवेत् ।
तस्य हेतुरतो हेतुर्दृष्ट एवास्तु सर्व्वदा ॥(४४)
चित्तान्तरस्य सन्धाने को विरोधोन्त्यचेतसः ।
तद्वदप्यर्हतश्चित्तं[4] असन्धानं कुतो मतं ॥(४५)
असिद्धार्थः प्रमाणेन किं सिद्धान्तोनुगम्यते ।
हेतोर्वैकल्यतस्तस्मात्[5][2]किं तदेवात्र नोदितं ॥(४६)
तद्धीवद् ग्रहणप्राप्तेर्म्मनोज्ञानं न सेन्द्रियात् ।
ज्ञानोत्पादनसामर्थ्यभेदान्न सकलादपि ॥(४७)
अचेतनत्वान्नान्यस्माद्धेत्वभेदात्सहस्थितिः ।
अक्षवद्रूपरसवदर्थद्वारेण विक्रिया ॥[3](४८)
सत्तोपकारिणो यस्य नित्यं तदनुबन्धतः ।
स हेतुः सप्तमी तस्मादुत्पादादिति चोच्यते ॥(४९)
अस्तूपकारको वापि कदाचिच्चित्तसन्ततेः ।
वह्न्यादिवद् घटादीनां विनिवृत्तिर्न तावता ॥(५०)

---

[1] PS. तच्चेत् । PVM. तस्मात् । [2] PVM. भावो ।
[3] PS.PVM. ०मपूर्वस्य । [4] PS. तद्वाप्य० । [5] VB. PVM. ०तच्चेत् ।

अनिवृत्तिप्रसङ्गश्च[१] देहे तिष्ठति चे[त][4]सः ।
तद्भावभावाद्वश्यत्वात्प्राणापानौ ततो न तत् ॥(५१)
प्रेरणाकर्षणे वायोः प्रयत्नेन विना कुतः ।
निर्ह्रासातिशयापत्तिर्निर्ह्रासातिशयात्तयोः ॥(५२)
तुल्यः प्रसङ्गोपि तयोर्न तुल्यं चित्तकारणे ।
स्थित्यावेधक[मन्यच्च][5] यतः कारणमिष्यते ॥(५३)
न दोषैर्व्विगुणो देहो हेतुर्व्वर्त्यादिवद् यदि ।
मृते शमीकृते[२] दोषे पुनरुज्जीवनं भवेत् ॥ (५४)
निवृत्तेप्यनले काष्ठविकाराविनिवृत्तिवत् ।
तस्याऽनिवृत्तिरितिचेन्न चिकित्साप्रयोगतः ॥(५५)
[अ][6]पुनर्भावतः किंचिद्विकारजननं क्वचित् ।
किंचिद्विपर्ययादग्निर्यथा काष्ठसुवर्णयोः ॥ (५६)
आद्यस्याल्पोप्यसन्तापः[३] प्रत्यानेयस्तु यत्कृतः ।
विकारः स्यात्पुनर्भावः तस्य हेम्नि खरत्ववत् ॥ (५७)
16a दुर्ल्लभत्वात् समाधातुरसाध्यं किञ्चिदीरितं ।
आयुःक्षयाद्वा दोषे तु[४] केवले नास्त्यसाध्यता ॥ (५८)
मृते विषादिसंहारात्तद्दंशच्छेदतोपि वा ।
विकारहेतोर्व्विगमे स नोच्छ्वसिति किं पुनः ॥ (५९)
उपादानाविकारेण नोपादेयस्य विक्रिया ।
[कर्त्तुं शक्याऽविका][1]रेण मृदः कुण्डादिनो यथा ॥ (६०)
अविकृत्य हि यद्वस्तु यः पदार्थो विकार्यते ।
उपादानं न तत्तस्य युक्तं गोगवयादिवत् ॥ (६१)
चेतःशरीरयोरेवं तद्धेतोः कार्यजन्मनः ।
सहकारात् सहस्थानमग्निताम्रद्रवत्ववत् ॥ (६२)
अना[श्रयात्सद][2]सतोर्न्नाश्रयः स्थितिकारणं ।
सतश्चेदाश्रयो नास्याः स्थातुरव्यतिरेकतः ॥ (६३)

---

[१] PS. अप्रवृत्ति० ।　[२] PS.VB. समीकृते ।
[३] VB. ० स्यान्योप्यसंहार्यः । PVM. ०प्यसंहार्यः ।
[४] VB. ०दोषेण ।



व्यतिरेके तु[१] तद्धेतुस्तेन भावस्य किं कृतं ।
अविनाशप्रसङ्गः स नाशहेतोर्मतो यदि ॥ (६४)
तुल्यः प्रसङ्गस्तत्रापि; किम्पुनः स्थितिहेतुना ।
[अना[२]श][3]कागमात् स्थानं ततश्चेद्वस्तुधर्म्मता ॥ (६५)
नाशस्य; सत्यबाधोसाविति किं स्थितिहेतुना ।
यथा जलादेराधार इति चेत्तुल्यमत्र च ॥ (६६)
प्रतिक्षणविनाशे हि भावानां भावसन्ततेः ।
तथोत्पत्तेः सहेतुत्त्वादाश्रयोऽयुक्त[मन्य][4]था ॥ (६७)
स्यादाधारो जलादीनां गमनप्रतिबन्धतः ।
अगतीनां किमाधारैर्गुणसामान्यकर्म्मणां ॥ (६८)
एतेन समवायश्च समवायि च कारणं ।
व्यवस्थितत्वं जात्यादेर्न्निरस्तमनपाश्रयात् ॥ (६९)
परतो भावनाशश्चेत्तस्य किं स्थिति[हे]तुना ।[5]
स विनश्येद्विनाप्यन्यैर्न्न[३] शक्ताः स्थितिहेतवः ॥ (७०)
स्थितिमान्साश्रयः[४] सर्व्वः सर्व्वोत्पत्तौ च साश्रयः[५] ।
तस्मात् सर्व्वस्य भावस्य न विनाशः कथञ्चन[६] ॥ (७१)
16b स्वयं विनश्वरात्मा चेत् त[स्य][7] कः स्थापकः परः ।
[७]स्वयं न नश्वरात्मा चेत्तस्य कः स्थापकः परः ॥ (७२)
बुद्धिव्यापारभेदेन निर्ह्रासातिशयावपि ।
प्रज्ञादेर्भवतो देहनिर्ह्रासातिशयैर्विना[८] ॥ (७३)
इदं दीपप्रभादीनामाश्रितानां न विद्यते ।[1]
स्यात्ततोपि विशेषोस्य न चित्तेऽनुपकारिणि ॥ (७४)
रागादिवृद्धिः पुष्ट्यादेः [कदा]चित् सुखदुःखजा ।
तयोश्च धातुसाम्यादेरन्तरर्थस्य सन्निधेः ॥ (७५)
एतेन सन्निपातादेः स्मृतिभ्रंशादयो गताः ।
विकारयति धीरेव ह्यन्तरर्थविशेषजा ॥ (७६)

---

[१] VB.PVM. ०रेकेपि ।　[२] PVM. आनाश० ।
[३] PVM. ०न्यैरशक्ताः ।　[४] PS. स्थितिमत्सा० ; PVM. स्थिमान्नाश्र० ।
[५] PS. वसंश्रयः ।　[६] VB.PVM. कदाचन ।
[७] PS.VB. ।　[८] VB.PVM. ०यौ विना ।

शार्दूलशोणितादीनां सन्तानातिशये क्वचित्।
मोहादयः सम्भवन्ति श्रवणेक्षणतो यथा ॥ (७७)
तस्माद्य[1]स्यैव संस्कारं नियमेनानुवर्त्तते ।
तन्नान्तरीयकं चित्तमतश्चित्तसमाश्रितं ॥ (७८)
यथा श्रुतादिसंस्कारः कृताश्रयणचेतसि[2] ।
कालेन व्यज्यते [ऽ]भेदात् स्याद्देहेपि ततो [गुणः] ॥[3] (७९)

(ग) पूर्वजन्मपरिग्रहः

अनन्यसत्वनेयस्य[3] हीनस्थानपरिग्रहः।
आत्मस्नेहवतो दुःखसुखत्यागाप्तिवाञ्छया ॥ (८०)
दुःखे विपर्यासमतिः तृष्णा चाबन्धकारणं[4] ।
जन्मिनो यस्य ते न स्तो न स जन्माधिगच्छति ॥ (८१)
गत्यागती न [दृष्टे][4] चेदिन्द्रियाणामपाटवात् ।
अदृष्टिर्म्मन्दनेत्रस्य तनुधूमागतिर्यथा ॥ (८२)
तनुत्वान्मूर्त्तमपि तु किञ्चित् क्वचिदसक्तिमत्[5] ।
जलवत् सूतवद्धेम्नि नादृष्टेर्[6]सदेव वा ॥ (८३)

(अवयविनिरासः)

पाण्यादिकम्पे सर्व्वस्य [5]जन्मप्राप्तेर्विरोधिनः[7] ।
एकत्र[8] कर्मणोऽयोगात् स्यात् पृथक् सिद्धिरन्यथा ॥ (८४)
एकस्य चावृतौ सर्व्वस्यावृतिः स्यादनावृतौ ।
दृश्येत रक्ते चैकस्मिन् रागोऽरक्तस्य वाऽगतिः ॥ (८५)
नास्त्येक[6][समुदायोऽस्मा]दनेकत्त्वेपि पूर्व्ववत् ।
अविशेषादणुत्वाच्च न गतिश्चेन्न सिध्यति ॥ (८६)
अविशेषो, विशिष्टानामैन्द्रिय[9]त्वमतोऽनणुः ।
एतेनावरणादीनामभावश्च निराकृतः ॥ (८७)

---

[1] PVM. तस्मात् स्वस्यैव।
[2] PS. ० कृतश्चेतसि चेतसि । VB. ०कृतचेतसि चेतसि ।
[3] PS. अनन्यनेयस ० ।
[4] PS. VB. तृष्णा चाबन्ध ० ।
[5] PS. VB. ० शक्ति० ।
[6] PVM. नादृष्टेनासदेव।
[7] PS.VB. PVM. ० दिकम्पे सर्व्वस्य कम्पप्रा० ।
[8] PVM. एकस्मिन् ।
[9] VB. ० मिन्द्रियत्व ।



कथं वा सूत[1]हेमादिमिश्रं तम्रोपलादिकं[2] ।
दृश्य[म्; पृथगशक्तानामक्षादीनां गतिः][1]कथं ॥ (८८)
संयोगाच्चेत् समानोत्र प्रसङ्गो हेमसूत[1]योः ।
दृश्यः संयोग इति चेत् कुतोऽदृष्टाश्रये[3] गतिः ॥ (८९)
रसरूपादियोगश्च विरुद्ध[4] उपचारतः ।
इष्टश्चेद् बुद्धिभेदोस्तु पंक्तिर्दीर्घेति वा कथं ॥ (९०)
संख्यासं[योगकर्म्मा][2]देरपि तद्वत्स्वरूपतः ।
अभिलापाच्च[5] भेदेन रूपं बुद्धौ न भासते ॥ (९१)
शब्दज्ञाने विकल्पेन वस्तुभेदानुसारिणा ।
गुणादिष्विव कल्प्यार्थे नष्टाजातेषु वा यथा ॥ (९२)
मतो यद्युपचारोत्र स इष्टो यन्नि[बन्ध][3]नः ।
स एव सर्व्वभावेषु हेतुः किं नेष्यते तयोः ॥ (९३)
उपचारो न सर्व्वत्र यदि भिन्नविशेषणं ।
मुख्यमित्येव च कुतोऽभिन्नेऽभिन्नार्थतेति चेत् ॥ (९४)
अनर्थान्तरहेतुत्वेप्यपर्यायाः सितादिषु ।[4]
संख्यादियोगिनः शब्दास्तत्राप्यर्थान्तरं यदि ॥ (९५)
गुणद्रव्याविशेषः स्याद्भिन्नो व्यावृत्तिभेदतः ।
स्यादनर्थान्तरार्थत्वेप्यकर्माद्रव्यशब्दवत् ॥ (९६)
व्यतिरेकीव यच्चापि सूच्यते भाववाचिभिः ।
संख्यादि[5]तद्वतः शब्दैस्तद्धर्म्मान्तरभेदकं ॥ (९७)
श्रुतिस्तन्मात्रजिज्ञासोरनाक्षिप्ताखिलापरा[6] ।
भिन्नं धर्म्ममिवाचष्टे योगोऽङ्गुल्या इति क्वचित् ॥ (९८)
युक्ताङ्गुलीति सर्व्वेषां आक्षेपाद्धर्म्मिवाचिनो ।[6]
17b ख्यातैकार्थाभिधानेपि तथा विहितसंस्थितिः ॥ (९९)
रूपादिशक्तिभेदानामनाक्षेपेण वर्त्तते ।
तत्समानफला[ऽ]हेतुव्यवच्छेदे घटश्रुतिः ॥ (१००)

---

[1] PS. VB. सूत ।
[2] PS. VB. ० लादि वा ।
[3] PVM. ० ऽदृश्या० ।
[4] PVM. संयोग ।
[5] VB. ० लापार्थ ।
[6] VB. ० सोर्न वा क्षिप्ता ० ।

अतो न रूपं घट इत्येकाधिकरणा श्रुतिः ।
भेदश्चायमतो जातिसमुदायाभिधानयोः[१] ॥[1] (१०१)
रूपा[द]यो घटस्येति तत्सामान्योपसर्ज्जनाः ।)
तच्छक्तिभेदाः ख्याप्यन्ते वाच्योन्योपि दिशाऽनया ॥ (१०२)

(घ) विज्ञानं कारणम्

हेतुत्वे[२] च समस्तानामेकाङ्गविकलेपि न ।
प्रत्येकमपि सामर्थ्ये युगपद् बहुसम्भवः ॥ (१०३)
नानेकत्वस्य तुल्यत्वात्प्राणापानौ[2] नियामकौ ।
एकत्वेपि बहुव्यक्तिस्तद्धेतोर्न्नित्यसन्निधेः ॥ (१०४)
नानेकहेतुरिति चेन्नाविशेषात्क्रमादपि ।
नैकप्राणेप्यनेकार्थग्रहणान्नियमस्ततः ॥ (१०५)
एकयानेकविज्ञाने बुद्ध्या[३]स्तु सकृदेव तत् ।
अविरोधात् ; क्रमेणापि माभूत्तदविशेषतः ॥[3] (१०६)
बहवः क्षणिकाः प्राणा अस्वजातीयकालिकाः ।
तादृशामेव चित्तानां कल्प्यन्ते यदि कारणं ॥ (१०७)
क्रमवन्तः कथं ते स्युः[४] क्रमवद्धेतुना विना ।
पूर्व्वस्वजा[4]ति हेतुत्वे न स्यादाद्यस्य सम्भवः ॥ (१०८)
तद्धेतुस्तादृशो नास्ति सति वानेकता ध्रुवं ।
प्राणानां भिन्नदेशत्वात् सकृज्जन्मधियामतः ॥ (१०९)
यद्येककालिकोऽनेकोप्येकचैतन्यकारणं ।
एकस्यापि न [वैकल्ये] [5]स्यान्मन्दश्वसितादिषु ॥ (११०)
अथ हेतुर्यथाभावं ज्ञानेपि स्याद्विशिष्टता ।
न हि तत्तस्य कार्यं यद्यस्य भेदान्न भिद्यते ॥ (१११)
विज्ञानं शक्तिनियमादेकमेकस्य कारणं ।
अन्यार्थासक्तिविगुणे ज्ञाने नार्था[न्तर[५]ग्रहात् ॥][6] (११२)
18a शरीरात् सकृदुत्पन्ना धीः स्वजात्या नियम्यते ।
परतश्चेत् समर्थस्य देहस्य विरतिः कुतः ॥ (११३)

---

[१] PVM. भेदोयमीदृशो ०भिधायिनोः । [२] PVM. हेतुत्वं ।
[३] बुद्धया तु—भो० भा० । [४] VA. तेभ्यः । [५] PVM. ०राग्रहात् ।



(ङ) कर्मसिद्धिः

अनाश्रयान्निवृत्ते[१] स्याच्छरीरे चेतसः स्थितिः ।
केवलस्येति चेच्चित्तसन्तानं स्थितिकारणं ॥ (११४)
तद्धेतुवृत्तिलाभाय नाङ्गतां यदि गच्छति ।
[२]हेतुर्देहान्तरोत्पत्तौ[1] पञ्चायतनमैहिकं ॥ (११५)
तदङ्गभावहेतुत्वनिषेधेनुपलम्भनं ।
अनिश्चयकरं प्रोक्तं इन्द्रियाद्यपि शेषवत् ॥ (११६)
दृष्टा च शक्तिः पूर्व्वेषामिन्द्रियाणां स्वजातिषु ।
विकारदर्शनात्सिद्धं अपरापरजन्म च ॥ (११७)
शरीराद्यदि[2] तज्जन्म प्रसङ्गः पूर्व्ववद्भवेत् ।
चित्ताच्चेत्तत एवास्तु जन्म देहान्तरस्य च ॥ (११८)
तस्मान्न हेतुवैकल्यात् सर्व्वेषामन्त्यचेतसां ।
असन्धिरीदृशं तेन शेषवत् साधनं मतं ॥ (११९)

ख. युक्तः करुणाभ्यासः

अभ्यासेन विशेषेपि लङ्घनो[द][3]कतापवत् ।
स्वभावातिक्रमो माभूदिति चेदाहितः स चेत् ॥ (१२०)
पुनर्यत्नमपेक्षेत यदि स्याच्चास्थिराश्रयः ।
विशेषो नैव वर्द्धेत[३] स्वभावश्च न तादृशः ॥ (१२१)
तत्रोपयुक्तशक्तीनां विशेषानु[त्त][4]रान् प्रति ।
साधनानामसामर्थ्यान्नित्यश्चानाश्रयस्थितेः ॥ (१२२)
विशेषस्यास्वभावत्वाद् वृद्धावप्याहितो यदा[४] ।
नापेक्षयेत[५] पुनर्यत्नं यत्नोन्यः स्याद्विशेषकृत् ॥ (१२३)
काष्ठपारद[६]हेमा[दे][5]रग्न्यादेरिव चेतसि ।
अभ्यासजाः प्रवर्त्तन्ते स्वरसेन कृपादयः ॥ (१२४)
तस्मात् स चैषा[७]मुत्पन्नः स्वभावो जायते गुणः ।
तदुत्तरोत्तरो यत्नो विशेषस्य विधायकः ॥ (१२५)

---

[१] PS. अनाश्रयश्रयन्न । [२] PS. तेन देहान्तरप्राप्तौ ।
[३] VA. वर्तेत । [४] PS. यदि ।
[५] VA. PVM. नापेक्षेत । [६] VA. ० पारत० ।
[७] PS. PVM. VA. तेषा० ।

18b यस्माच्च तुल्यजा[ती][6]यपूर्वबीजप्रवृद्धयः ।
कृपादिबुद्धयस्तासां सत्य[ा]भ्या[१]से कुतः स्थितिः ॥ (१२६)
न चैवं लङ्घनादेव लङ्घनं बलयत्नयोः ।
तद्धेत्वोः स्थितशक्तित्वाल्लङ्घनस्य स्थितात्मता ॥ (१२७)
तस्यादौ देहवैगुण्यात् पश्चाद्व[द][1]विलङ्घनं ।
शनैर्यत्नेन वैगुण्ये निरस्ते स्वबले स्थितिः ॥ (१२८)
कृपा स्वबीजप्रभवा स्वबीजप्रभवैर्न्न चेत् ।
विपक्षैर्ब्बाध्यते चित्ते प्रयात्यत्यन्तसात्मतां[२] ॥ (१२९)
तथा हि मूलमभ्यासः पूर्व्वः पूर्व्वः परस्य[2] तु ।
कृपावैराग्यबोधादेश्चित्तधर्म्मस्य पाटवे । (१३०)
कृपात्मकत्वमभ्यासाद् घृणा वैराग्यरागवत्[३] ॥
[निष्पन्नकरुणोत्कर्षपरदुःखक्षमेरितः ॥१३१]

(४) शास्तृत्वाद् भगवान् प्रमाणम्

(शास्तृत्वव्याख्यानम्)

दयावान् दुःखहानार्थमुपायेष्वभियुज्यते ।
परोक्षोपेयतद्धेतोस्तदाख्यानं हि दुष्करं ॥ (१३२)
युक्त्यागमा[3]भ्याम्विमृशन् दुःखहेतुम्परीक्षते ।
तस्यानित्यादिरूपं च दु(ः)खस्यैव विशेषणैः ॥(१३३)
यतस्तथा स्थिते हेतौ निवृत्तिर्न्नेति पश्यति ।
फलस्य हेतोर्हानार्थं तद्विपक्षं परीक्षते ॥ (१३४)
साध्यते तद्विपक्षो हि [4]हेतो रूपावबोधतः ।
आत्मात्मीयग्रहकृतः स्नेहः संस्कारगोचरः ।(१३५)
हेतुर्व्विरोधि नैरात्म्यदर्शनं तस्य बाधकं ।
बहुशो बहुधोपायं कालेन बहुनास्य[४] च ॥ (१३६)
[गच्छन्त्यभ्यस्यतस्तत्र][5] गुणदोषाः प्रकाशतां ।
बुद्धेश्च पाटवाद्धेतोर्व्वासनातः प्रहीयते ॥ (१३७)
परार्थवृत्तेः खङ्गादेर्व्विशेषोयं महामुनेः ।
उपायाभ्यास एवायं तादर्थ्याच्छासनं मतं ॥ (१३८)

---

[१] PVM. सत्यभ्यासे । [२] प्रयाति तदात्मताम्—भो० भा० ।
[३] PS. वैराग्यराग्य० । [४] PS. बहुवा० ।



19a [निष्पत्तेः[6] प्रथमम्भावा]द्धेतुरुक्तमिदं द्वयं ।

(५) सुगतत्वात् भगवान् प्रमाणम्

हेतोः प्रहाणं त्रिगुणं सुगतत्त्वमनिश्रयात् ॥ (१३९)
दुःखस्य शस्तन्नैरात्म्यदृष्टेश्च[१] युक्तितोपि वा ।
पुनरावृत्तिरित्युक्तौ जन्मदोषसमुद्भवौ ॥ (१४०)
आत्मदर्शनबीजस्य हानादपुनरागमः ।
तद्भूतभिन्नात्म[तयाऽशेषमक्लेश][1]संक्रमः[२] ॥ (१४१)
कायवाग्बुद्धिवैगुण्यं मार्गोक्त्यपटुतापि वा ।
अशेषहानमभ्यासादुक्त्यादेर्दोषसंक्षयः ॥ (१४२)
नेत्येके व्यतिरेकोस्य संदिग्धो[३] व्यभिचार्यतः ।
अक्षयित्वं च दोषाणां नित्यत्वादनुपायतः ॥ (१४३)
[2][उपायस]्यापरिज्ञानादपि वा परिकल्पयेत् ।
हेतुमत्वाद्विरुद्धस्य[४] हेतोरभ्यासतः क्षयात् । (१४४)
हेतुस्वभावज्ञानेन तज्ज्ञानमपि साध्यते ॥०॥

(६) तायित्वात् भगवान् प्रमाणम्

तायः स्वदृष्टमार्ग्गोक्तिर्वैफल्याद्वक्ति नानृतं ॥ (१४५)
दयालुत्वात्परार्थञ्च सर्व्वारम्भ[ाभि][3]योगतः ।

क. तायः चतुःसत्यप्रकाशनम्

तस्मात्[५] प्रमाणं तायो वा चतुःसत्यप्रकाशनं ॥ (१४६)

ख. चत्वारि आर्यसत्यानि

(क) दुःखसत्यम्

a. संसारिणः स्कंधा दुःखम्

दुःखं संसारिणः स्कन्धा रागादेः पाटवेक्षणात् ।
अभ्यासान्न यदृच्छातोऽहेतोर्जन्मविरोधतः ॥ (१४७)

b. रागादीनां वातादिदोषजत्वनिरासः

व्यभिचारान्न वातादिधर्म्मः प्रकृतिसंकरात् ।[4]
अदोषश्च तदन्योपि धर्म्मः किं तस्य नेष्यते ॥ (१४८)

---

[१] PS.VA. स्तद् । [२] PS.VA. निर्जरं । PVM. ०निर्ज्वरं ।
[३] VA. संदिग्धा । [४] VA. विपक्षस्य । [५] VA. ततः ।

न सर्व्वधर्म्मः सर्वेषां समरागप्रसङ्गतः ।
रूपादिवददोषश्चेत्तुल्यं तत्रापि चोदनं ॥ (१४९)
आधिपत्यं विशिष्टानां यदि तत्र न कर्म्मणां ।
विशेषेपि च दोषाणा[मवि][5]शेषादसिद्धता ॥ (१५०)
न विकाराद्विकारेण सर्व्वेषां न च सर्व्वजाः ।
कारणे वर्द्धमाने च कार्यहानिर्न्न युज्यते ॥ (१५१)
तापादिष्विव रागादेर्व्विकारोपि सुखादिजः ।
वैषम्यजेन दुःखेन रागस्यानुद्भवो यदि ॥ (१५२)
19b वाच्यं केन( ोद्भवः[6] साम्या[1]न्मदवृद्धिः[?]स्मरस्ततः ।
रागी विषमदोषोपि दृष्टः साम्येपि नापरः ॥ (१५३)
त्वयादनिच्छतो[2]प्यन्ये नैकस्त्रोनियतो[3] मदः ।
तेनैकस्यां न हीच्छुः[4] स्यात् अङ्गरूपाद्यपीति चेत् ॥ (१५४)
न सर्व्वेषामनेकान्तान्न चाप्यनियतो भवेत् ।
अगुणग्राहिणो[पि][1] स्यादङ्गं सोपि गुणग्रहः ॥ (१५५)
यदि सर्व्वो गुणग्राही स्याद्धेतोरविशेषतः ।
यदवस्थो मतो रागी न द्वेषी स्याच्च तादृशः ॥ (१५६)
तयोरसमरूपत्वान्नियमश्चात्र नेष्यते ।
न[5]जातिवासनाभेदप्रतिबद्धप्रवृत्तयः ॥ (१५७)
यस्य रागादयस्तस्य नैते [12]दोषाः प्रसङ्गिनः ।

c. रागादीनां भूतधर्मत्वनिरासः

एतेन भूतधर्म्मत्वं निषिद्धं, निश्रयस्य च ॥ (१५८)
निषेधान्न पृथिव्यादिनिश्रिता धवलादयः ।
तदुपादाय शब्दश्च हेत्वर्थः[6] स्वाश्रयेण च ॥ (१५९)
अविनिर्भागवर्त्तित्वाद्रूपादेराश्रयेपि वा[7] ।
मदादिशक्तेरिव चेद्विनि[8]र्भागो न वस्तुनः ॥ (१६०)

[1] PS. स स्या० । [2] PS. VA. ०दसूक्ष्मतो ।
[3] PS. ०स्त्रीनियमो । [4] PS. VA. PVM. तीव्रः ।
[5] VA. स्व; PVM. स. । [6] PS. हेतुतः ।
[7] VA. त्वादाश्रयोऽयुक्तमन्यथा । PVM. ०राश्रयो० ।



शक्तिरर्थान्तरं वस्तु नश्येन्नाश्रितमाश्रये ।
तिष्ठत्यविकले याति तत्तुल्यञ्चेन्न भेदतः ॥ (१६१)
भूतचेतनयोर्भिन्नप्रतिभासावि[1]बोधतः ।
अ[2]विकारश्च कायस्य तुल्यरूपं भवेन्मनः ॥ (१६२)
रूपादिव[4]द्विकल्पस्य कैवाथ परतन्त्रता ।
अनपेक्ष्य यदा कायं वासनाबोधकारणं ॥ (१६३)
ज्ञानं स्यात्कस्यचित्किञ्चित्कुतश्चि[3]त्तेन किञ्चन ।
अविज्ञानस्य विज्ञानानुपादानाच्च सिद्ध्यति ॥ (१६४)
विज्ञानशक्तिसम्बन्धादिष्टञ्चेत्सर्व[5][व]स्तुनः ।
एतच्छ्रां[? त्सां]ख्यपशोः कोन्यः सलज्जो वक्तुमोहते ॥ (१६५)
अदृष्टपूर्वमस्तीति तृणाग्रे करिणां शतं ।[4]
यद्रूपं दृश्यतां यातं तद्रूपं प्राङ् न दृश्यते ॥ (१६६)
शतधा विप्रकीर्णेपि हेतौ तद्विद्यते कथं ।
[रागाद्यनिय][6]मोऽपूर्वप्रादुर्भावे प्रसज्यते ॥ (१६७)
भूतार्थता[5]ऽनतिक्रान्ते[:]सर्व्वो रागादिमान् यदि ।
सर्व्वः समानरागः स्याद् भूतातिशयतो न चेत् ॥ (१६८)
भूतानां प्राणितो[6] भेदेप्ययं भेदो यदाश्रयः ।
20a तन्निर्ह्रास[ातिशयवत्तद्भावात्] [7]तानि ह्रापयेत् ॥ (१६९)
न चेद्भेदेपि रागादिहेतुतुल्यात्मताश्रयः ।
सर्व्वत्र रागः सदृशः स्याद्धेतोस्सदृशात्मनः[9] ॥ (१७०)
न हि गोप्रत्ययस्यास्ति समानात्मभुवः क्वचित् ।
तारतम्यं पृथिव्यादौ प्राणितादेरिहापि वा ॥ (१७१)
औष्ण्यस्य तारतम्येपि नानुष्णोग्निः क[दाचन] ।
(तथेहापी)[1]ति चेन्नाग्नेरौष्ण्याद् भेदनिषेधतः ॥ (१७२)
तारतम्यानुभविनो यस्यान्यस्य सतो गुणाः ।
ते क्वचित्प्रतिहन्यन्ते तद्भेदे धवलादिवत् ॥ (१७३)

[1] PVM. ०वबोधतः । [2] PVM. आविकारञ्च ।
[3] VA. कदाचि० । [4] VN. टीकायां पृ० ४२ (१२) ।
[5] PVM. भूतात्मता० । [6] PVM. प्राणिताऽभेदे ।
[9] PS. स्याद् भावात्सद ० ।

रूपादिवन्न नियमस्तेषां भूताविभागतः।
तत्तुल्यञ्चेन्न रागादेः सहोत्पत्तिप्रस[ङ्गतः] ॥[2] (१७४)
विकल्प[१]विषयत्वाच्च विषया न नियामकाः।
सभागहेतुविरहाद्रागादेर्न्नियमो न वा। (१७५)
सर्व्वदा सर्व्वबुद्धीनां जन्म वा हेतुसन्निधेः।

d. चतुराकारं दुःखसत्यम्

कदाचिदुपलम्भात्तदध्रुवं दोषसंश्रयात्[२] ॥ (१७६)
दुःखं हेतुवशत्वाच्च न चात्मा ना[प्यधिष्ठितं]।[3]
नाकारणमधिष्ठाता नित्यं वा कारणं[३] कथं ॥ (१७७)
तस्मादनेकमेकस्माद्भिन्नकालं न जायते।
कार्यानुत्पादतोन्येषु सङ्गतेष्वपि हेतुषु ॥ (१७८)
हेत्वन्तरानुमानं स्यान्नैतन्नित्येषु विद्यते।

(ख) समुदयसत्यम्

a. चतुराकारः समुदयः

कादाचित्कतया [सिद्धा][4] दुःखस्यास्य सहेतुता ॥ (१७९)
नित्यं सत्वमसत्वं वा हेतोर[४]न्यानपेक्षणात्।
तैक्ष्ण्यादीनां यथा नास्ति कारणं कण्टकादिषु ॥ (१८०)
तथाऽकारणमेतत्स्यादिति केचित्प्रचक्षते।
सत्येव यस्मिन् यज्जन्म विकारे चापि[५] विक्रि[या] ॥[5] (१८१)
तत्तस्य कारणं प्राहुस्तत्तेषामपि विद्यते।
स्पर्शस्य रूपहेतुत्वाद्दर्शनेस्ति निमित्तता ॥ (१८२)
नित्यानां प्रतिषेधेन नेश्वरादेश्च सम्भवः।
असामर्थ्यादतो हेतुर्भववाञ्छापरिग्रहः ॥ (१८३)
20b य[६]स्म[द्देशवि]शेषस्य तत्प्राप्त्याशाकृतो नृणां।
सा भवेच्छाप्त्यनाप्तीच्छोः प्रवृत्तिः सुखदुःखयोः ॥ (१८४)
यतोपि प्राणिनः कामविभवेच्छे च ते मते।
सर्वत्र चात्मस्नेहस्य हेतुत्वात्संप्रवर्तते[७] ॥ (१८५)

---

[१] PVM. विकल्प्य।
[२] PVM. VA. निश्रयात्।
[३] VA. जनकः—भो० भा० च।
[४] PVM. हेतोर्बाह्यानपेक्षणात्।
[५] PS. PVM. वापि।
[६] VA. अस्मा।
[७] PS. वर्त्तने।



असुखे सुखसंज्ञस्य तस्मात्तृष्णा भव[াश्रयः]।[1]
विरक्तजन्मादृष्टेरित्याचार्याः संप्रचक्षते ॥ (१८६)
अदेहरागादृष्टेश्च देहाद्रागसमुद्भवः।
निमित्तोपगमादिष्टमुपादानं तु वार्यते ॥ (१८७)
इमान्तु[१] युक्तिमन्विच्छन्बाधते स्वमतं स्वयं।
जन्मना सहभावश्चेत्तद्युजो[2][२] रागदर्शनात् ॥ (१८८)
सभागजातेः प्राक् सिद्धिः कारणत्वेपि नोदितं।

b. तृष्णाकर्मणी जन्मसमुदयः

अज्ञानमुक्ता तृष्णैव संतानप्रेरणाद्भवे ॥ (१८९)
आनन्तर्याच्च[३] कर्मापि सति तस्मिन्नसंभवात्।

(ग) निरोधसत्यम्

तदनात्यन्तिकं हेतोः प्रतिबन्धादिसंभवात् ॥[3] (१९०)

a. संसार्यभावे मुक्तिव्यवस्था

संसारित्वादनिर्म्मोक्षो नेष्टत्वादप्रसिद्धितः।
यावच्चात्मनि[४] न प्रेम्णो हानिः स परितृष्यति[५] ॥ (१९१)
तावद्दुःखितमारोप्य न च स्वस्थोवतिष्ठते।
मिथ्याध्यारोपहानार्थं यत्नोसत्यपि मोक्तरि ॥[4] (१९२)

b. मुक्तानां संसारे स्थितिः

[अवस्था वी]तरागाणां दयया कर्मणापि वा।
आक्षिप्ते[ऽ]विनिवृत्तीष्टेः सहकारिक्षयादलं ॥ (१९३)
नाक्षेप्तुमपरं कर्म भवतृष्णाविलङ्घिनां।
दुःखज्ञानेऽविरुद्धस्य पूर्व्वसंस्कारवाहिनी ॥ (१९४)
वस्तुधर्म्मदयोत्पत्तिर्न सा सत्वानुरोधिनी।
[आत्मा][5]न्तरसमारोपाद्रागो धर्मेऽतदात्मके ॥ (१९५)
दुःखसन्तानसंस्पर्शमात्रेणैव दयोदयः।
मोहश्च मूलं दोषाणां स च सत्वग्रहो विना[६] ॥ (१९६)

---

[१] नास्ति भोटभाषान्तरे कारिकेयम्।
[२] PS. PVM. VA. जातानां।
[३] VA. ०न्तर्यात् न।
[४] VA. यावदात्मनि।
[५] PVM. परितस्यति।
[६] PH. धिया।

तेनाद्यहेतौ न द्वेषो न दोषोऽतः कृपा मता ।
21a नामुक्तिः पूर्व[संस्कारक्षयेऽ][६]न्याप्रतिसन्धितः ॥ (१९७)
अक्षीणशक्तिः संस्कारो येषां तिष्ठन्ति तेऽनघाः ।
मन्दत्वात् करुणायाश्च न यत्नः स्थापने महान् ॥ (१९८)
तिष्ठन्त्येव पराधीना येषां तु महती कृपा ।

c. सत्कायदृष्टेर्विगमः

सत्कायदृष्टेर्विगमादाद्य एवाभवो भवेत् ॥ (१९९)
मार्गे चेत्सहजाहाने[र्न हानौ वा भवः कुतः][1] ।
सुखी भवेयं दुःखी वा मा भूवमिति तृष्यतः ॥ (२००)
यैवाहमिति धीः सैव सहजं सत्त्वदर्शनं ।
न स[१] पश्यन्नहमिति स्नि[२]ह्यत्यात्मनि कश्चन ॥ (२०१)
न चात्मनि विना प्रेम्णा सुखकामोभिधावति ।

d. बन्धमोक्षव्यवस्था

दुःखो[३]त्पादस्य हेतुत्वं [बन्धो नित्त्यस्य][2]तत्कुतः ॥ (२०२)
अदुःखोत्पादहेतु[४]त्वे मोक्षो नित्यस्य तत्कुतः ।
अनित्यत्त्वेन योऽवाच्यः स हेतुर्न्न हि कस्यचित् ॥ (२०३)
बन्धमोक्षाववाच्येपि न युज्येते[५] कथञ्चन ।
नित्यं तमाहुर्व्विद्वांसो यत्स्वभावो[६] न नश्यति ॥ (२०४)
त्यक्त्वेमां क्लेश([७]नीं)[दृष्टिम][3]तो [ऽ] नित्यः स उच्यतां[८] ।

(घ) मार्गसत्यम् ( चतुराकारम् )

उक्तो मार्गस्तदभ्यासादाश्रयः परिवर्तते ॥ (२०५)
साम्येपि दोषभावश्चेन्मार्गवन्नाविभुत्वतः ।

ग. सत्कायदृष्टिः

विषयग्रहणं धर्म्मो विज्ञानस्य यथास्ति सः ॥ (२०६)

[१] PVM. न ह्यपश्य० । [२] PVM. कश्चिदात्मनि स्निह्यति ।
[३] PVM. दुःखस्योत्पादहेतुत्वं । [४] PVM. ०हेतुत्वं ।
[५] VA. न विद्येते । [६] VA. PVM. यः स्वभावो ।
[७] PVM. क्लेपणीं दृष्टिं–भो० भा० च । [८] VA. कथ्यतां ।



गृह्यते सोऽस्य जनको विद्यमानात्मनेति च ।
[एषा प्रकृ][4]तिरस्यास्तन्निमित्तान्तरतः स्खलत् ॥ (२०७)
व्यावृत्तौ प्रत्ययापेक्षमदृढं सर्प्पबुद्धिवत् ।
प्रभास्वरमिदञ्चित्तं प्रकृत्यागन्तवो मलाः[१] ॥ (२०८)
तत्प्रागप्यसमर्थानां पश्चाच्छक्तिः क्व तन्मये ।
नालं प्ररोढुमत्यन्तं स्यन्दि[न्यामग्निव][5]द्भुवि ॥ (२०९)
बाधकोत्पत्तिसामर्थ्यगर्भे शक्तोपि वस्तुनि ।
निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः ॥(२१०)
न बाधा यत्नवत्त्वेपि बुद्धेः तत्पक्षपाततः ।
आत्मग्रहैकयोनित्वात् कार्यकारणभाव[तः ॥ (२११)
21b रागप्रतिघ][6]योर्व्बाधा भेदेपि न परस्परं ।
मोहाविरोधान्मैत्र्यादेर्न्नात्यन्तं दोषनिग्रहः ॥ (२१२)
तन्मूलाश्च मलाः सर्व्वे स च सत्कायदर्शनं ।
विद्यायाः प्रतिपक्षत्वाच्चैत्तत्वेनोपलब्धितः ॥ (२१३)
मिथ्योपलब्धिरज्ञानं[२] युक्तैश्चान्यदयुक्तिमत् ।
[व्याख्येयो[1]त्र] विरोधो यस्तद्विरोधाच्च तन्मयैः ॥ (२१४)
विरोधः शून्यतादृष्टेः सर्व्वदोषैः प्रसिद्ध्यति ।
नाक्षयः प्राणिधर्म्मत्वाद्रूपादिवदसिद्धितः ॥ (२१५)
सम्बन्धे प्रतिपक्षस्य त्यागसन्दर्शनादपि[३] ।
न काठिन्यवदुत्पत्तिः पुनर्द्दोषविरोधिनः ॥[2] (२१६)
सात्मत्वेनानपायत्वात् अनेकान्ताच्च भस्मवत् ।

[ इत्यन्तरश्लोकौ ]

यः पश्यत्यात्मानं तत्रास्याहमिति[४] शाश्वतः स्नेहः ॥(२१७)
स्नेहात्सुखेषु तृष्यति तृष्णा दोषांस्तिरस्कुरुते[५] ।
गुणदर्शी परितृष्यन् ममेति तत्साधनान्युपादत्ते ॥ (२१८)
[तेना][3]त्माभिनिवेशो यावत्तावत्स संसारे ।
आत्मनि सति परसंज्ञा स्वपरविभागात्परिग्रहद्वेषौ ॥ (२१९)

[१] संयुत्तनिकाये, अभिधर्मकोषे च । [२] ० रयुक्त—भो० भा० ।
[३] VA. सं(सर्ज)नादपि; PVM. ०त्यागस्यादर्शन० ।
[४] PS. ०मानं तस्याहमिति । [५] VA. स्थिरीकुरुते ।

अनयोः संप्रतिबद्धाः सर्व्वे दोषाः प्रजायन्ते ।
नियमेनात्मनि स्निह्यंस्तदीये न विरज्यते ॥ (२२०)
न चास्त्यात्मनि [निर्दोषे][4] स्नेहापगमकार[1]णम् ।

(मार्गभावना)

स्नेहः सदोष इति चेत्ततः किं तस्य वर्ज्जनं ॥ (२२१)
अदूषितेऽस्य विषये न शक्यं तस्य वर्ज्जनं ।
प्रहाणिरिच्छाद्वेषादेर्गुणदोषानुबन्धिनः ॥ (२२२)
तस्य न दृष्टिर्विषये न तु पश्चिमशीलिभिः[2] ।[5]
न हि स्नेहगुणात्स्नेहः किन्त्वर्थगुणदर्शनात् ॥ (२२३)
कारणेऽविकले तस्मिन्कार्यं केन निवार्यते ।

[इति संग्रहः ॥]

का वा सदोषता दृष्टा स्नेहे दुःखसमाश्रयः ॥(२२४)
तथापि न विरागोत्र [3]स्वत्वदृष्टेर्यथात्मनि ।
22a [न तैर्विना दुःखहेतुः][6]भावश्चेत्तेपि[4] तादृशाः ॥ (२२५)
निर्दोषं द्वयमप्येवं वैराग्यान्न द्वयोस्ततः ।
दुःखभावनया स्याच्चेदहिदष्टाङ्गहानिवत् ॥ (२२६)
आत्मीयबुद्धिहान्यात्र त्यागो न तु विपर्यये ।
उपभोगाश्रयत्वेन गृहीतेष्विन्द्रियादिषु ॥ (२२७)
स्वत्त्वधीः केन वा[र्यते वैराग्यं तत्र तत्कुतः ।][1]
प्रत्यक्षमेव सर्व्वस्य केशादिषु कलेवरात् ॥ (२२८)
च्युतेषु सघृणा बुद्धिर्जनस्यान्येषु[5] सस्पृहा ।
समवायादिसम्बन्धजनिता तत्र हि स्वधीः ॥ (२२९)
स तथैवेति सा दोषदृष्टावपि न हीयते ।
समवायाद्यभावेपि स[र्वत्रास्त्युपकारिता] ॥[2] (२३०)

---

[1] PVM. नैतच्छ्लोकार्द्धं विवृतं वृत्तिकृता ।
[2] PS. VA.; PVM. तयोरदृष्टिर्विषये न तु बाह्येषु यः क्रमः ।
[3] आत्मदृष्टे—भो० भा० । [4] PS. VA., PVM. हेतुरात्मा चेत्तेपि ।
[5] PVM. जायतेन्येषु ।



दुःखोपकारान्न भवे[1]दङ्गुल्यामिव चेत्स्वधीः ।
न ह्येकान्तेन तद् दुःखं भूयसा[2] सविषान्नवत् ॥ (२३१)
विशिष्टसुखसङ्गा[3]त्स्यात्तद्विरुद्धे विरागिता ।
किञ्चित्परित्यजेत्सौख्यं विशिष्टसुखतृष्णया ॥ (२३२)
[नैरात्म्ये तु][3] यथालाभमात्मस्नेहात्प्रवर्त्तते ।
अलाभे मत्तकाशिन्या[4] दृष्टा तिर्यक्षु कामिता ॥ (२३३)
यस्यात्मा वल्लभस्तस्य स नाशं कथमिच्छति ।
निवृत्तसर्व्वानुभवव्यवहारगुणाश्रयं ॥ (२३४)
इच्छेत्प्रेम कथं प्रेम्णः प्रकृतिश्च(न)[5] [तादृशी][4] ।
सर्व्वथात्मग्रहः स्नेहमात्मनि द्रढयत्यलं ॥ (२३५)
आत्मीयस्नेहबीजन्तु[6] तदवस्थं व्यवस्थितं ।
यत्नेप्यात्मीयवैराग्यं गुणलेशसमाश्रयात ॥ (२३६)
वृत्तिमान्प्रतिबध्नाति तद्दोषान्संवृणोति च ।
आत्मन्यपि विरागश्चेत्[7] [ने][5]दानीं यो विरज्यते ॥ (२३७)
त्यजत्यसौ यथात्मानं व्यर्थातो दुःखभावना ।
दुःखभावनयाप्येष दुःखमेव विभावयेत् ॥ (२३८)
प्रत्यक्षं पूर्व्वमपि तत्तथापि न विरागवान् ।
यद्यप्येकत्र[8] दोषेण तत्क्षणं चलिता मतिः ॥[6] (२३९)
22b विरक्तो नैव तत्रापि कामीव वनितान्तरे ।
त्याज्योपादेयभेदे हि सक्तिर्यैवैकभाविनी ॥ (२४०)
सा बीजं सर्व्वसक्तीनां पर्यायेण समुद्भवे ।
निर्दोषविषयः स्नेहो निर्दोषः साधनानि च ॥ (२४१)
एतावदेव च जगत् क्वेदानीं स विरज्यते ।[1]
सदोषतापि चेत्तस्य तत्रात्मन्यपि सा समा ॥ (२४२)
तत्राविरक्तस्तद्दोषे क्वेदानीं स विरज्यते ।
गुणदर्शनसम्भूतं स्नेहं बाधे[9]त दोषदृक ॥ (२४३)

---

[1] दुःखजननान्न—भो० भा० । [2] PS. भूयसां ।
[3] विशिष्टसुखरागात्—भो० भा० । [4] PVM. ० कासिन्या ।
[5] PS.VA. प्रकृतिर्न हि । [6] VA. ० न्तत् । [7] PVM. ०चेदिदानीं ।
[8] तत्र यद्यपि—भो० भा० । [9] PVM. बाधितदोष०

स चेन्द्रियादौ नत्वेवं बालादेरपि सम्भवात्[1] ।
दोषवत्यपि सद्भावा[त्स्वभावा]द् गुणवत्यपि ॥ (२४४)
[अन्यत्रा][2]त्मीयतायां वा व्यतीतादौ विहानितः ।
तत एव च नात्मीयबुद्धेरपि गुणेक्षणम् ॥ (२४५)
कारणं हीयते सापि तस्मान्नागुणदर्शनात् ।
अपि चासद्गुणारोपः स्नेहात्तत्र हि दृश्यते ॥ (२४६)
तस्मात्तत्कारणा वा धी विधिस्तं[2] बाधते कथं ।[3]
[3]वरापरप्रार्थनतो विनाशोत्पादबुद्धितः ॥ (२४७)
इन्द्रियादेः पृथग्भूतमात्मानं वेत्ययं जनः ।
तस्मान्नैकत्वदृष्ट्यापि स्नेहः स्निह्यन्स आत्मनि ॥ (२४८)
उपलम्भान्तरङ्गेषु प्रकृत्यैवानुरज्यते ।
प्रत्युत्प[न्नात्तु यो][4]दुःखान्निर्व्वेदो द्वेष ईदृशः । (२४९)
न वैराग्यं तदाप्यस्ति[4] स्नेहोवस्थान्तरैषणात् ।
द्वेषस्य दुःखयोनित्वात्स तावन्मात्रसंस्थितिः ॥ (२५०)
तस्मिन्निवृत्ते प्रकृतिं स्वामेव भजते पुनः ।
औदासीन्यं [तु सर्व्वत्र हा[5]][5]नोपादानहानितः ॥ (२५१)
वासी चन्दन[6]कल्पानां वैराग्यं नाम कथ्यते ।
संस्कारदुःखतां मत्वा कथिता दुःखभावना ॥ (२५२)
सा च नः प्रत्ययोत्पत्तिः सा नैरात्म्यदृगाश्रयः ।
23a मुक्तिस्तु शून्यतादृ[ष्टेस्तदर्थाः शेष][6]भावनाः ॥ (२५३)
अनित्यात्[7] प्राह तेनैव दुःखं[8] दुःखादना[9]त्मतां ।
अविरक्तश्च तृष्णावान् सर्व्वारंभसमाश्रितः[10] ॥ (२५४)
सोऽमुक्तः[11]क्लेशकर्म्मभ्यां संसारी नाम तादृशः ।
आत्मीयमेव यो नेच्छेद्भोक्ताप्यस्य न विद्यते ॥ (२५५)
आत्मापि न तदा तस्य क्रियाभोगौ हि ल[क्षणं ।
तस्मादनादि][1]सन्तानतुल्यजातीयबीजिकां ॥ (२५६)

[1] VA. दर्शनात् । [2] VA. विशिष्टं । [3] PS.; PVM. परापर० ।
[4] VA. ०प्यस्य । [5] PVM.त्यागो० । [6] VA. वासीवदन० ।
[7] PS. अनित्यान् । [8] VA. इत्थं । [9] PVM. दुःखान्निरात्मताम् ।
[10] PS. समाश्रयः । [11] VA. सो युक्तः ।



उत्खातमूलां कुरुत सत्वदृष्टिं मुमुक्षवः ।

घ. आगममात्रेण न मुक्तिः

आगमस्य तथाभावनिबन्धनमपश्यतां ॥ (२५७)
मुक्तिमागममात्रेण वदन्न[1]परितोषकृत् ।

(क) दीक्षाऽकिञ्चित्करी

नालं बीजादिसंसिद्धो विधिः पुंसामजन्मने ॥ (२५८)
तैल[भ्यङ्गाग्निदा][2]हादेरपि मुक्तिप्रसङ्गतः ।

a. आत्मनोऽमूर्त्तत्वे न पापगौरवलाघवम्

प्राग्गुरोर्लाघवात्पश्चान्न पापहरणं कृतं ॥ (२५९)
मा भूद्गौरवमेवास्य न पापं गुर्व्वमूर्त्ततः[2] ।
मिथ्याज्ञानतदुद्भूततर्षसञ्चेतनावशात् ॥ (२६०)
हीनस्थानगतिर्जन्म तेन[3] तच्छिन्न जायते ।
तयो[रेव हि][3] सामर्थ्ये जातौ तन्मात्रभावतः ॥ (२६१)
ते चेतने स्वयं कर्म्मेत्यखण्डं जन्मकारणं ।
गतिप्रतीत्योः करणान्याश्रयस्तान्यदृष्टतः ॥ (२६२)
अदृष्टनाशादगतिस्तत्संस्कारो[4] न चेतना ।
सामर्थ्ये करणोत्पत्तेर्भावाभावानुवृत्तितः ॥[4] (२६३)
दृष्टं बुद्धेर्न्न चान्यस्य सन्ति तानि न यन्ति किं ।
धारणप्रेरणक्षोभनिरोधाश्चेतनावशाः ॥ (२६४)
न स्युस्तेषामसामर्थ्ये तस्य दीक्षाद्यनन्तरं ।
अथ बुद्धेस्तदाभावान्न स्युः सन्धीयते मलैः ॥ (२६५)
बुद्धिस्तेषामसामर्थ्ये जीवतोपि [स्यु][5]रक्षमाः ।
निर्ह्रासातिशयात्पुष्टौ प्रतिपक्षस्वपक्षयोः ॥ (२६६)
दोषाः स्वबीजसन्ताना दीक्षितेप्यनिवारिता[:] ।

b. आत्मनो नित्यत्वे न पुनर्जन्म

नित्यस्य निरपेक्षत्वात्क्रमोत्पत्तिर्व्विरुध्यते ॥ (२६७)

[1] VA. ब्रुवन्न । [2] PVM. PS. गर्वमूर्त्तितः ।
[3] PS. ततः । [4] PS. ०नाशान्न गतिः ।

क्रियायामक्रियायाञ्च क्रिययोः[1] सदृशात्मनः[6] ।
23b ऐक्यञ्च हेतुफलयोर्व्यतिरेके ततस्तयोः ॥ (२६८)
कर्तृभोक्तृत्वहानिः स्यात्सामर्थ्यञ्च न सिद्ध्यति ।

c. नैरात्म्ये स्मृतिसंगतिः

अन्यस्मरणभोगादिप्रसङ्गाश्च न बाधकाः ॥ (२६९)
अस्मृतेः, कस्यचित्तेन ह्यनुभूतेः स्मृतोद्भवः ।
स्थिरं सुखं ममाहञ्चेत्यादि सत्त्यचतुष्टये ॥ (२७०)
[अभूतान्][1] षोडशाकारान् आरोप्य परितृष्यति ।

ङ. सम्यग्दृष्टिर्नैरात्म्यदृष्टिः

तत्रैव तद्विरुद्धात्मतत्वाकारानुबोधिनी[2] ॥ (२७१)

(क) तृष्णाक्षयान्मोक्षः

हन्ति सानुचरां तृष्णां सम्यग्दृष्टिः सुभाविता ।
त्रिहेतोर्न्नोद्भवः कर्म्मदेहयोः स्थितयोरपि ॥ (२७२)
एकाभावाद्विना बीजं नाङ्कुरस्येव जन्मनः[3] ।
असंभवाद्विपक्षस्य[2] न हानिः कर्म्मदेहयोः ॥ (२७३)
अशक्यत्वाच्च तृष्णायां स्थितायां पुनरुद्भवात् ।

(ख) अक्षीणकर्मणो न मोक्षः

द्वयक्षयार्थं यत्ने च[4] व्यर्थः कर्म्मक्षये श्रमः ॥ (२७४)
फलवैचित्र्यदृष्टेश्च शक्तिभेदोऽनुमीयते ।
कर्म्मणां तापसंक्लेशात् नैकरूपादतः[5] क्षयः ॥ (२७५)
फलं कथ[3]ञ्चित्तज्जन्यमल्पं[6] स्यान्न विजातिमत् ।
अथापि तपसः शक्त्या शक्तिसङ्करसंक्षयैः ॥ (२७६)
क्लेशात्कुतश्चिद्धीयेत[ा]शेषमक्लेशलेशतः ।
यदीष्टमपरं क्लेशात् तत्तपः क्लेश एव चेत् ॥ (२७७)

---

[1] VA. क्रिया च । [2] VA. ०कारावबोधिनी ।
[3] VA. सम्भवः । [4] VA. यत्नेन ।
[5] VA. ०पाततः । [6] VA. ०न्य सत्यं ।



तत् कर्म्मफलमित्यस्मान्न शक्तेः सङ्करादिकं ।[4]
उत्पित्सुदोषनिर्घाताद् येपि दोषविरोधिनः ॥ (२७८)
तज्जे[1] कर्म्मणि शक्ताः स्युः कृतहानिः कथं भवेत् ।
दोषा न[2] कर्म्मणो दुष्टः[3] करोति न विपर्ययात् ॥ (२७९)
मिथ्याविकल्पेन विना नाभिलाषः सुखादपि ।

च. तायात् सुगतत्वसिद्धिः

तायात्त[त्त्वस्थिराशे]षं[5] निःशेषज्ञानसाधनं[4] ॥ (२८०)
बोधार्थत्वाद् गमेर्बाह्यशैक्षाशैक्षाधिकस्ततः ।
परार्थज्ञानघटनं तस्मात्तच्छासनं दया[5] ॥ (२८१)
ततः[6] परार्थतंत्रत्वं सिद्धार्थस्याविरामतः ।

(७) संवादकत्वाद् भगवान् प्रमाणम्

दयया श्रेय आचष्टे ज्ञानात् सत्त्यं [7][ससाधनं] ।[6] (२८२)
24a तच्चाभियोगवान्वक्तुं यतस्तस्मात्प्रमाणता ।
उपदेशतथाभावस्तुतिस्तदुपदेशतः ॥ (२८३)
प्रमाणतत्त्वसिद्ध्यर्थमनुमानेप्यवारणात् ।
प्रयोगदर्शनात् वास्य यत्किञ्चिदुदयात्मकं ॥ (२८४)
निरोधधर्म्मकं सर्व्वं तदित्यादावनेकधा[1] ।
अनुमान[ा]श्रयो लिंगमविनाऽभाव[1]लक्षणं ॥ (२८५)
व्याप्तिप्रदर्शनाद्धेतोः साध्येनोक्तञ्च तत् स्फुटं[8] ।

प्रमाणवार्तिकाम्भोधौ द्वितीयः परिच्छेदः[9] (॥२॥)

---

[1] VA. उक्ते । [2] PS. VA. दोषा न ।
[3] VA. द्रष्टुः । [4] VA. PVM. तत्त्वस्थिराशेषविशेष० ।
[5] PVM. ततः । [6] PVM. दयापरार्थ० । [7] VA. ०द्भूतं ।
[8] PS. VB. प्रयोगदर्शनाद्धेतोः साध्येनोक्तस्स च स्फुटः ।
[9] प्रमाणवार्त्तिकात् प्रमाणसिद्धिर्नाम द्वितीयः परिच्छेदः—भो० भा०
PS. इति प्रमाणवार्त्तिके द्वि० ।

# तृतीयः परिच्छेदः

## प्रत्यक्षप्रमाणम्

### १. प्रमाणसंख्याविप्रतिपत्तिनिरासः

24a मानं द्विविधं विषयद्वैविध्याच्छक्त्यशक्तितः ।
अर्थक्रियायां; केशादिर्नार्थोऽनर्थाधिमोक्षतः ॥ (१)
सदृशा[ऽसदृशत्वाच्च][2]विषयाविषयत्वतः ।
शब्दस्यान्यनिमित्तानां भावे धी[:] सदसत्त्वतः ॥ (२)

### २. सत्यद्वयचिन्ता

अर्थक्रियासमर्थं यत्तदत्र परमार्थसत् ।
अन्यत्संवृतिसत्प्रोक्तं ते स्वसामान्यलक्षणे ॥ (३)

[इत्यन्तरश्लोकः ॥]

### ३. सामान्यतत्कल्पनानिरासः

अशक्तं सर्व्वमिति चेद् बीजादेरङ्कुरादिषु ।
दृष्टा[ शक्ति ][3]र्म्मता सा चेत्संवृत्यास्तु यथा तथा ॥ (४)

(१) सामान्यचिन्ता

सास्ति सर्व्वत्र चेद् बुद्धेर्नान्वयव्यतिरेकयोः ।
सामान्यलक्षणेऽदृष्टेश्चक्षूरूपादिबुद्धिवत् ॥ (५)
एतेन समयाभोगाद्यन्तरङ्गानुरोधतः ।
घटोत्क्षेपणसामान्यं संख्यादिषु धियो [ग][4]ताः ॥ (६)
केशादयो न सामान्यमर्थानभिनिवेशतः[१] ।
ज्ञेयत्वेन ग्रहाद् दोषो नाभावेषु प्रसज्यते ॥ (७)

---

[१] VA. PS. PVM. ० मनर्थाभिनिवेशतः ।



तेषामपि तथाभावेऽप्रतिषेधात् स्फुटाभता ।
ज्ञानरूपतयार्थश्चे[१]त्केशादौति मति [:] पुनः ॥ (८)
सामान्यविषया; [के][6]शप्रतिभासमनर्थकम् ।
ज्ञानरूपतयार्थत्वे सामान्ये चेत् प्रसज्यते ॥ (९)
तथेष्टत्वाददोषोऽर्थरूपत्वेन समानता ।
सर्व्वत्र समरूपत्वात्तद्व्यावृत्तिसमाश्रयात् ॥ (१०)
तदवस्त्वभिधेयत्वात् साफल्यादक्ष[संहतेः] ।[6]
24b नामादिवचने वक्तृश्रोतृवाच्यानुबन्धिनि ॥ (११)
असम्बन्धिनि नामादावर्थे स्यादप्रवर्त्तनम् ।
सारूप्या[द्] भ्रान्तितो वृत्तिरर्थे चेत्स्यान्न सर्व्वदा ॥ (१२)
देशभ्रान्तिश्च न ज्ञाने तुल्यमुत्पत्तितो धियः ।
तथाविधाया (:;) अन्यत्र तत्रानुपगमाद्धियः ॥ (१३)
बाह्यार्थप्रतिभासाया [उपाये][1] वाऽप्रमाणता ।
विज्ञानव्यतिरिक्तस्य; व्यतिरेकाप्रसिद्धितः ॥ (१४)
सर्व्वज्ञानार्थवत्वाच्चेत् स्वप्नादावन्यथेक्षणात् ।
अयुक्तं; न च संस्थानान्नी[२]लादिप्रतिभासतः ॥ (१५)
नीलाद्यप्रतिघातान्न ज्ञानं तद्योग्यदेशकैः ।
अज्ञातस्य स्वयं ज्ञानान्नामा[2]द्येतेन वर्णितं ॥ (१६)
सैवेष्टार्थवती केन चक्षुरादिमति (:) स्मृता[३] ।
अर्थसामर्थ्यदृष्टेश्चेदन्यत्प्राप्तमनर्थकं ॥ (१७)
अप्रवृत्तिरसम्बन्धेप्यर्थसम्बन्धवद्यदि ।
अतीतानागतं वाच्यं न स्यादर्थेन तत्क्षयात् ॥ (१८)

(२) परमते दोषः

सामान्यग्रहणाच्छब्दादप्रसङ्[3]गो मतो यदि ।
तत्र[४] केवलसामान्याग्रहणाद्[५] ग्रहणेपि वा ॥ (१९)
अतत्समानताव्यक्तौ तेन नित्योपलम्भनं ।
नित्यत्वाच्च यदि व्यक्तिर्व्यक्तेः प्रत्यक्षतां प्रति ॥ (२०)

---

[१] VA.PS. ०र्थत्वात् ।  [२] VA. संस्कारान्नी ।
[३] VA. मता ।  [४] VA. PVM. तन्न ।
[५] PS. सामान्यग्रहणाद् ।

आत्मनि ज्ञानजनने यच्छक्तं शक्तमेव तत् ।
अथाशक्तं क[दाचिच्चे][4]दशक्तं सर्वदैव तत ॥ (२१)[1]
तस्य शक्तिरशक्तिर्व्वा या स्वभावेन संस्थिता ।
निन्त्यत्वादपि किं तस्य[2] कस्तां न्तपयितुं न्तमः ॥ (२२)
तश्च सामान्यविज्ञानमनुरुन्धन् विभाव्यते ।
नीलाद्याकारलेशो यः स तस्मिन् केन निर्म्मि[तः] ॥[5](२३)
प्रत्यन्तप्रत्ययार्थत्वान्नान्ताणां व्यर्थतेति चेत् ।
सैवैकरूपाच्छब्दादेर्भिन्नाभासा मतिः कुतः ॥ (२४)
न जातिर्जातिमद् व्यक्तिरूपं येनापराश्रयं ।
सिद्धं; पृथक् चेत्कार्यत्त्वं ह्युपेन्तेत्यभिधीयते ॥ (२५)
25a निष्प[त्तेरपराधीनमपि][6]कार्यं स्वहेतुतः ।[3]
सम्बध्यते कल्पनया किमकार्यं कथञ्चन ॥ (२६)
अन्यत्त्वे तदसम्बद्धं सिद्धात[ा] निःस्वभावता ।
जातिप्रसङ्गोऽभावस्य नापेन्ताभावतस्तयोः ॥ (२७)
तस्मादरूपा रूपाणां आश्रयेणोपकल्पिता ।
तद्विशेषावगाहार्थैर्जातिः शब्दैः प्रका[श्यते] ॥ (२८)
[तस्यां रूपाव[1]भा]सोयं तत्त्वेनार्थस्य वा ग्रहः ।
भ्रान्तिः साऽनादिकालीनदर्शनाभ्यासनिर्म्मिता ॥ (२९)
अर्थानां यच्च सामान्यमन्यव्यावृत्तिलन्तणं ।
यन्निष्ठास्त इमे शब्दा न रूपं तस्य किञ्चन ॥ (३०)
सामान्यबुद्धौ सामान्येनारूपायामवीन्तणात् ।
[अर्थभ्रान्तिरपीष्येत][2] सामान्यं साप्यभिप्लवात् ॥ (३१)
अर्थरूपतया तत्त्वेनाभावाच्च न रूपिणी ।
निःस्वभावतयाऽवाच्यं कुतश्चिद्वचनान्मतं ॥ (३२)
यदि वस्तुनि[4] वस्तूनामवाच्यत्त्वं कथञ्चन ।
नैव वाच्यमुपादानभेदाद्भेदोपचारतः ॥ (३३)
अतीतानागतेप्यर्थे साम[ान्यवि][3]निबन्धनाः ।
श्रुतयो निविशन्ते सदसद्धर्मः[5] कथम्भवेत् ॥ (३४)

[1] VN. स्वात्मनि ० —टीकायां पृ० ९४ (३५) ।
[2] VN. ०त्वादचिकित्स्यस्य०—टीकायां पृष्ठ ९५ (३६) ।
[3] PS. हेतुतः । [4] PS. वस्तु न । [5] यद्यसद्धर्मः—इति भोटभाषान्तरे ।



उपचारात्तदिष्टं चेद्वर्त्तमानघटस्य का ।
प्रत्त्यासत्तिरभावेन या पटादौ न विद्यते ॥ (३५)
बुद्धेरस्खलिता वृत्तिर्म्मुख्यारोपितयोः सदा ।
सिंहे माणवके [तद्वद् घो][4]षणाप्यस्ति लौकिकी ॥ (३६)
यत्र रूढ्याऽसदर्थापि जनैः शब्दो निवेशितः ।
स मुख्यस्तत्र तत्साम्याद् गौणोन्यत्र स्खलद्गतिः ॥ (३७)
यथाभावेप्यभावाख्यां यथा कल्पनमेव वा ।
कुर्यादशक्ते शक्ते वा प्रधानादिश्रुतिं जनः ॥ (३८)
25b शब्देभ्यो [यादृ][6]शी बुद्धिर्न्नष्टेऽनष्टेपि दृश्यते ।
तादृश्येव सदर्थानां नैतच्छ्रोत्रादिचेतसां ॥ (३९)
सामान्यमात्रग्रहणात् सामान्यं चेतसोर्द्वयोः ।
तस्यापि केवलस्य प्राग्ग्रहणम्विनिवारितं ॥ (४०)
परस्परविशिष्टानामविशिष्टं कथम्भवेत् ।
रूपं द्विरूपतायां वा [त][1]द्वस्त्वेकं कथम्भवेत् ॥ (४१)
ताभ्यां तदन्यदेव स्याद् यदि रूपं समन्तयोः ।
तयोरिति [न] सम्बन्धो व्यावृत्तिस्तु न दुष्यति ॥ (४२)
तस्मात् समानतैवास्मिन् सामान्येऽवस्तुलन्तणं ।
कार्यञ्चेत्तदनेकं स्यान्नश्वरञ्च न तन्मतं ॥ (४३)
वस्तुस[2]त्तानुबन्धित्वाद्विनाशस्य न नित्यता ।
असम्बन्धश्च जातीनामकार्यत्वादरूपता ॥ (४४)
यच्च वस्तुबलाज्ज्ञानं जायते तदपेन्तते ।
न सङ्केतं न सामान्यबुद्धिष्वेतद्विभाव्यते ॥ (४५)
याप्यभेदानुगा बुद्धिः काचिद्वस्तुद्वये[न्त][3] णे ।
सङ्केतेन विना सार्थप्रत्यासत्तिनिबन्धना ॥ (४६)
प्रत्यासत्तिर्व्विना जात्या यथेष्टा चन्तुरादिषु ।
ज्ञानकार्येषु जातिर्व्वा ययान्वेति विभागतः । (४७)
कथञ्चिदपि विज्ञाने तद्रूपानवभासतः[1] ।
यदि नात्मेन्द्रियाणां स्याद् दृष्टा भासेत[2] [तद्वपुः] ॥ (४८)
[तद्] रूपत्वान्; न जातीनां केवलानामदर्शनात् ।
व्यक्तिग्रहे च तच्छब्दरूपादन्यन्न दृश्यते ॥ (४९)

[1] PS. ० नवभासनात् । [2] PS. द्रष्टा भासेत ।

ज्ञानमात्रार्थकरणेप्ययोग्यमत एव तत् ।
तदयोग्यतयाऽरूपं तद्धयवस्तुषु[1] लक्षणं ॥ (५०)
यथोक्तविपरीतं यत् (तत् स्वलक्षणमिष्यते) ( । )[5]
26a सामान्यं त्रिविधं तच्च भावाभावोभयाश्रयात् ॥ (५१)
यदि भावाश्रयं ज्ञानं भावे भावानुबन्धतः ।
नोक्तोत्तरत्त्वाद् दृष्टत्त्वादतीतादिषु चान्यथा ॥ (५२)
भावधर्मत्वहानिश्चेद् भावग्रहणपूर्व्वकं ।
तज्ज्ञानमित्यदोषोयं [मेयं] त्वेकं स्वलक्षणं ॥ (५३)
त[स्मादर्थक्रियासिद्धेः सद्][1]सत्ताविचारणात् ।
तस्य स्वपररूपाभ्यां गतेर्म्मेयद्वयं मतं ॥ (५४)

## ४. अनुमानचिन्ता

### (१) अनुमानसिद्धिः

अयथाभिनिवेशेन द्वितीया भ्रान्तिरिष्यते ।
गतिश्चेत्पररूपेण न च भ्रान्तेः प्रमाणता ॥ (५५)
अभिप्रायाविसंवादादपि भ्रान्तेः प्रमाणता ।
गतिरप्यन्य[था दृष्टा पक्षश्चायं कृतो][2]त्तरः ॥ (५६)
मणिप्रदीपप्रभयोर्म्मणिबुद्धयाभिधावतोः ।
मिथ्याज्ञानाविशेषेपि विशेषोर्थक्रियां प्रति ॥ (५७)
यथा तथाऽयथार्थत्वेप्यनुमा न तदाभयोः ।
अर्थक्रियानुरोधेन प्रमाणत्वं व्यवस्थितं ॥ (५८)
बुद्धिर्यत्रार्थसामर्थ्याद[न्वयव्यतिरे][3]किणी ।
तस्य स्वतन्त्रं ग्रहणमतोन्यद्वस्त्वतीन्द्रियं ॥ (५९)
तस्यादृष्टात्मरूपस्य गतेरन्योर्थ आश्रयः ।
तदाश्रयेण सम्बन्धी यदि स्याद् गमकः तदा ॥ (६०)
गमकानुगसामान्यरूपेणैव तदा गतिः ।
तस्मात् सर्व्व[ः]परोक्षोर्थो विशेषेण न गम्यते ॥[4] (६१)
या च सम्बन्धिनो धर्माद्भूतिर्धर्म्मिणि जायते ।
सानुमानं परोक्षाणामेकं तेनैव साधनं ॥ (६२)

[1] PS. तद्धयवस्थास्व ।०



न प्रत्यक्षपरोक्षाभ्यां मेयस्यान्यस्य सम्भवः ।
तस्मात् प्रमेयद्वित्वेन प्रमाणद्वित्त्वमिष्यते ॥ (६३)
व्येकसंख्यानिरासो वा प्रमेयद्वय[दर्श]नात् ।
एकमेवाप्रमेयत्वादसतश्चेन्मतञ्च नः ॥ (६४)
अनेकान्तोऽप्रमेयत्वे(ऽ)सद्भावस्यापि[1] निश्चयः ।
तन्निश्चय[ः] प्रमाणं वा द्वितीयं नाक्षजा मतिः ॥ (६५)
अभावेऽर्थबलाज्जातेरर्थशक्त्यनपेक्षणे ।
26b व्यवधानादिभावेपि जायेतेन्द्रि[यजा][5] मतिः ॥ (६६)
अभावे विनिवृत्तेश्चेत् प्रत्यक्षस्यैव निश्चयः ।
विरुद्धं सैव वा लिङ्गमन्वयव्यतिरेकिणी ॥ (६७)
सिद्धश्च परचैतन्यप्रतिपत्तेः प्रमाद्वयं ।
व्याहारादौ प्रवृत्तेश्च सिद्धस्तद्भावनिश्चयः ॥ (६८)
प्रमाणमविसंवादात् तत्कचिद्वयभिचारतः ।
नाश्वास इति चे[ल्लिङ्गं दुर्दृष्टि][1]रतदीदृशं ॥ (६९)
यतः कदाचित्सिद्धास्य प्रतीतिर्व्वस्तुनः क्वचित् ।
तदवश्यं ततो जातं तत्स्वभावोपि वा भवेत् ॥ (७०)
स्वनिमित्तात्स्वभावाद्वा विना नार्थस्य सम्भवः ।
यच्च रूपं तयोर्दृष्टं तदेवान्यत्र लक्षणं ॥ (७१)
स्वभावे स्वनिमित्ते वा दृश्ये दर्शन[2] हेतुषु ।
अन्येषु सत्स्वदृश्ये च सत्ता वा तद्गतः कथं ॥ (७२)
अप्र[ा]माण्ये च सामान्यबुद्धेस्तल्लोप आगतः ।
प्रेत्यभाववदक्षैस्तत[2]पर्यायेण प्रतीयते ॥ (७३)
तच्च नेन्द्रियशक्तयादावक्षबुद्धेरसम्भवात् ।
अभावप्रतिपत्तौ स्याद् बुद्धिजन्मनिमित्त[3]कं[3] ॥ (७४)
स्वलक्षणे च प्रत्यक्षमविकल्पतया विना ।
विकल्पेन न सामान्यग्रहस्तस्मिंस्ततोनुमा ॥ (७५)
प्रमेयनियमे वर्णानित्यता न प्रतीयते ।
प्रमाणमन्यत्तद् बुद्धिर्व्विना लिङ्गेन सम्भवात् ॥ (७६)

[1] PS. ह्युभावस्यावि० ।
[2] PS. ० क्षैश्चेत० ।
[3] PVM. बुद्धेर्जन्मानिमित्तकं ।

विशेषदृष्ट लिङ्गस्य[1] सम्बन्धस्याप्रसिद्धितः ।
तत्प्रमाणान्तरं [मेय][4]बहुत्वे बहुतापि वा ॥ (७७)
प्रमाणानामनेकस्य[2] वृत्तेरेकत्र[3] वा यथा ।
विशेषदृष्टेरेकत्रिसंख्यापोहो न वा भवेत् ॥ (७८)
विषयानियमादन्यप्रमेयस्य च सम्भवात् ।
योजनाद्वस्तु[4]सामान्ये नायं दोषः प्रसज्यते ॥ (७९)
नावस्तुरूप[न्तस्यैव तथा सिद्धे][5] प्रसाधनात् ।
अन्यत्र नान्यसिद्धिश्चेन्न तस्यैव प्रसिद्धितः ॥ (८०)
यो हि भावो यथाभूतो न तादृग्[5] लिङ्गचेतसः ।
हेतुस्तज्जा तथाभूते तस्माद्वस्तुनि लिङ्[ि]गधीः ॥ (८१)
लिङ्गलिङ्गिधियोरेवं पारम्पर्येण वस्तुनि ।
27a प्रति[बन्धात् तदाभासशून्ययोरप्य][6]वञ्चनं ॥ (८२)
तद्रूपाध्यवसायाच्च तयोस्तद्रूपशून्ययोः ।
तद्रूपावञ्चकत्वेपि कृता भ्रान्तिव्यवस्थितिः ॥ (८३)
तस्माद्वस्तुनि बोद्धव्ये व्यापकं व्याप्यचेतसः ।
निमित्तन्तत्स्वभावो वा कारणं तच्च तद्धियः ॥[6] (८४)

(२) अनुपलब्धिचिन्ता

प्रतिषेधस्तु सर्व्वत्र साध्यतेनुपलम्भतः ।[7]
[सिद्धिम्प्रमाणैर्वदताम][1]र्थादेव विपर्ययात् ॥ (८५)
दृष्टा विरुद्धधर्म्मोक्तिस्तस्य तत्कारणस्य वा ।
निषेधे यापि तस्यैव सा(ऽ)प्रमाणत्वसूचना ॥ (८६)
अन्यथैकस्य धर्म्मस्य सम्भवोक्त्याऽपरस्य तत् ।
नास्तित्वं केन गम्येत विरोधाच्चेदसावपि ॥ (८७)
सिद्धः केनास[हस्थानादिति चेत् तत्कु][2]तो मतं ।
दृश्यस्य दर्शनाभावादिति चेत्साऽप्रमाणता ॥ (८८)

[1] PS. विशेषलिङ्गे दृष्टस्य । [2] PS. ०नेकत्र ।
[3] PH. वृत्तेरेकं त्रि । [4] PVM. वर्णसामान्ये । [5] PS. तादग ।
[6] PS. वा तस्माद् वस्तुनि लिङ्गधीः । [7] PS. ०नुपलम्भनात् ।



तस्मात्स्वशब्देनोक्तापि साऽभावस्य प्रसाधिका ।
यस्याप्रमाणं स वाच्यो[1] निषेधस्तेन सर्वथा ॥ (८९)
एतेन तद्विरुद्धार्थकार्योक्तिरुपवर्णिता ।
प्रयोगः केवलं भिन्न[स्सर्वत्रार्थो न][3]भिद्यते ॥ (९०)
विरुद्धं तच्च सोपायमविधायापिधाय च ।
प्रमाणोक्तिर्न्निषेधे या न साम्नायानुसारिणी ॥ (९१)
उक्त्यादेः सर्व्ववित्प्रेत्यभावादिप्रतिषेधवत् ।
अतीन्द्रियाणामर्थानां विरोधस्याप्रसिद्धितः ॥ (९२)
बाध्यबाधकभावः कः स्या[तां][4] यद्युक्तिसंविदौ ।
तादृशोनुप[2]देशश्चेत् उच्यतां सैव साधनं ॥ (९३)
अनिश्चयफलं[3] प्रोक्तं ईदृक् क्वानुपलम्भनं ।
तन्नात्यन्तपरोक्षेर्थे[3] सदसत्ताविनिश्चयौ ॥ (९४)
भिन्नोऽभिन्नोपि वा धर्म्मः स विरुद्धः प्रयुज्यते ।
यथाग्निरहि[मे सा][5]ध्ये सत्ता वा जन्मबाधनी ॥ (९५)
यथा वस्त्वेव वस्तूनां साधने साधनं मतं ।
तथा वस्त्वेव वस्तूनां स्वनिवृत्तौ निवर्त्तकं ॥ (९६)
एतेन कल्पनान्यस्तो यत्र क्वचन सम्भवात् ।
धर्म्मः पक्षसपक्षान्यतरत्वादिरपोदितः ॥ (९७)
27b तत्रापि व्याप[को][6] धर्म्मो निवृत्तेर्गमको मतः ।
व्याप्यस्य स्वनिवृत्तिश्चेत्परिच्छिन्ना कथञ्चन ॥ (९८)
यदप्रमाणताभावे लिङ्गं तस्यैव कथ्यते ।
तद[त्यन्त]विमूढार्थमागोपालमसंवृतेः ॥ (९९)
एतावन्निश्चयफलमभावेनुपलम्भनं ।
तच्च हेतौ स्वभावे [वाऽ][1]दृश्ये दृश्यतया मते ॥ (१००)
अनुमानादनित्यादेर्ग्रहणेऽयं क्रमो मतः ।
प्रामाण्यमेव नान्यत्र गृहीतग्रहणान्मतं ॥ (१०१)
नान्यास्य[4] नित्यताभावात् पूर्वसिद्धः स चैन्द्रियात् ।
नानेकरूपो वाच्योसौ वाच्यो धर्मो विकल्पजः[2] (॥) (१०२)

[1] PVM. साऽवाच्यः । [2] PVM. ० नुपलब्धे० ।
[3] PVM. अनिश्चयकरं । ०परोक्षेषु ।
[4] PVM. नान्यास्यानित्यता ० ।

सामान्याश्रयसंसिद्धौ सामान्यं सिद्धमेव तत् ।
तदसिद्धौ तथास्यैव ह्यनुमानं प्रसिद्धये[१] ॥ (१०३)
कचित्तदपरिज्ञानं सदृशापरसम्भवात् ।
भ्रान्तेरपश्यतो भेदं मायागोलकभेदवत् ॥ (१०४)
तथा ह्यलिङ्गमाबालमसंश्लिष्टोत्तरोदयं ।[3]
पश्यन् परिच्छिनत्त्येव दीपादि नाशिनं जनः ॥ (१०५)
भावस्वभावभूतायामपि शक्तौ फलेऽदृशः ।
अन्या[ ? ना ]नन्तर्यतो मोह [ ा ] विनिश्चेतुरपाटवात् ॥ (१०६)
तस्यैव विनिवृत्त्यर्थमनुमानोपवर्णनं ।
व्यवस्यन्तीक्षणादेव सर्वाकारा[न्महाधियः[4]] ॥ (१०७)
व्यावृत्ते सर्व्वतस्तस्मिन् व्यावृत्तिविनिबन्धनाः ।
बुद्धयोर्थे [ प्र ]वर्तन्तेऽभिन्ने भिन्नाश्रया इव ॥ (१०८)
यथा चोदनमाख्याश्च सोऽसति भ्रान्तिकारणे ।
प्रतिभाः प्रतिसन्धत्ते स्वानुरूपाः स्वभावतः ॥ (१०९)
सिद्धोऽत्र[5][ा प्यथवा ध्वंसोऽ लिंगादनु]पलम्भनात् ।
प्राग् भूत्वा ह्यभवद्भावो नित्य इत्यभिधीयते ॥ (११०)
यस्योभयान्तव्यवधि(:) सत्ता सम्बन्धवाचिनी ।
अनित्यताश्रुतिस्तेन तावन्ताविति कौ स्मृतौ ॥ (१११)
28a प्राक् पश्चादप्यभावश्चेत् [स एवानित्यता न किं ।][6]
षष्ठाद्ययोगादिति चेत् अन्तयोः स कथं भवेत् ॥ (११२)
सत्तासम्बन्धयोर्ध्रौव्यादन्ताभ्यान्न विशेषणं ।
अविशेषणमेव स्यादन्तौ चेत्कार्यकारणे ॥ (११३)
असम्बन्धान्न भावस्य प्रागभावं स वाञ्छति ।
तदुपाधिसमाख्याने तेप्य[ऽस्य च न सिध्यतः] ॥ (११४)
[सत्ता स्व][2]कारणाश्लेषकरणात्कारणं किल ।
सा सत्ता स च सम्बन्धो नित्यौ कार्यमथेह किं ॥ (११५)
यस्याभावः क्रियेतासौ न भावः प्रागभाववान् ।
सम्बन्धानभ्युपगमान्नित्यं विश्वमिदं ततः ॥ (११६)

---

[१]PVM. प्रवर्तते ।



तस्मादनर्थास्कन्दिन्योऽभिन्नार्थाभिमते[ष्वपि ।
शब्देषु[3] ] वाच्यभेदिन्यो व्यतिरेकास्पदं धियः ॥ (११७)
विशेषप्रत्यभिज्ञानं न प्रतिक्षणभेदतः ।
न वा विशेषविषयं दृष्टसाम्येन तद्ग्रहात् ॥ (११८)
निदर्शनं तदेवेति सामान्याग्रहणं यदि ।
निदर्शन[त्वात् ] सिद्धस्य प्रमाणेना[स्य किं[3] पुनः] ॥(११९)
विस्मृतत्त्वाददोषश्चेत्तत एवानिदर्शनम् ।
दृष्टे तद्भावसिद्धिश्चेत्प्रमाणाद्, अन्यवस्तुनि ॥ (१२०)
तत्त्वारोपो विपर्यासस्तत्सिद्धेरप्रमाणता ।
प्रत्यक्षेतरयोरैक्यादेकसिद्धिर्द्वयोरपि ॥ (१२१)
सन्धीयमान[ञ्चान्येन व्यवसायं][4] स्मृतिं विदुः ।
तल्लिङ्गापेक्षणान्नो चेत्स्मृतिर्न्न व्यभिचारतः ॥ (१२२)

## ५. प्रत्यक्षचिन्ता

### (१) प्रत्यक्षलक्षणविप्रतिपत्तिनिरासः

प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिद्ध्यति ।
प्रत्यात्मवेद्यः सर्व्वेषां विकल्पो नामसंश्रयः ॥ (१२३)
संहृत्य सर्व्वतश्चिन्तां [स्तिमितेना][5]न्तरात्मना ।
स्थितोपि चक्षुषा रूपमीक्षते साक्षजा मतिः ॥ (१२४)
पुनर्व्विकल्पयन्किञ्चिदासीन्मे कल्पनेदृशी ।
इच्छा[१] चेति न पूर्व्वोक्तावस्थायामिन्द्रियाद् गतौ ॥ (१२५)
28b एकत्र दृष्टो भेदो [हि][6] कचिन्नान्यत्र दृश्यते ।
न तस्मात् भिन्नमस्त्यन्यत्सामान्यं बुद्ध्यभेदतः ॥ (१२६)
तस्माद्विशेषविषया सर्व्वैवेन्द्रियजा मतिः ।
न विशेषेषु शब्दानां प्रवृत्तावस्ति सम्भवः ॥ (१२७)
अनन्वयाद्विशेषाणां [स]ङ्केतस्याप्रवृत्तितः[२] ।
विषयो यश्च शब्दानां संयोज्येत स एव तैः ॥ (१२८)
अस्येदमिति सम्बन्धे यावर्थौ प्रतिभासिनौ ।
तयोरेव हि सम्बन्धे[३][ा]न तदेन्द्रियगोचरः ॥ (१२९)

---

[१]भो० भा०, PVM. वेत्ति । [२] PS. ०प्रसिद्धितः । [३]PVM. सम्बन्धो ।

वि[शद]प्रतिभासस्य [तद[1]][2]र्थस्याविभावनात् ।
विज्ञानाभासभेदश्च पदार्थानां विशेषकः ॥ (१३०)
चक्षुषोऽर्थावभासेऽपि यं यश्चाऽप्यतिशंसति[2] ।
स एव योज्यते शब्दैर्न्न खल्विन्द्रियगोचरः ॥ (१३१)
अव्यापृतेन्द्रिय[स्या][3]न्यवाङ्मात्रेणाविभावनात् ।
न चानुदितसम्बन्धः स्वयं ज्ञानप्रसङ्गतः ॥ (१३२)
मनसोर्युगपद्वृत्तेः सविकल्पाविकल्पयोः ।
विमूढोसम्प्रवृत्तेर्व्वानयोरैक्यं[3] व्यवस्यति ॥ (१३३)
विकल्पव्यवधानेन विच्छिन्नं दर्शनं भवेत् ।
[इति चेद् भिन्न] [4]जातीयविकल्पेन्यस्य वा कथं ॥ (१३४)
अलातदृष्टिवद्भावपक्षश्चेद् बलवान्मतः ।
अन्यत्रापि समानं तद्वर्णयोर्व्वा सकृच्छ्रुतिः ॥ (१३५)
सकृत्सङ्गतशब्दा[4]र्थेष्विन्द्रियेष्विह सत्स्वपि ।
पञ्चभिर्व्यवधानेपि भात्यव्यवहितेव या ॥ (१३६)
सा मति[र्नाम पर्यन्तक्षणिक][5]ज्ञानमिश्रणात् ।
विच्छिन्नाभेति तच्चित्रं तस्मात्सन्तु सकृद्धियः ॥ (१३७)
प्रतिभासविशेषश्च[5] सान्तरानन्तरे कथं ।
शुद्धे मनोविकल्पे च न क्रमग्रहणम्भवेत् ॥ (१३८)
योऽग्रहः सङ्गतेप्यर्थे क्वचिदासक्तचेतसः ।
29a शक्त्या[नोत्पत्तिवैगुण्याच्चोद्यं वै][6]तद्द्वयोरपि ॥ (१३९)
शीघ्रवृत्तेरलातादेरन्वयप्रतिघाति[6]नीं ।
चक्रभ्रान्तिं दृशा[6] धत्ते न दृशां घटनेन सा ॥ (१४०)
केचिदिन्द्रियजत्वादेर्बालधीवदकल्पनां ।
आहुर्बाला विकल्पे च हेतुं सङ्केतमन्दतां ॥ (१४१)

---

[1] PVM. तदा० । [2] PS. PVM. यं परोस्येति शंसति ।
[3] PS. विमूढेन प्रवृत्तेर्व्वा तयोरैक्यं । PVM. विमूढो लघु० ।
[4] PVM. ०सर्वार्थे० ।
[5] नास्ति कल्पनाप्यत्रेत्यधिकः पाठः । PVM. प्रतिभासाविशेष० ।
[6] PVM. ०घातिनी । दृगाधत्ते ।



तेषां प्रत्यक्षमेव स्याद् बाला[नामविकल्पनात् ] [1](।)
[सङ्केतोपायविगमा][1]त्पश्चादपि भवेन्न सः ॥ (१४२)
मनोऽव्यु[1]त्पन्नसङ्केतमस्ति तेन न चेन्मतं[2] ।
एवमिन्द्रियजेपि स्याद्भेदवच्चेदमीदृशं[3] ॥ (१४३)
यदेव साधनं बाले तदेवात्रापि कथ्यतां ।
साम्यादक्षधिया [4]युक्तमनेनानुभवादिकं ॥ (१४४)

(२) सामान्यनिरासः

विशेषणं [विशेष्यं च सम्बन्धं लौकि][2]कीं स्थितिं ।
गृहीत्वा सङ्कलय्यैतत्तथा प्रत्येति नान्यथा ॥ (१४५)
यथा दण्डिनि जात्यादेर्व्विवेकेनानिरूपणात् ।
तद्वता योजना नास्ति कल्पनाप्यत्र[5] नास्त्यतः ॥ (१४६)
यद्यप्यन्वयि[6] विज्ञानं शब्दव्यक्त्यवभासि तत् ।
वर्णाकृत्यक्षराका[रशून्यं गोत्वं हि व][3]र्ण्यते ॥ (१४७)
समानत्वेपि तस्यैव नेक्षणं नेत्रगोचरे ।
प्रतिभासद्वयाभावाद् बुद्धेर्भेदश्च दुर्लभः ॥ (१४८)
समवायाग्रहादक्षैः सम्बन्धादर्शनं स्थितं ।
पटस्तन्तुष्विवे[7]त्यादिशब्दाश्चेमे स्वयं कृताः ॥ (१४९)
शृङ्गं गवीति लोके [ स्यात् शृङ्गे ][4] गौरित्यलौकिकं ।

(३) अवयविनिरासः

गवाख्यपरिशिष्टाङ्गविच्छेदानुपलम्भनात् ॥ (१५०)
तैः तन्तुभिरियं शाटीत्युत्तरं कार्यमुच्यते ।
तन्तुसंस्कारसम्भूतं नैककालं कथञ्चन ॥ (१५१)
कारणारोपतः कश्चित् एकापोद्धारतोपि वा ।
त[न्त्वाख्यां वर्त्तये][5]त्कार्ये दर्शयन् नाश्रयं श्रुतेः ॥ (१५२)

---

[1] PVM. मनोव्युत्पन्न० ।
[2] PS. ० स्तिचेत्स चेन्मतः । PVM. अस्ति तेन स चेन्मतः ।
[3] PS., PVM. स्याच्छेषवच्चे ० । [4] PVM. ०धियामुक्त ० ।
[5] विशेषे च—इति भो० भा० । [6] PS. यदप्य० ।
[7] PVM. ०ष्विहेत्यादि० ।

उपकार्योपकारित्वं[1] विच्छेदाद् दृष्टिरेव वा ।
मुख्यं यदस्खलज्ज्ञानमादिसङ्केतगोचरः ॥ (१५३)

(४) नानुमानतः सामान्यसिद्धिः

अनुमानञ्च जात्यादौ वस्तुनो नास्ति भेदिनि ।
29b सर्व्वत्र व्यपदेशो हि [दंडा][6]देरपि सांवृतात् ॥ (१५४)
वस्तुप्रासादमालादिशब्दाश्चान्यानपेक्षिणः ।
गेही यद्यपि संयोगस्तन्माला किन्नु तद्भवेत् ॥ (१५५)
जातिश्चेद्गेह एकोपि मालेत्युच्येत वृक्षवत् ।
मालाबहुत्वे तच्छब्दः कथं जातेरजातितः ॥ (१५६)
मालादौ च म[हत्त्वादि][1]ष्टो यश्चौपचारिकः ।
मुख्याविशिष्टविज्ञानग्राह्यत्वान्नौपचारिकः ॥ (१५७)
अनन्यहेतुता तुल्या सा मुख्याभिमतेष्वपि ।
पदार्थशब्दः कं हेतुमन्यं षट्कं समीक्षते ॥ (१५८)
यो यथा रूढितः सिद्धस्तत्साम्याद्यस्तथोच्यते ।
यत्र[2] गौणश्च भावेष्वप्यभावस्योपचारतः ॥[2] (१५९)
सङ्केतान्वयिनी रूढिर्वक्तुरिच्छान्वयी च सः ।
क्रियते व्यवहारार्थं छन्दः शब्दा[3]र्थनामवत् ॥ (१६०)
वस्तुधर्म्मतयैवार्थ[4]स्तादृग्विज्ञानकारणं ।
भेदेपि यत्र तज्ज्ञाना[त्त[5]त्त][3]था प्रतिपद्यते ॥ (१६१)
ज्ञानान्यपि तथा भेदेऽभेदप्रत्यवमर्शने ।
इत्येत[6]त्कार्यविश्लेषस्यान्वय[ ो ] नैकवस्तुनः ॥ (१६२)
वस्तूनां विद्यते तस्मात्तन्निष्ठा वस्तुनि श्रुतिः ।

(५) अन्यापोहचिन्ता

बाह्यशक्तिव्यवच्छेदनिष्ठा[ऽभावेपि तच्छ्रुतिः][4] ॥ (१६३)
विकल्पप्रतिबिम्बेषु तन्निष्ठेषु[ि]नबध्यते ।
ततोन्यापोहनिष्ठत्वादुक्तान्यापोहकृच्छ्रुतिः ॥ (१६४)

---

[1] ० कारित्त्वेऽविच्छेदाद्—इति भो० भा० ।
[2] PS. मुख्यो गौणश्च भावेष्वप्यारोपेण वृत्तितः ।
[3] PVM. शब्दांश० ।
[4] PVM. ०वार्थास्तादृग्० ।
[5] PVM. ०त्तान्तथा ।
[6] PS. PVM. इत्यतत् ।



व्यतिरेकीव यज्ज्ञाने भात्यर्थप्रतिबिम्बकं ।
शब्दात्तदपि नार्थात्मा भ्रान्तिः सा वासनोद्भवा[1] [5] ॥ (१६५)
[2][तस्याभिधाने श्रुतिभिरर्थे कोंशोवगम्यते ।
तस्यागतौ च संकेतक्रिया व्यर्था तदर्थिका ॥ (१६६)
शब्दोर्थांशकमाहेति तत्रान्यापोह उच्यते ।
आकारः स च नार्थेस्ति तम्वदन्नर्थभाक् कथं ॥ (१६७)
शब्दस्यान्वयिनः कार्यमर्थेनान्वयिना स च ।
अनन्वयी धियोऽभेदाद् दर्शनाभ्यासनिर्म्मितः ॥ (१६८)
16b तद्रूपारोपगत्यान्यव्यावृत्ताधिगतिः[3] पुनः[1] ।
शब्दार्थोर्थः स एवेति वचनेन विरुध्यते ॥ (१६९)
मिथ्यावभासिनो वैते प्रत्ययाः शब्दनिर्मिताः ।
अनुयान्तीममर्थांशमिति वापोहकृच्छ्रुतिः ॥ (१७०)
तस्मात् संकेतकालेपि निर्दिष्टार्थेन संयुतः ।
स्वप्रतीतिफलेनान्यापोहः संबध्यते श्रुतौ ॥ (१७१)
अन्यत्रादृष्ट्यपेक्षत्वात् क्वचित्तद्दृष्ट्यपेक्षणात् ।
श्रुतौ संबध्यते[ऽ]पोहो नैतद् वस्तुनि युज्यते ॥ (१७२)
तस्माद् जात्यादितद्योगा नार्थे तेषु च न श्रुतिः ।
संयोज्यतेन्यव्यावृत्तौ शब्दानामेव योजनात् ॥ (१७३)

(६) प्रत्यक्षे शब्दकल्पनानिरासः

संकेतस्मरणो[2]पायं दृष्टसंकलनात्मकं ।
पूर्वापरपरामर्शशून्ये तच्चाक्षुषे कथं ॥ (१७४)
अन्यत्र गतचित्तोपि चक्षुषा रूपमीक्षते ।
तत्संकेताग्रहस्तत्र स्पष्टस्तज्जा च कल्पना ॥ (१७५)
जायन्ते कल्पनास्तत्र यत्र शब्दो निवेशितः ।
तेनेच्छातः प्रव[3]र्त्तेरन्नेक्षेरन् बाह्यमक्षजाः ॥ (१७६)
रूपं रूपमितीक्षेत तद्धिया[4] किमितीक्षते ।
अस्ति चानुभवस्तस्याः सो विकल्पः कथं भवेत् ॥ (१७७)

---

[1] PS. वासनामयी ।
[2] PS. हस्तलेखतः ।
[3] PVM. ०गतेः ।
[4] PVM. तद्धियं ।

तयैवानुभवे दृष्टं न विकल्पद्वयं सकृत् ।
एतेन तुल्यकालान्यविज्ञानानुभवो गतः ॥ (१७८)
स्मृतिर्भवे[4]दतीते च सा गृहीते[1] कथं भवेत् ।
स्याच्चान्यधीपरिच्छेदा भिन्नरूपा स्वबुद्धिधीः ॥ (१७९)
अतीतमपदृष्टान्तमलिङ्गञ्चार्थ[2]दर्शनं ।
सिद्धं तत्केन तस्मिन् हि न प्रत्यक्षं न लैङ्गिकं ॥ (१८०)
तत्स्वरूपावभासिन्या बुद्ध्यानन्तरया यदि ।
रूपादिरिव गृह्येत[5] न स्यात् तत्पूर्व्वधीग्रहः ॥ (१८१)
सो विकल्पः स्वविषयो विज्ञानानुभवो यथा ।
अशक्यसमयं तद्वदन्यदप्यविकल्पकं ॥ (१८२)
सामान्यवाचिनः शब्दास्तदेकार्थाव[3]कल्पना ।
अभावे निर्व्विकल्पस्य विशेषाधिगमः कथं ॥ (१८३)
अस्ति चेन्निर्व्विकल्पञ्च किञ्चि[4]त् तत्तुल्यहेतुकं ।
सर्व्वन्तथैव हेतोर्हि भेदाद् भेदः फलात्मनां ॥ (१८४)
अनपेक्षितबाह्याथा योजना समयस्मृतेः ।
तथानपेक्ष्यसम[4]यां वस्तुशक्त्यैव नेत्रधीः ॥ (१८५)
[5]संकेतस्मरणापेक्षं रूपं यद्यस्य चेतसि ।
17a अनपेक्ष्य न चेच्छक्यं[7] स्यात् स्मृतावेव लिङ्गवत् ॥ (१८६)
तस्यास्तत्संगमोत्पत्तेरक्षधीः स्यात् स्मृतेर्न्न वा ।
ततः कालान्तरेपि स्यात् क्वचिद् व्याक्षेपसंभवात् ॥ (१८७)
क्रमेणोभयहेतुश्चेत् प्रागेव स्यादभेदतः ।
अन्योक्षबुद्धिहेतुश्चेत् स्मृ[1]तिस्तत्राप्यनर्थिका ॥ (१८८)
यथा समितसिद्ध्यर्थमिष्यते समयस्मृतिः ।
भेदश्चासमितो ग्राह्यः स्मृतिस्तत्र किमर्थिका ॥ (१८९)
सामान्यमात्रग्रहणे भेदापेक्षा न युज्यते ।
तस्माच्चक्षुश्च रूपञ्च प्रतीत्योदेति नेत्रधीः ॥ (१९०)

---

[1] PVM.साऽगृहीते ।
[2] PVM. ०वेदनं ।
[3] PVM. तदेकार्था च कल्पना ।
[4] PVM. समयं ।
[5] भो० भा० इतः प्राक्—शक्तेरपेक्षणाभावे रूपं चेदक्षबुद्धिषु ।—
इति श्लोकार्द्धमधिकम्



साक्षाच्चे[4]त् ज्ञानजनने समर्थो विषयोक्षवत् ।

### ६. प्रत्यक्षभेदाः

#### (१) इन्द्रियप्रत्यक्षम्

अथ कस्माद् द्वयाधीनजन्म तत्तेन नोच्यते ॥ (१९१)
समोक्ष्य गमकत्वं हि व्यपदेशो न गृह्यते ।
तच्चाक्षव्यपदेशेस्ति तद्धर्म्मश्च नियोज्यतां ॥ (१९२)
ततो लिङ्गस्वभावोत्र व्यपदेशे नि[3]योज्यतां ।
निवर्त्तते व्यापकस्य स्वभावस्य निवृत्तितः ॥ (१९३)
सञ्चितः समुदायः स सा[1] साध्यं तत्र चाक्षधीः ।
सामान्यबुद्धिश्चावश्यं विकल्पे नानुबध्यते ॥ (१९४)
[2]अर्थोन्तराभिसम्बन्धाज्जायन्ते येणवो परे ।
31a [उक्तास्ते सञ्चितास्ते][6] हि निमित्तं ज्ञानजन्मनः ॥ (१९५)
अणूनां सविशेषश्च नान्तरेणापरानणून् ।
तदेकानियमाज्ज्ञानमुक्तं सामान्यगोचरं ॥ (१९६)
अथैकायतनत्वेपि नानेकं दृश्यते सकृत् ।
सकृद् भूतावभासः[3] किं वियुक्तेषु तिलादिषु ॥ (१९७)
प्रत्युक्तं लाघवं [चात्र तेष्वेव क्रमपातिषु][1] ।
किं नाक्रमग्रहस्तुल्यकालाः सर्व्वाश्च बुद्धयः ॥ (१९८)
काश्चित्तास्वक्रमाभासाः क्रमवत्योऽपराश्च किं ।
सर्व्वार्थग्रहणे तस्मादक्रमोयं प्रसज्यते ॥ (१९९)
नैकं चित्रपतङ्गादि रूपं वा दृश्यते कथं ।
चित्रन्तदेकमिति चेदिदं चित्र[तरन्ततः][2] ॥ (२००)
[नैकस्वभा][2]वं चित्रं हि मणिरूपं यथैव तत् ।
नीलादिप्रविभा[4]गश्च तुल्यश्चित्रपटादिषु ॥ (२०१)
तत्रावयवरूपञ्चेत् केवलं दृश्यते तथा ।
नीलादीनि निरस्यान्यच्चित्रं चित्रं यदीक्षसे ॥ (२०२)

---

[1] PVM. सामान्यं ।
[2] PVM. अर्थान्तरा० ।
[3] PVM. सकृद्ग्रहा०, सकृद्दृष्टावभास···विभिन्नेषु इति भोटभाषान्तरे ।
[4] PVM. ०प्रतिभासश्च ।

तुल्यार्थाकारकालत्वेनोपलक्षि[तयोर्द्वयोः] ।
नानार्था क्रमवत्येका किमेकार्थाक्रमापरा ॥ (२०३)
वैश्वरूप्याद्धियामेव भावानां विश्वरूपता ।
तच्चेदनङ्गं केनेयं सिद्धा भेदव्यवस्थितिः ॥ (२०४)
विजातीनामनारम्भान्ना[१]लेख्यादौ विचित्रधीः ।
अरूप[त्वान्न][5] संयोगश्चित्रो भक्तेश्च नाश्रयः ॥ (२०५)
प्रत्येकमविचित्रत्वाद् गृहीतेषु क्रमेण च ।
न चित्रधीसङ्कलनमनेकस्यैकयाग्रहात् ॥ (२०६)
नान[२]र्थैका भवेत्तस्मात्सिद्धातोप्यविकल्पिका ।
विकल्पयन्न[३]प्येकार्थं य[तोऽन्यद्][6]पि पश्यति ॥ (२०७)

( चित्रैकत्वचिन्ता )

चित्रावभासेष्वर्थेषु यद्येकत्वं न युज्यते ।
सैव तावत्कथं बुद्धिरेका चित्रावभासिनी ॥ (२०८)
इदं वस्तुबलायातं यद्वदन्ति विपश्चितः ।
यथा यथार्था विद्य[४]न्ते विविच्यन्ते तथा तथा ॥[7] (२०९)
31b किं स्यात्सा चित्रतैकस्यां न स्यात्तस्यां मतावपि ।
यदीदं स्वयमर्थानां रोचते तत्र के वयं ॥ (२१०)
तस्मान्नार्थेषु न ज्ञाने स्थूलाभासस्तदात्मनः[५] ।
एकत्र प्रतिषिद्धत्वाद्[६] बहुष्वपि न सम्भवः ॥ (२११)
परिच्छेदोन्तरन्योन्यभासो बहिरिव स्थितः ।[७]
[ज्ञानस्याभे][1]दिनो भेद[७]प्रतिभासो ह्युपप्लवः ॥ (२१२)
तत्रैकस्याप्यभावे च[८] द्वयमप्यवहीयते ।
तस्मात्तदेव तस्यापि तत्त्वं या द्वयशून्यता ॥ (२१३)

---

[१] PVM. ०दालेख्यादौ न चित्रधीः। [२] PVM. नानार्थ्यैका।
[३] PVM. ०न्नाप्येकार्थं। [४] PVM. चिन्त्यन्ते विशीर्यन्ते।
[५] V. उद्धृतो न्यायवार्त्तिकतात्पर्यटीकायां पृ० ६६०। [६] PS. प्रतिबद्धत्वाद्।
[७] PVM. PS. ०न्योयं भागो। ०भेदिनौ भिन्नौ। भागो बहिरवस्थितः;
NR. (पृ० २७२) °च्छेदान्तराच्चायं भागो० ऽप्युपप्ल०।
[८] PVM. ०भावेन।



तद्भेदाश्रयिणी चेयं भावानां भेदसंस्थितिः ।
तदुपप्लवभावे च तेषां भेदोपि सम्भवः[१] ॥[2] (२१४)
न ग्राह्यग्राहकाकारबाह्यमस्ति च लक्षणं ।
अतो लक्षणशून्यत्वान्निःस्वभावाः प्रकाशिताः ॥ (२१५)
व्यापारोपाधिकं सर्व्वं स्कन्धादीनां विशेषतः ।
लक्षणं स च तत्त्वेषु[२] तेनाप्येते विलक्षणाः ॥ (२१६)
यथा [स्वप्र][3]त्ययापेक्षादविद्यो[३]पप्लुतात्मनां ।
विज्ञप्तिर्व्वितथाकारा जायते तिमिरादिवत् ॥ (२१७)
असंविदिततत्त्वा च सा सर्व्वापरदर्शनैः ।
असम्भवाद्विना तेषां ग्राह्यग्राहकविप्लवैः ॥ (२१८)
तदुपे[क्षिततत्त्वार्थैः कृत्वा][4]गजनिमीलनं ।
केवलं लोकबुद्ध्यैव बाह्यचिन्ता प्रतन्यते ॥ (२१९)
नीलादिचित्रविज्ञाने ज्ञानोपाधिर[न]न्यभाक् ।
अशक्यदर्शनस्थं[४] हि पतत्यर्थे विवेचयन् ॥ (२२०)
यद् यथा भासते ज्ञानं तत्तथैव प्रकाशते[५] ।
[इति नात्मै[६]][5]कभावः स्याच्चित्राकारस्य चेतसि ॥ (२२१)
पटादिरूपस्यैकत्वे तथा स्यादविवेकिता ।
विवेकी न विवक्षान्य[७]दविवेकी च नेक्ष्यते ॥ (२२२)
को वा विरोधो बहव[ः संजातातिशयाः पृथक्][6] ।
32a भवेयुः कारणं बुद्धेर्यदि नात्मेन्द्रियादिवत् ॥ (२२३)
हेतुभावादृते नान्या ग्राह्यता नाम काचन ।
तत्र बुद्धिर्यदाकारा तस्यास्तद् ग्राह्यमुच्यते ॥ (२२४)
कथं वाऽवयवी ग्राह्यः सकृत्स्वावयवैः सह ।
न हि गोप्रत्ययो दृष्टः सास्नादीनाम[दर्शने] ॥ (२२५)

---

[१] PVM. PS. भेदोप्युपप्लवः। [२] PS. PVM. तत्त्वन्न।
[३] PS. ०पेक्षमवि। [४] PS. ०क्यसमयस्तं। PVM. ०दर्शनस्त।
[५] PS. तत्तथैवानुभूयते। [६] PVM. नामैकभावः।
[७] PS. विवेकीनि विभक्तान्य०। PVM. विवेकीनि निरस्यान्यदा विवेकि च नेक्षते।

[गुणप्रधानाधिगमः स][1]हाप्यभिमतो यदि ।
सम्पूर्णाङ्गो न गृह्येत सकृन्नापि गुणादिमान् ॥ (२२६)
विवक्षापरतन्त्रत्वात् विशेषणविशेष्ययोः ।
यदङ्गभावेनोपात्तन्तत्तेनैव हि गृह्यते ॥ (२२७)
स्वतो वस्त्वन्तराभेदाद् गुणादेर्भेदकस्य च ।
[अग्रहादेकबुद्धिः स्यात् पश्य][2]तोप्यप[1]रापरं ॥ (२२८)
गुणादिभेदग्रहणान्नानात्वप्रतिपद्यदि ।
अस्तु नाम तथाप्येषां भवेत्सम्बन्धिसङ्करः ॥ (२२९)
शब्दादीनामनेकत्वात्सिद्धोनेकग्रहः सकृत् ।
सन्निवेशग्रहायोगादग्रहे सन्निवेशिनां ॥ (२३०)
[सर्वतो विनिवृ][3]त्तस्य विनिवृत्तिर्यतो यतः ।
तद्भेदाद् भिन्नलिङ्गा[2] सा धर्म्मिणोनेकरूपिता[3] ॥ (२३१)
ते कल्पिता रूपभेदा निर्व्विकल्पस्य चेतसः ।
न विचित्रस्य चित्राभाः कादाचित्कस्य गोचरः ॥ (२३२)
यद्यप्यस्ति सित[त्वादि यादृगिन्द्रियगो][4]चरः ।
न सोभिधीयते शब्दैर्ज्ञानयो रूपभेदतः ॥ (२३३)
एकार्थत्वेपि बुद्धीनां नानाश्रयतया स चेत् ।
श्रोत्रादिचित्तानीदानीं भिन्नार्थानीति तत्कुतः ॥ (२३४)
जातो नामाश्रयोन्योन्यः[4] चेतसां तस्य वस्तुनः ।
[एकस्यैव कुतो][5] रूपं भिन्नाकारावभासि तत् ॥ (२३५)
वृत्तेर्दृश्यापरामर्शे नाभिधानविकल्पयोः ।
दर्शनात्प्रत्यभिज्ञानं गवादीनां निवारितं ॥ (२३६)
अन्वयाच्चानुमानं यदभिधानविकल्पयोः ।
2b दृश्ये [गवादौ जात्या][6]देस्तदप्येतेन दूषितं ॥ (२३७)
दर्शनान्येव भिन्नान्यप्येकां कुर्व्वन्ति कल्पनां ।
प्रत्यभिज्ञानसंख्यातां स्वभावेनेति वर्णितं ॥ (२३८)

---

[1] PVM. पश्यतोपि परापरं ।
[2] PS. PVM. तद्भेदोन्नीतभेदा ।
[3] PS. PVM. रूपता ।
[4] नानाश्रयोन्योन्यः—इति भोटभाषान्तरे ।



(२) मानसप्रत्यक्षम्

पूर्व्वानुभूतग्रहणे मानसस्याप्रमाणता ।
अदृष्टग्रहणेन्धादेरपि स्यादर्थदर्शनं[1] ॥ (२३९)
क्षणिकत्वादतीतस्य दर्शने च न सम्भवः ।
वाच्यमक्षणिक[त्वे स्याल्लक्षणं)[1] सविशेषणं ॥ (२४०)
निष्पादितक्रिये कञ्चिद्विशेषमसमादधत् ।
कर्म्मण्यैन्द्रियमन्यद्वा साधनं किमितीष्यते ॥ (२४१)
सकृद्भावश्च सर्व्वासां धियां तद्भावजन्मनां ।
अन्यैरकार्यभेदस्य तदपेक्षाविरोधतः ॥ (२४२)
तस्मादिन्द्रियविज्ञानानन्तरप्रत्ययोद्भवः[2] ।
[मनोन्य]मेव गृह्णाति विषयं नान्धदृक् ततः ॥ (२४३)
स्वार्थान्वयार्थापेक्षैव हेतुरिन्द्रियजा मतिः ।
ततोन्यग्रहणेप्यस्य नियतग्राह्यता मता ॥ (२४४)
तदतुल्यक्रियाकालः कथं स्वज्ञानकालिकः ।
सहकारी भवेदर्थ इति चेदक्षचेतसः ॥ (२४५)
अजातपूर्व्वसामर्थ्या[3]त्[3] पश्चाच्चानुपयोगतः[4] ।
प्राग्भावः सर्व्वहेतूनां नातोर्थः स्वधिया सह ॥ (२४६)
भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः ।
हेतुत्वमेव युक्तिज्ञा ज्ञानाकारार्पणक्षमं[5] ॥ (२४७)
कार्यं ह्यनेकहेतुत्वेप्यनुकुर्व्वदुदेति यत् ।
तत्तेन[प्यत्र तद्रूपं गृहो][4]तमिति चोच्यते ॥ (२४८)

(३) स्वसंवेदनप्रत्यक्षम्

अशक्यसमयो ह्यात्मा रागादीनामनन्यभाक् ।
तेषां मतः[6] स्वसंवित्तिर्नाभिजल्पानुषङ्गिणी ॥ (२४९)

---

[1] PS. ०र्थवेदनं । [2] PS. ०द्भवं ।
[3] PS. PVM. असतः प्रागसा० ।
[4] पश्चान्नान्वययोगतः—इति भो० भा० ।
[5] NR. (पृ० २८३) हेतुत्वमेव तद्युक्तमिति पाठः SD. (शास्त्रदीपिकायां) पृ० ३३ ।
[6] PS. PVM. तेषामतः ।

अवंदकाः परस्यापि ते स्वरूपं कथं विदुः ।
एकार्थाश्रयिणा वेद्या विज्ञानेनेति केचन ॥ (२५०)
तदतद्रूपिणोभा[वास्तदतद्रूपहेतुजाः][5] ।
तत्सुखादि किमज्ञानं विज्ञानाभिन्नहेतुजं ॥ (२५१)
सार्थे सतीन्द्रिये योग्ये यथास्वमपि चेतसि ।
दृष्टं जन्म सुखादीनां तत्तुल्यं मनसामपि ॥ (२५२)
असत्सु सत्सु चैतेषु न जन्माजन्म वा कचित् ।
33a दृष्टं सुखादेर्बुद्धे[र्वा तत्ततो नान्यतश्च ते][6] ॥ (२५३)
सुखदुःखादिभेदश्च[१] तेषामेव विशेषतः ।
तस्या एव यथा बुद्धेर्म्मान्द्यपाटवसंश्रयाः ॥ (२५४)
यस्यार्थस्य निपातेन ते जाता धीसुखादयः ।
असत्सु[२] तं प्रतिपद्येत सुखादीनेव सा कथं ॥ (२५५)
अविच्छिन्नाथ भासेत तत्संवित्तिः क्रमग्रहे ।
तल्लाघवाच्चेत्तत्तुल्य[मित्यसम्वेदनं न किं ॥ (२५६)
न चैकया] [1]द्वयज्ञानं नियमादत्तचेतसः ।
सुखाद्यभावेप्यर्थाच्च जातौ[३] तच्छक्त्यसिद्धितः ॥ (२५७)
पृथक् पृथक् च सामर्थ्ये द्वयोर्न्नीलादिवत्सुखं ।
गृह्येत केवलं तस्य तद्धेत्वर्थमगृह्णतः ॥ (२५८)
न हि संवेदनं युक्तमर्थेनैव सहग्रहे ।
किं सामर्थ्यं सुखादीनां [नेष्टा धीर्यत्तदुद्भवा ॥ (२५९)
विनार्थेन][2] सुखादीनां वेदने चक्षुरादिभिः ।
रूपा[४]दिस्त्र्यादिभेदोक्त्या न गृह्येत कदाचन ॥ (२६०)
न हि सत्यन्तरङ्गेर्थे शक्तेर्धीर्ब्बाह्यदर्शनी ।
अर्थग्रहे सुखादीनां तज्जानां स्यादवेदनं ॥ (२६१)
धियोर्युगपदुत्पत्तौ तत्तद्विषय[सम्भवात्] ।[3]
[सुखदुःख]विदौ स्यातां सकृदर्थस्य सम्भवे ॥ (२६२)
सत्यान्तरेप्युपादाने ज्ञाने दुःखादिसम्भवः ।
नोपादानं विरुद्धस्य तच्चैकमिति चेन्मतं ॥ (२६३)

[१] PVM. ०भेदश्च । [२] PVM. मुक्त्वा ।
[३] SP. PVM. जातेः । [४] PVM. रूपादिः स्त्र्यादिभेदोऽक्ष्णा ।



तदज्ञानस्य विज्ञानं केनोपादानकारणं ।
आधिपत्ये[१] तु [कुर्व्वीत तद्विरुद्धेपि][4]दृश्यते ॥ (२६४)
अक्ष्णोर्यथैक आलोको नक्तञ्चरतदन्ययोः ।
रूपदर्शनवैगुण्यावैगुण्ये कुरुते सकृत् ॥ (२६५)
तस्मात्सुखादयोर्थानां स्वसङ्क्रान्तावभासिनाम् ।
वेदकाः स्वात्मनश्चैषामर्थेभ्यो ज[न्म केवलं ॥ (२६६)
अर्था][5]त्मा स्वात्मभूतो हि तेषां तैरनुभूयते ।
तेनार्थानुभवख्यातिरालम्बस्तु तदाभता ॥ (२६७)
कश्चिद् बहिःस्थितानेव सुखादीनप्रचेतनान् ।
ग्राह्यानाह न तस्यापि सकृद् युक्तो द्वयग्रहः ॥ (२६८)
सुखाद्यभिन्नरूपत्वान्नीलादेश्चेत्स[कृद्ग्रहः][6] ।
33b भिन्नावभासिनोर्ग्राह्यं चेतसोस्तदभेदि किं ॥ (२६९)
तस्याविशेषे बाह्यस्य भावनातारतम्यतः ।
तारतम्यञ्च बुद्धौ स्यान्न प्रीतिपरितापयोः ॥ (२७०)
सुखाद्यात्मतया बुद्धेरपि यद्यविरोधिता ।
स इदानीं कथं बाह्यः सुखाभ्या[२]सैर्हि गम्यते ॥ (२७१)
अग्राह्य[ग्राहकत्वाच्चे][1]द् भिन्नजातीययोः पुमान् ।
अग्राहकः स्यात्सर्व्वस्य ततो हीयेत भोक्तृता ॥ (२७२)
कार्यकारणतानेन प्रत्युक्ताऽकार्यकारणे ।
ग्राह्यग्राहकताभावाद्भावेन्यत्रापि सा भवेत् ॥ (२७३)
तस्मात्त आन्तरा एव सम्वेद्यत्वाच्च चेतनाः ।
संवेदनं न यद्रूपं न[2] [हि तत्तस्य वेदनं] ॥ (२७४)
अतत्स्वभावोऽनुभवो बौद्ध[ां][३]स्तान् समवैति चेत् ।
मुक्त्वाध्यक्षस्मृताकारां संवित्तिं बुद्धिरत्र का ॥ (२७५)
तांस्तानर्थानुपादाय सुखदुःखादिवेदनं ।
एकमाविर्भवद् दृष्टं न दृष्टं त्वन्यदन्तरा ॥ (२७६)
संसर्गादविभागश्चे[दयोगोलक][3]वह्निवत् ।
भेदाभेदव्यवस्थैवमुच्छिन्ना सर्ववस्तुषु ॥ (२७७)

[१] PVM. आधिपत्यं । [२] PVM. ०द्यात्मेति ।
[३] बुद्धिः—इति भो० भा० ।

अभिन्नवेदनस्यैक्ये यन्नैवं तद्विभेदवत् ।
सिध्येदसाधनत्वेस्य न सिद्धं भेदसाधनं ।। (२७८)
भिन्नाभः सितदुःखादिरभिन्नो बुद्धिवेदने ।
अभिन्न[ाभेदि[1] भिन्ने चेत् भे]'दाभेदौ किमाश्रयौ ।। (२७९)
तिरस्कृतानां पटुनाप्येकदाऽभेददर्शनात् ।
प्रवाहे वित्तिभेदानां सिद्धा भेदव्यवस्थितिः । (२८०)

(४) योगिज्ञानप्रत्यक्षम्——

प्रागुक्तं योगिनां ज्ञानं तेषां तद्भावनामयं ।
विधूतकल्पन[ाजालं स्पष्टमेवावभासते] ।। (२८१)
कामशोकभयोन्मादचौरस्वप्नाद्युपप्लुताः ।
अभूतानपि पश्यन्ति पुरतोवस्थितानिव ।। (२८२)
न विकल्पानुबद्धस्य स्पष्टार्थप्रतिभासिता[2] ।
स्वप्नेपि स्मर्यते स्मार्त्तं न च तत्तादृगर्थवत् ।। (२८३)
19b [3][अशुभा पृथिवी कृत्स्नाद्यभूतमपि वर्ण्यते ।
स्पष्टाभं निर्व्विकल्पञ्च भावनाबलनिर्म्मितं ।। (२८४)
तस्माद् भूतमभूतं वा यद् यदेवाभिभाव्यते ।
भावना परिनिष्पत्तौ तत्स्फुटा कल्पधीफलं ।। (२८५)
तत्र प्रमाणं सम्वादि यत् प्राङ्निर्णीतवस्तुवत् ।
तद्भावनाजं प्रत्यक्षमिष्टं शेषा उपप्लवाः ।। (२८६)
शब्दार्थग्राहि यद् यत्र तज्ज्ञानं तत्र कल्पना ।
स्वरूपञ्च न शब्दार्थस्तत्राध्यक्षमतोखिलं ।। (२८७)

७. प्रत्यक्षाभासचिन्ता

त्रिविधं कल्पनाज्ञानमाश्रयोपप्लवोद्भवं ।
अविकल्पकमेकञ्च प्रत्यक्षाभञ्चतुर्व्विधं ।। (२८८)
अनक्षजत्वसिद्ध्यर्थमुक्ते द्वे भ्रान्तिदर्शनात् ।
सिद्धानुमादिवचनं साधनायैव पूर्व्वयोः ।। (२८९)
संकेतसंश्रयान्यार्थसमारोपविकल्पने ।
प्र[4]त्यक्षासन्नवृत्तित्वात् कदाचिद् भ्रान्तिकारणं (२९०)

[1] PVM. अभिन्नाभे विभिन्ने । [2] PVM. ०स्यास्ति स्फुटार्थावभासिता ।
[3] PS. हस्तलेखतः । [4] PVM. न प्रत्यक्षानु० ।



यथैवेयं परोक्षार्थकल्पना स्मरणात्मिका ।
समयापेक्षिणी नार्थं प्रत्यक्षं प्रत्यव[1]स्यति ।। (२९१)
तथानुभूतस्मरणमन्तरेण पटा[3]दिषु[2] ।
न प्रत्ययोनुयँस्तच्च प्रत्यक्षात् परिहीयते ।। (२९२)
अपवादश्चतुर्थोत्र तेनोक्तमुपघातजं ।
केवलं तत्र तिमिरमुपघातोपलक्षणं ।। (२९३)
मानसं तदपीत्येके तेषां ग्रन्थो विरुध्यते ।
नीलद्विचन्द्रादिधियां हेतुरक्षाण्यपीत्ययं ।। (२९४)
पारम्पर्येण हेतुश्चे[4]दिन्द्रियज्ञानगोचरे ।
विचार्यमाणे प्रस्तावो मानसस्येह कीदृशः ।। (२९५)
किम्वैन्द्रियं यदक्षाणां भावाभावानुरोधि चेत् ।
तत्तुल्यं विक्रियावच्चेत् सैवेयं किं निषिध्यते ।। (२९६)
सर्प्पादिभ्रान्तिवच्चास्याः स्यादक्षविकृतावपि ।
निवृत्तिर्न निवर्त्तेत निवृत्तेप्यक्षविप्लवे[5] ।। (२९७)
कदाचिदन्यसन्ताने तथैवार्प्येत वाचकैः ।
दृष्टस्मृतिमपेक्षेत न भासेत परिस्फुटं ।। (२९८)
सुप्तस्य जाग्रतो वापि यैव धीः स्फुटभासिनी ।
सा निर्व्विकल्पोभयथाप्यन्यथैव विकल्पिका ।। (२९९)
तस्मात्तस्याविकल्पेपि प्रामाण्यं प्रतिषिध्यते ।
विसम्वादात् तदर्थञ्च[6] प्रत्यक्षाभं द्विधोदितं ।। (३००)

८. प्रमाणफलचिन्ता

क्रियासाधनमित्येव सर्व्वं सर्व्वस्य कर्म्मणः ।
साधनं नहि तत्तस्य साधनं या क्रिया यतः ।। (३०१)
तत्रानुभवमात्रेण ज्ञानस्य सदृशात्मनः ।
भाव्यं[3] तेनात्मना येन प्रतिकर्म्म विभज्यते ।। (३०२)
[अनात्मभूतो भेदोस्य विद्यमानोपि हेतुषु ।
भिन्ने कर्मण्यभिन्नस्य न भेदेन नियामकः ।। (३०३)

[1] PVM. अध्यवस्यति । [2] PVM. घटादिषु ।
[3]NR. (पृ० २७४) ० भाव्यन्ते० ।

तस्माद् यतो स्यात्मभेदादस्याधिगतिरित्ययं ।
क्रियायाः कर्मनियमः सिद्धा सा तत्प्रसाधना ॥(३०४)
अर्थेन घटयत्येनां न हि मुक्त्वार्थरूपतां ।
अन्यत्स्वभेदो[1] ज्ञानस्य भेदकोपि कथञ्चन ॥ (३०५)
तस्मा(त) प्रमेयाधिगतेः साधनं मेयरूपता[2] ।
साधनेन्यत्र तत्कर्म सम्बन्धो न प्रसिध्यति ॥ (३०६)
सा च तस्यात्मभूतैव तेन नार्थान्तरं फलम् ।
दधानं तच्च तामात्मन्यर्थाधिगमनात्मना ॥ (३०७)
सव्यापारमिवाभाति व्यापारेण स्वकर्मणि ।
तद्वशात्तद्व्यवस्थानादकारकमपि स्वयम् ॥ (३०८)
यथा फ[ल]स्य हेतूनां सदृशात्मतयोद्भवाद् ।
हेतुरूपग्रहो लोके[ऽ]क्रियावत्त्वेपि कथ्यते ॥ (३०९)
आलोचनाक्षसम्बन्धविशेषणधियामतः ।
नेष्टं प्रामाण्यमेतेषां व्यवधानात्क्रियां प्रति ॥ (३१०)

(प्रमाणफल-व्याख्या)

सर्वेषामुपयोगेपि कारकाणां क्रियां प्रति ।
यदन्त्यं भेदकं तस्यास्तत्साधकतमं मतम् ॥ (३११)
सर्वसामान्यहेतुत्त्वादक्षाणामस्ति नेदृशं ।
तद्भेदेपि ह्यभिन्नस्य तस्येदमिति[3] तत्कुतः ॥ (३१२)
एतेन शेषो[4] व्याख्यातं विशेषणधियां पुनः ।
अताद्रूप्येण[4] भेदोपि तद्वदन्यधियोपि वा ॥ (३१३)
नेष्टो विषयच्छेदोपि[5] क्रियासाधनयोर्द्वयोः ।
एकार्थत्वे द्वयं व्यर्थं न च स्या[6]त्क्रमभाविता ॥ (३१४)
साध्यसाधनताभावः सकृद्भावे धियोंशयोः ।
तद्व्यवस्थाश्रयत्वेन साध्यसाधनसंस्थितिः ॥ (३१५)

[1] PVM. अन्यः स्वभेदात् ।
[2] कारिकाद्वयमधिकं PS. PVM.
[3] PS. PVM. तद्भेदेपि ह्यतद्रूपस्यास्येदमिति ।
[4] PS. अनेन शेषं । PVM. अताद्रूप्ये न ।
[5] PS. PVM. विषयभेदोपि ।
[6] SP. न चास्ति ।



सर्व्वात्मनापि सम्बद्धं कैश्चिदेवावगम्यते[1] ।
धर्मैः स नियमो न स्यात् सम्बन्धस्याविशेषतः ॥ (३१६)
[2](तदभेदेपि भेदोयं यस्मात्तस्य प्रमाणता ।)
संस्काराच्चेदताद्रूप्ये न तस्याप्यव्यवस्थितेः ॥ (३१७)
क्रियाकरणयोरैक्यविरोध इति चेदसत् ।
धर्मभेदाभ्युपगमाद्वस्त्वभिन्नमितीष्यते ॥ (३१८)
एवंप्रकारा सर्व्वैव क्रियाकारकसंस्थितिः ।
भावे ह्य[3]भिन्नाभिमतेष्वध्यारोपेण वृत्तितः ॥ (२१९)

## ९. विज्ञप्तिमात्रताचिन्ता

### (१) अर्थसंवेदनचिन्ता

कार्थसम्विद्यदेवेदं प्रत्यक्षं प्रतिवेदनं ।
तदर्थवेदनं केन ताद्रूप्याद्व्यभिचारि तत् ॥ (३२०)
अथ सोनुभव (:) क्वास्य तदेवेदम्विचार्यते ।
सरूपयन्ति तत् केन स्थूलाभासाश्च[4] तेऽणवः ॥ (३२१)
तन्नार्थरूपता तस्य सत्यार्थाव्यभिचारिणी ।
तत्सम्वेदनभावस्य न समर्था प्रसाधने ॥ (३२२)
तत्सारूप्यतदुत्पत्ती यदि सम्वेद्यलक्षणं ।
सम्वेद्यं स्यात्समानार्थं विज्ञानं समनन्तरं ॥[5] (३२३)
इदं दृष्टं श्रुतम्वेदमिति यत्रावसायधीः ।
स तस्यानुभवः सैव प्रत्यासत्तिर्विचार्यते ॥ (३२४)
दृश्यदर्शनयोर्येन तस्य तत्साधनम्मतं[6] ।
तयोः सम्बन्धमाश्रित्य द्रष्टुरेष विनिश्चयः ॥ (३२५)
आत्मा स तस्यानुभवः स च नान्यस्य कस्यचित् ।
प्रत्यक्षप्रतिवेद्यत्त्वमपि तस्य तदात्मता ॥ (३२६)

[1] PS. देवानुभूयते ।
[2] PS. भोटभाषायाञ्चाधिकं श्लोकार्द्धम् ।
[3] PS. भावेष्व० । PVM. भावस्य ।
[4] PVM. ०भासञ्च ।
[5] VV. (पृ० ७९) ।
[6] PS. PVM. तद्दर्शनम्मतं ।

नान्योनुभाव्यस्तेनास्ति[1] तस्या नानुभवो परः।
तस्यापि तुल्यचोद्यत्वात्स्वयं सैव प्रकाशते[2] ॥ (३२७)
नीलादिरूपस्तस्यासौ स्वभावोनुभवश्च सः।
नीलाद्यनुभवः[3] ख्यातः स्वरूपानुभवोपि सन् ॥ (३२८)
प्रकाशमानस्तादात्म्यात्स्वरूपस्य प्रकाशकः।
यथाप्रकाशोभिमतस्तथा धीरात्मवेदिनी ॥ (३२९)
[4](तस्याश्चार्थान्तरे वेद्ये दुर्घटौ वेद्यवेदकौ।)
अवेद्यवेद्यकाकारा यथा भ्रान्तैर्न्निरीक्ष्यते ॥ (३३०)
विभक्तलक्षणग्राह्यग्राहकाकारविप्लवा।
तथाकृतव्यवस्थेयं केशादिज्ञानभेदवत् ॥ (३३१)
यदा तदा न संचोद्यग्राह्यग्राहकलक्षणा।
तदान्यसम्विदोभावात् स्वसम्वित्फलमिष्यते ॥ (३३२)
यदि बाह्योनुभूयेत को दोषो नैव कश्चन।
इदमेव किमुक्तं स्यात् स बाह्योर्थोनुभूयते ॥ (३३३)
यदि बुद्धिस्तदाकारा सास्त्याकारनिवेशिनी[5]।
सा बाह्यादन्यतो वेति विचारमिदमर्हति ॥ (३३४)
दर्शनोपाधिरहितस्याग्रहात्तद्ग्रहे ग्रहाद्।
दशनं नोलनिर्भासं नार्थो बाह्योस्ति केवल [:] ॥ (३३५)
कस्यचित् किञ्चिदेवान्तर्व्वासनायाः प्रबोधकम्।
ततो धियाम्विनियमो न बाह्यार्थव्यपेक्षया ॥ (३३६)
तस्माद् द्विरूपमस्त्येकं यदेवमनुभूयते।
स्मर्यते चोभयाकारस्यास्या[6]सम्वेदनं फलम् ॥ (३३७)
यदा निष्पन्नतद्भाव इष्टोनिष्टोपि वापरः।
विज्ञप्तिहेतुर्व्विषयस्तस्याश्चानुभवस्तथा ॥ (३३८)

---

[1] PS. भाव्यो बुद्ध्यास्ति। NR. (पृ० २७५) ० भाव्यो बुद्ध्याऽस्ति०। ग्राह्यग्राहकवैधुर्यात्।
[2] PS. तत्स्वयं तत्प्रकाशते।    [3] PVM. ०भवात्।
[4] PS. अधिकं श्लोकार्द्धं।    [5] PS. PVM. ०रविशेषिणी।
[6] PVM. ०स्यास्य।



यदा सविषयं ज्ञानं ज्ञानांशेर्थव्यवस्थितेः।
तदा य आत्मानुभवः स एवार्थविनिश्चयः ॥ (३३९)
यदीष्टाकार आत्मा स्यादन्यथा वानुभूयते।
इष्टोऽनिष्टोपि वा तेन भवत्यर्थः प्रवेदितः ॥ (३४०)
विद्यमानेपि बाह्येर्थे यथानुभवमेव सः।
निश्चितात्मा स्वरूपेण नानेकात्मत्त्वदोषतः ॥ (३४१)
यदि बाह्यं न विद्येत कस्य सम्वेदनम्भवेत्
यद्यगत्या स्वरूपस्य बाह्यस्यैव न किम्मतं[1] ॥ (३४२)
अभ्युपायोपभेदेन[2] न स्यादनुभवो द्वयोः।
अदृष्टावरणान्नो चेन्न[3] नामार्थवशा गतिः ॥ (३४३)
तम[ने]कात्मकं भावमेकात्मत्त्वेन दर्शयेत्[4]।
तददृष्टं कथन्नाम भवेदर्थस्य वेदकम्[5] ॥ (३४४)
35a [इ]ष्टानिष्टावभासिन्यः कल्पना नाक्षधीर्यदि।
अनिष्टादावसन्धानं[6] इष्टं[7] तत्रापि चेतसां ॥ (३४५)
तस्मात्प्रमेये[8] बाह्येपि युक्तं स्वानुभवः फलं।
यतः स्वभावोस्य यथा तथैवार्थविनिश्चयः ॥ (३४६)
तदार्थाभासतैवास्य प्रमाणं न तु सन्नपि।
[ग्राहकात्माऽपरार्थत्वा[1]द् बाह्येष्वर्थेष्वपेक्ष]ते[9] ॥ (३४७)
यस्माद्[10] यथा निविष्टोसावर्थात्मा प्रत्यये तथा।
निश्चीयते निविष्टोसावेवमित्यात्मसंविदः ॥ (३४८)
इत्यर्थसंवित्सैवेष्टा यतोर्थात्मा न दृश्यते।
तस्या[11] बुद्धिनिवेश्यार्थः[12] साधनं तस्य सा क्रिया ॥ (३४९)
यथा निविशते सो[ऽर्थो ज्ञाने तद्वत्प्रकाशते[13]।
अर्थ][2]स्थितेस्तदात्मत्वात्स्वविदप्यर्थविन्मता ॥ (३५०)

---

[1] PS. PVM. नास्तीयं कारिका।    [2] PS. PVM. अभ्युपायेपि भेदेन।
[3] PS. PVM. अदृष्टावरणात् स्याच्चेन्न।    [4] PVM. दर्शयत्।
[5] PS. PVM. ०दर्शकम्।    [6] अनिष्टादावसत्त्वानां—इति वार्तिकालंकारपुस्तके।    [7] दृष्टं—इति PVT. PVM. VA. VB. भो० भा० च।
[8] तस्मात्प्रत्यये—इति VA.    [9] ष्वपेक्ष्यते—इति VA.    [10] PS. यथा।
[11] PVM. तस्माद्।    [12] VA. निवेश्यर्थः।
[13] PS. PVM. ०र्थोयतः सा प्रथते तथा।

तस्माद्विषयभेदोपि न स्वसंवेदनं फलं ।
उक्तं स्वभावचिन्तायां तादात्म्यादर्थसंविदः ॥ (३५१)
तथा[३] वभासमानस्य तादृशोन्यादृशोपि वा ।
ज्ञानस्य हेतुरर्थोपीत्यर्थस्येष्टा प्रमेयता ॥ (३५२)
यथाकथञ्चिन्नास्यार्थरूपं[१] युक्त्यावभासिनः ।
अर्थग्रहः कथं सत्यं न जानेहमपीदृशं ॥ (३५३)
[२]अविभागोपि बुद्ध्यात्मा विपर्यासित[4]दर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिति[३] लक्ष्यते ॥ (३५४)
मंत्राद्युपप्लुताक्षाणां यथामृच्छकलादयः[४] ।
अन्यथैवावभासन्ते तद्रूपरहिता अपि ॥ (३५५)
तथैवादर्शनात्तेषामनुपप्लुतचक्षुषां[५] ।
[दूरे यथा वा मरुषु ][5] महानल्पोपि दृश्यते ॥ (३५६)
यथानुदर्शनञ्चेयं मेयमानफलस्थितिः ।
क्रियते (ऽ) विद्यमानापि ग्राह्यग्राहकसंविदां ॥ (३५७)
अन्यथैकस्य भावस्य नानारूपावभासिनः ।
सत्यं[६] कथं स्युराकारास्तदेकत्वस्य हानितः ॥[6] (३५८)
35b [अन्यस्या[७]न्य]त्वहानेश्च नाभेदो रूपदर्शनात् ।
रूपाभेदे[८]पि पश्यन्तो धीरभेदं व्यवस्यति ॥ (३५९)
भावा येन निरूप्यन्ते तद्रूपं नास्ति तत्त्वतः ।
यस्मादेकमनेकं वा[९] रूपं तेषां न विद्यते ॥ (३६०)
साधर्म्यदर्शनाल्लोके भ्रान्तिर्न्नामोपजायते ।
[अतदात्मनि[1] तादा]त्म्यव्यवसायेन नेह तत् ॥ (३६१)
अदर्शनाज्जगत्यस्मिन्नेकस्यापि तदात्मनः ।
अस्तीयमपि यात्वन्तरुपप्लवसमुद्भवा ॥ (३६२)

---

[१] PVM. PS. ०चित्तस्यार्थ ० PVM. ० मुक्तावभा० ।
[२] NR. श्लोकवार्त्तिकव्याख्यायां न्यायरत्नाकरे पृ० २७२ ।
[३] PS. PVM. NR. भेदवानिव । [४] PS. ते वै मृ० ।
[५] VA. चेतसाम् ।
[६] NR. (पृ० २८६) ०थैकत्वभावः स्याज्ज्ञानाकाराव० । सत्त्वं० तथैकत्व० PS. सत्या । [७] अन्यस्थान्य—VA.
[८] VA. रूपात् भेदं हि । [९] च—इति VA. PVM.



दोषोद्भवा प्रकृत्या सा वितथप्रतिभासिनी ।
अनपेक्षितसाधर्म्यदृगादि[स्तैमिरादिवत् ॥ (३६३)
तत्र[२] बु]द्धेः परिच्छेदो[१] ग्राहकाकारसम्मतः ।
तादात्म्यादात्मवित्तस्य स तस्याः साधनं ततः[२] ॥ (३६४)
तत्रात्मविषये माने यथा रागादिवेदनं ।
इयं सर्व्वत्र संयोज्या[३] मानमेयफलस्थितिः ॥ (३६५)
तत्राप्यनुभवात्म[त्वात्ते योग्या स्वात्म[3]संवि]दि ।
इति सा योग्यता मानमात्मा मेयः फलं स्ववित् ॥ (३६६)
ग्राहकाकारसंख्याता परिच्छेदात्मतात्मनि ।
सा योग्यतेति च प्रोक्तं प्रमाणं स्वात्मवेदनं ॥ (३६७)
सर्व्वमेव हि विज्ञानं विषये[भ्यः समुद्भवद् ।
तद[4]र्थ][४]स्यापि हेतुत्वे कथं [५]स्याद्विषयाकृति ॥ (३६८)
यथैवाहारकालादिर्हेतुत्वेऽपत्यजन्मनि[६] ।
पित्रोस्तदेकस्याकारं धत्ते नान्यस्य कस्य[4]चित् ॥ (३६९)
तद्धेतुत्वेन तुल्येपि तदन्यविषयं [७]मतं ।
विष[यत्वं] तद[ङ्गे[5]न[८] तदभावे न तद्भवे]त् ॥ (३७०)
अनर्थाकारशङ्का स्यादप्यर्थवति चेतसि ।
अतीतार्थग्रहे सिद्धे द्विरूपत्वात्मवेदने[९] ॥ (३७१)
नीलाद्याभासभेदित्वान्नार्थो जातिरतद्वति ।
सा वा नित्या न जातिः [स्यान्नित्या वा जनिका कथं ॥[6] (३७२)
36a नामादिकं निषिद्धं प्राङ् नायमर्थवतां क्रमः ।
इच्छामात्रानुबन्धित्वाद[१०]र्थशक्ति[र्] न सिध्यति ॥ (३७३)

(२) स्मृतिचिन्ता

स्मृतिश्चेदृग्विधं ज्ञानं तस्याश्चानुभवाद्भवः ।
स चार्थाकाररहितः सेदानीं तद्वती कथं ॥ (३७४)

---

[१] PS. परिच्छेदे । [२] VA. साधनं ततः । PVM. तस्य साधनं ततः ।
[३] PS. ०त्र योज्या सा । [४] PS. PVM. तदन्य० ।
[५] PVM. कथञ्चिद् । [६] PS. PVM. ०कालादेर्हे० ।
[७] PS. VA. PVM. तदन्यैर्व्विषये । [८] PVM. तदंशेन ।
[९] VA. कथं चिदात्म० । [१०] PS. PVM.० मात्रानुरोधि ० ।

नार्थाद्भावस्तदाऽभावात्स्या[त्तथानुभवेपि सः ।[1]
आकारः स च ] नार्थस्य स्पष्टाकारविवेकतः ॥ (३७५)
व्यतिरिक्तं तमाकारं[१] प्रतीयादपरस्तथा ।
नित्यमात्मनि सम्बन्धे प्रतीयात्कथितञ्च न ॥ (३७६)
एकैकेनाभिसम्बन्धे प्रतिसन्धिर्न्न युज्यते ।
एकार्थाभिनिवेशात्मा [ प्रवक्तृश्रोतृचेतसोः ॥ (३७७)
तदेकव्यवहारश्चेत्सादृश्यादतदाभयोः ।[2]
भिन्नात्मार्थः कथं ग्राह्यस्तदा स्याद्धीरनर्थिका ॥ (३७८)
तच्चानुभवविज्ञानमु[२]भयाङ्शावलम्बिना ।
एकाकारविशेषेण तज्ज्ञानेनानुबध्यते[२] ॥ (३७९)
[अन्यथा ह्यतदाकारं कथं][३] ज्ञानेऽधिरोहति ।[3]
एकाकारोत्तरं ज्ञानं तथाह्युत्तरमुत्तरं ॥ (३८०)
तस्यार्थरूपेणा[४]कारावात्माकारश्च कश्चन ।
द्वितीयस्य तृतीयेन ज्ञानेन हि विविच्य[५]ते ॥ (३८१)
अर्थकार्यतया ज्ञान [स्मृतावर्थस्मृतेर्यदि ।
भ्रा] न्त्या[4] सङ्कलनं ज्योतिर्म्मनस्कारे च सा भवेत् ॥ (३८२)
सर्वेषामपि कार्याणां कारणैः स्यात्तथा ग्रहः ।
कुलालादिविवेकेन न स्मर्येत घटस्ततः ॥ (३८३)
यस्मादतिशया(ज् )ज्ञानमर्थसंसर्गभाजनं ।
[सारूप्यात्तत्किमन्यत्स्याद्[६] दृष्टे]श्च यमलादिपु ॥ (३८४)
आद्यानुभयरूपत्वे ह्येकरूपे व्यवस्थितं ।
द्वितीयं व्यतिरिच्येत न परामर्शचेतसा ॥ (३८५)
अर्थसंकलनाश्लेषा धीर्द्वितीयावलम्बते ।
नीलादिरूपेण धियं [भासमानां पुरस्ततः[6] ॥ (३८६)
36b अन्यथाह्याद्यमेवैकं संयोज्येतार्थसम्भवात् ।
ज्ञानं नादृष्टसम्बन्धं पूर्व्वार्थेनोत्तरोत्तरं ॥ (३८७)

---

[१]PVM. तदाकारं । [२]PVM. ०विज्ञानेनोभयांशा०। PS. स्वज्ञानेना० ।
[३] PS. ह्यतदारूढं । PVM. ०तथारूपं । [४] VA. तस्यार्थरुपेण ।
[५] VA. विभाव्यते । [६] PS. सारूप्य० ।



सकृत्संवेद्यमानस्य नियमेन धिया सह ।
विषयस्य ततोन्यत्वं केनाकारेण सिध्यति ॥ (३८८)
भेदश्च भ्रान्ति[१]विज्ञानैर्दृश्येते[न्दाविवाद्वये ।][1]
[सम्वित्तिनियमो नास्ति भिन्नयोर्नीलपीतयोः ॥ (३८९)
नार्थोऽसं] वेदनः कश्चिदनर्थस्यापि[२] वेदनं ।
दृष्टं सम्वेद्यमानं तत् तयोर्न्नास्ति विरोधिता[३] ॥ (३९०)
तस्मादर्थस्य दुर्व्वारं ज्ञानकालावभासिनः ।
ज्ञानादव्यतिरेकित्वं हेतुभेदानुमा भवेत् ॥ (३९१)
अभावादक्षबुद्धीनां सत्स्वप्यन्येषु हेतुषु ।
नि [यमं यदि न ब्रूयाद्[2] प्रत्ययात्सम]नन्तरात् ॥ (३९२)
बीजादङ्कुरजन्माग्नि[४]र्धूमात्सिद्धिरितीदृशी ।
बाह्यार्थाश्रयिणी यापि कारकज्ञापकस्थितिः[५] ॥ (३९३)
सापि तद्रूपनिर्भासास्तथा नियतसङ्गमाः ।
बुद्धीराश्रित्य कल्पेत यदि किं वा विरुध्यते ॥ (३९४)
अनग्निजन्यो धू[मः स्यात्तत्कार्या[3]त्कारणेऽगतिः ।]
न स्यात् कारणतायाम्वा कुत एकान्ततो गतिः ॥ (३९५)
तत्रापि धूमाभासा धीः प्रबोधपटुवासनां[६] ।
गमयेद[७]ग्निनिर्भासान्धियमेव न पावकं ॥ (३९६)
तद्योग्यवासनागर्भ एव धूमावभासिनीं ।
व्यनक्ति चित्तसन्तानो धियं धू[मोग्नितस्ततः ॥[4] (३९७)
अस्त्येष वि]दुषां वादो बाह्यन्त्वाश्रित्य वर्ण्यते ।
द्वैरूप्यं सहसंवित्तिनियमात्तच्च सिध्यति ॥ (३९८)
ज्ञानमिन्द्रियभेदेन पटुमन्दाविलादिकां ।
प्रतिभासभिदामर्थे बिभ्रदेकत्र दृश्यते ॥ (३९९)
अर्थस्याभिन्नरूपत्वादेकरूपं [भवेन्मनः ।
सर्वं तदर्थमर्था][5]श्चेत्तस्य नास्ति तदाभता ॥ (४००)

---

[१] PVM. भ्रान्त०; VV. (पृ० ७९) । [२]PS. PVM. ०नर्थं वापि ।
[३] VA. PVM. विवेकिता । [४] PS. ०जन्मादे । PVM. ०जन्माग्नेः ।
[५]PS. ०रकव्यापकस्थितिः । [६]PS. पटुवासनी । [७]PS. गमयत्य० ।

अर्थाश्रयेणोद्भवतस्तद्रूपमनुकुर्व्वतः ।
तस्य केनचिदंशेन[1] परतोपि भिदा भवेत् ॥ (४०१)
तथा ह्याश्रित्य पितरं तद्रूपो हि सुतः पितुः ।
भेदं केनचिदंशेन कुतश्चिदवलम्बते ॥ (४०२)
[मयूरचन्द्रकाकारं नी]ललोहितभास्वरं ।[6]
37a सम्पश्यन्ति प्रदीपादेर्म्मण्डलं मन्दचक्षुषः ॥ (४०३)
तस्य तद्बाह्यरूपत्वे का प्रसन्नेक्षणेऽक्षमा ।
भूतं पश्यंश्च[2] तद्दर्शी[3] कथञ्चोपहतेन्द्रियः[4] ॥ (४०४)
शोधितं तिमिरेणा[स्य व्यक्तं च]क्षुरतीन्द्रियं ।
पश्यतोन्याद्दय[5]दृश्ये[र्थे तदव्यक्तं कथं पुनः ॥[1] (४०५)
आलोकाक्षमनस्कारादन्]न्यस्यैकस्य गम्यते ।
शक्तिर्हेतुस्ततो नान्योऽहेतुश्च विषयः कथं ॥ (४०६)
स एव यदि धीहेतुः किं प्रदीपमपेक्षते ।
दीपमात्रेण धी[6]भावादुभयन्नापि[7] कारणं ॥ (४०७)
दूरासन्नादिभेदेन व्यक्ताव्यक्तं न युज्यते ।
तत्स्यादा[लोकभेदाच्चेत्तत्पिधानापि[2]धान]योः ॥ (४०८)
तुल्या दृष्टिरदृष्टिर्वा सूक्ष्मोंऽशस्तस्य कश्चन ।
आलोकेन न मन्देन दृश्यतेऽतो भिदा यदि ॥ (४०९)
एकत्वेऽर्थस्य बाह्यस्य दृश्यादृश्यभिदा कुतः ।
अनेकत्वेऽणुशो भिन्ने दृश्यादृश्यभिदा कुतः ॥ (४१०)
मान्द्यपाटवभे[देन भासो बुद्धिभिदा यदि ।[3]]
भिन्नेऽन्यस्मिन्नभिन्नस्य कुतो भेदेन भासनं ॥ (४११)
मन्दं तदपि तेजः किमावृत्तेरिह सा न किम् ।
तनुत्वात्तेजसोप्येतदस्त्यन्यत्राप्यतानवं ॥ (४१२)
अत्यासन्ने च सुव्यक्तं तेजस्तत्स्याददतिस्फुटं ।
तत्राप्यदृष्टमाश्रित्य भवेद्रूपा[न्तरं यदि ॥ (४१३)

---

[1] VA.० दंगेन । [2] PS. पश्यन्न ।
[3] VA. भूतमपश्यंस्त—भो० भा० च ।
[4] PS. कथं वोपह० । [5] PVM. ०न्याक्ष० ।
[6] VA. दीपमात्रेण सद्भावात् । [7] PS. ०दुभयन्नात्र ।



अन्योन्यावरणात्[4]] तेषां स्यात्तेजोविहतिस्ततः ।
तत्रैकमेव दृश्येत तस्यानावरणे सकृत् ॥ (४१४)
पश्येत् स्फुटास्फुटं रूपमेकोऽदृष्टेन वारणे ।
अर्थानर्थौ न येन स्तस्तददृष्टं करोति किं ॥ (४१५)
तस्मात्सम्विद् यथा हेतुर्जायमानार्थसंश्रयात् ।
[प्रतिभासभिदां धत्ते शेषाः][5] कुमतिदुर्न्नयाः ॥ (४१६)
ज्ञानशब्दप्रदीपानां प्रत्यक्षस्येतरस्य वा ।
जनकत्वेन पूर्व्वेषां क्षणिकानाम्विनाशतः ॥ (४१७)
व्यक्तिः कुतोऽसतां ज्ञानादन्यस्यानुपकारिणः ।
व्यक्तौ व्यज्येत सर्व्वोर्थस्तद्धेतोर्नियमो [यदि ॥ (४१८)
37b नैषापि कल्पना ज्ञा][6]ने ज्ञानं त्वर्थावभासतः ।
तं व्यनक्तीति कथ्येत तदभावेपि तत्कृतं ॥ (४१९)
नाकारयति चान्योर्थोऽनुपकारात्सहोदितः ।
व्यक्तौ नाकारयज्ज्ञानं[1] स्वाकारेण कथं भवेत् ॥ (४२०)
बज्रोपलादिरप्यर्थः स्थिरः सोन्यानपेक्षणात् ।
सकृत्सर्वस्य[जनयेज्ज्ञानानि जगतः समं ।।[4] (४२१)
क्रमाद्भव]न्ति तान्यस्य सहकार्युपकारतः ।
आहुः प्रतिक्षणं भेदं स दोषो[2]त्रापि पूर्ववत् ॥ (४२२)

## (३a.) स्वसंवेदनचिन्ता

सम्वेदनस्य तादात्म्ये न विवादोऽस्ति कस्यचित् ।
[3]तस्यार्थरूपता[5][ऽ]सिद्धा सापि सिध्यति संस्मृतः ॥ (४२३)
भेदेनाननुभूतेस्मिन्नविभक्ते स्वगोचरैः ।
[एवमेतन्न खल्वेवमिति सा स्यान्न[2]] भेदिनो ॥ (४२४)
न चानुभवमात्रेण कश्चिद्भेदो विवेचकः ।
विवेकिनो न चास्पष्टभेदे धीर्यमलादिवत्[4] ॥ (४२५)
द्वैरूप्यसाधनेनापि प्रायः सिद्धं स्ववेदनं ।
स्वरूपभूताभासस्य तदा संवेदनेक्षणात् ॥ (४२६)

---

[1] PVM. व्यक्तो। PS. व्यक्तेर्नाकारयन् । [2] VA. तद्दोषो ।
[3] VA. तस्यार्थरूपा । [4] PS. भेदधी० ।

[धियाऽतद्रूपया ज्ञाने निरुद्धे][3]ऽनुभवः कुतः[1] ।
स्वञ्च रूपं न सा वेत्तीत्युत्सन्नोनुभवोर्थिनः[2] ॥ (४२७)
बहिर्मुखञ्च तज्ज्ञानं भात्यर्थप्रतिभासवत् ।
बुद्धेश्च ग्राहिका बुद्धि[3]र्न्नित्यमन्तर्मुखात्मनि ॥ (४२८)
यो यस्य विषयाभासस्तम्वेत्ति न तदित्यपि ।
प्राप्ता[4] [का सम्विदन्यास्ति ताद्रूप्यादितिचे][4]न्मतं ॥ (४२९)
प्राप्तं संवेदनं सर्व्वसदृशानां परस्परं ।
बुद्धिः स्वरूपा[5] तद्विच्चेत् नेदानीं वित्सरूपिका ॥ (४३०)
स्वयं सोनुभवस्तस्या न स सारूप्यकारणः ।
क्रियाकर्म्मव्यवस्थायास्तल्लोके [6]स्यान्निबन्धनं ॥ (४३१)
[स्वभावभूततद्रूपसंविदा][5]रोपविप्लवात् ।
नीलादेरनुभूताख्या नानुभूतेः परात्मनः ॥ (४३२)
धियो नीलादिरूपत्वे बाह्योर्थः किंप्रमाणकः ।
धियोऽनीलादिरूपत्वे स तस्यानुभवः कथं ॥ (४३३)
यदासंवेदनात्त्मत्वं[7] न सारूप्यनिबन्धनं ।
[सिद्धं तत्स्वत एवास्य किमर्थेनोपनीयते][6] ॥ (४३४)
[8][सर्व्वात्मना हि सारूप्ये ज्ञानमज्ञानतां व्रजेत्[9] ।
साम्ये[10] केनचिदङ्शेन स्यात्सर्व्वं सर्व्ववेदनं[11]॥ (४३५)
यथा नीलादिरूपत्त्वान्नीलाद्यनुभवो मतः ।
तथानुभवरूपत्त्वात्तुल्यो[12]ऽप्यनुभवो भवेत् ॥ (४३६)
नानुभूतोनुभव इत्यर्थवत्तद्विनिश्चयः ।
तस्माददोष इति चेत् नार्थेप्यस्त्येष सर्व्वदा ॥ (४३७)
कस्माद्वानुभवे नास्ति सति सत्तानिबन्धने ।
अपि चेदं यदाभाति दृश्यमाने सितादिके ॥ (४३८)

---

[1] PS. PVM. कथं । [2] PVM. ऽखिलः । [3] PVM. वित्ति ० ।
[4] PS. प्राप्तं । [5] PS. PVM. सरूपा । [6] PS. व्यवस्थायां त० ।
[7] PS. PVM. यदा न संवे० । [8] PS. (४३५–५२५)
[9] PS. PVM. न च सर्वात्मना साम्यमज्ञानत्वप्रसङ्गतः । [10]PVM. न च ।
[11] PS. PVM. ०शेन सर्वं सर्वस्य वेदनं । NR. (पृ० २७५) एकदेशेन सारूप्ये सर्वः स्यात् सर्ववेदकः । सर्वात्मना तु० [12] PVM. तस्याप्य ।



पुंसः[1] सिताद्यभिव्यक्तिरूपं सम्वेदनं स्फुटम्[2] ।
तत्किं सिताद्यभिव्यक्तेः[3] पररूपमथात्मनः ॥ (४३९)
पररूपेऽप्रकाशायां व्यक्तौ व्यक्तं कथं सितं[4] ।
ज्ञानं व्यक्तिर्न सा व्यक्तेत्यव्यक्तमखिलं जगत् ॥ (४४०)
व्यक्तेर्व्यक्त्यन्तरव्यक्तावपि दोषप्रसङ्गतः ।
दृष्ट्या वाज्ञातसम्बन्धम्विशिनष्टि तया कथम् ॥ (४४१)
यस्माद् द्वयोरेकगतौ न द्वितीयस्य दर्शनम् ।
द्वयोः संसृष्टयोर्दृष्टौ स्याद् दृष्टमिति निश्चयः ॥ (४४२)
सरूपं दर्शनं यस्य दृश्यतेन्येन चेतसा ।
दृष्टाख्यातन्न चेत्सिद्धं सारूप्येस्य स्ववेदनम् ॥ (४४३)
अथात्मरूपन्नो वेत्ति पररूपस्य वित्कथम् ।
सारूप्याद्वेदनाख्या च प्रागेव प्रतिपादिता ॥ (४४४)
दृष्टयोरेव सारूप्यग्रहोर्थञ्च न दृष्टवान् ।
प्राक् कथन्दर्शनेनास्य सारूप्यं सोध्यवस्यति ॥ (४४५)
सारूप्यमपि नेच्छेद्यः तस्य नोभयदर्शनं ।
तदार्थो ज्ञात[5]मिति च ज्ञाते चेति गता कथा ॥ (४४६)
अथ स्वरूपं न[6] तर्हि स्वयमेव प्रकाशते ।
यत्तस्यामप्रकाशायामर्थः स्यादप्रकाशितः ॥ (४४७)
एतेनानात्मवित्पक्षे सर्व्वार्थादर्शनेन ये ।
अप्रत्यक्षां धियं प्राहुस्तेपि निर्व्वर्णितोत्तराः ॥ (४४८)
आश्रयालम्बनाभ्यासभेदाद् भिन्नप्रवृत्तयः ।
सुखदुःखाभिलाषादिभेदा बुद्धय एव ताः ॥ (४४९)
प्रत्यक्षाः तद्विविक्तञ्च नान्यत्किञ्चिद्विभाव्यते ।
तथा सति परोप्येनान् [7]भुञ्जीतान्येन विद्यदि ॥ (४५०)

---

[1] PS. पुंसां । [2] स्वभाववेदनद्योतं किमिदमुत्पत्तिभासकम् ॥ इत्यधिको भो० भा० ।
[3] PS. किं तत् सिता० ।
[4] PS. पररूपप्रकाशायां व्यक्तौ व्यक्तं सितं कथम् ।
[5] PVM. ज्ञान० ।
[6] PS. PVM. सा । [7] PS. PVM. यत्तज्ज्ञानं परोप्येतान् ।

तज्जा तत्प्रतिभासा वा यदि धीर्वेत्ति नापरा ।
आलम्बमानस्यान्यस्याप्यस्त्यवश्यमिदं[१] द्वयम् ।। (४५१)
अथ नोत्पद्यते तस्मान्न च तत्प्रतिभासिनी।
सा धीर्न्निर्विषया प्राप्ता सामान्यञ्च तदग्रहे ।। (४५२)
न गृह्यत इति प्रोक्तं न च तद्वस्तु किञ्चन ।
तस्मादर्थावभासोसौ नान्यस्तस्या धियस्ततः ।। (४५३)
सिद्धे प्रत्यक्षभावात्मविदा गृह्णाति तत्पुनः[२] ।
नाध्यक्षमिति चेदेष कुतो भेदः समार्थयोः ।। (४५४)
अदृष्टैकार्थयोगादेः सम्विदो नियमो यदि ।
सर्व्वथान्यो न गृह्णीयात्सम्विद्भेदोप्यपोदितः ॥ (४५५)
येषाञ्च योगिनोन्यस्य प्रत्यक्षेण सुखादिकं ।
विदन्ति तुल्यानुभवास्तद्वत्तेपि[३] स्युरातुराः ॥ (४५६)
विषयेन्द्रियसम्पाताभावात्तेषां तदुद्भवं ।
नोदेति दुःखमिति चेत् न वै दुःखसमुद्भवः ॥ (४५७)
दुःखासम्वेदनं[४] किन्तु दुःखे ज्ञानसमुद्भवः[५] ।
दुःखोपकारयोर्हेतुर्नहि दुःखाद्यवेदने[६] ।। (४५८)
भासमानं स्वरूपेण पीडा दुःखं स्वयं यदा ।
न तदालम्बनं ज्ञानं न तदैवं प्रयुज्यते ॥ (४५९)
भिन्ने ज्ञानस्य सर्व्वस्य तेनालम्बनवेदने ।
अर्थसारूप्यमालम्ब्य[७] आत्मवित्तिः स्वयं स्फुटः ॥ (४६०)
[अपि चाध्यक्षताऽभावे धियः स्याल्लिङ्गतो गतिः ।
तच्चाक्षमर्थो धीः पूर्व्वो मनस्कारोपि वा भवेत् ॥ (४६१)]
कार्यकारणसामग्र्यामस्यां सम्बन्धिनापरं ।
सामर्था[?र्थ्या]दर्शनात्तत्र नेन्द्रियं व्यभिचारतः ।। (४६२)
तथार्थौ धीमनस्कारौ ज्ञानं तौ च न सिध्यतः ।
नाप्रसिद्धस्य लिङ्गत्वं व्यक्तिरर्थस्य चेन्मता ।। (४६३)

[१] PS. ० न स्यादन्यस्या०; VA. आलम्बनस्या नास्या० ।
[२] PS. तान् पुनः । [३] PS. तद्वदेव ।
[४] PS. PVM. दुःखस्य वेदनं । [५] PS. दुःखाज्ज्ञान० ।
[६] PS. PVM. न हि दुःखाद्यसम्वेद्यं पीडानुग्रहकारणं ।
[७] PS. PVM. ०रूपमालम्ब० ।



लिङ्गं सैव ननु ज्ञानं व्यक्तोर्थोनेन वर्णितः ।
व्यक्तावननुभूतायां तद्व्यक्तत्वाविनिश्चयात् ।। (४६४)
अथार्थस्यैव कश्चित्स विशेषो व्यक्तिरिष्यते ।
नानुत्पादव्ययवतो विशेषोऽर्थस्य कश्चन ॥ (४६५)
तदिष्टौ वा प्रतिज्ञानं क्षणभङ्गः प्रसज्यते ।
स च ज्ञातोऽथवाऽज्ञातो भवेज्ज्ञातस्य लिङ्गता ।। (४६६)
यदि ज्ञाते[ऽ]परिच्छिन्ने ज्ञातोसाविति तत्कुतः ।
ज्ञातत्वे ना परिच्छिन्नमपि तद् गमकं कथम् ।। (४६७)
अदृष्टदृष्टयोर्थेन दृष्टादृष्टा न हि क्वचित् ।
विशेषः सोन्यदृष्टावप्यस्तीति स्यात्स्वधीगतिः ।। (४६८)
तस्मादनुमितिर्बुद्धेः स्वधर्मनिरपेक्षिणः ।
केवलान्नार्थधर्मात्कः स्वधर्मः स्वधियो परः ।। (४६९)
यः[१] प्रत्यक्षो धियो हेतुः तुल्यकारणजन्मनः (।) ।
तस्य भेदः कुतो बुद्धेर्व्यभिचार्यन्यजश्च सः॥ (४७०)
रूपादीन् पञ्च विषयानिन्द्रियाण्युपलम्भनम् ।
मुक्त्वा न कार्यमपरं तस्याः समुपलभ्यते[२] ।। (४७१)
तत्रात्यक्षं द्वयं पञ्चस्वर्थेष्वेकोपि नेक्ष्यते ।
रूपदर्शनतो जातो योन्यथा व्यस्तसम्भवः ॥ (४७२)
[यदेवमप्रतीतं तल्लिङ्गमित्यप्य[३]लौकिकं । ]
विद्यमानेपि लिङ्गे तान्तेन सार्द्धमपश्यतः ।। (४७३)
कथं प्रतीतिलिङ्गं हि नादृष्टस्य प्रकाशकम् ।
तत एवास्य लिङ्गात्प्राक् प्रसिद्धेरुपवर्णने ।। (४७४)
दृष्टान्तान्तरसाध्यत्वं तस्यापीत्यनवस्थितिः ।
इत्यर्थस्य धियः सिद्धिः नार्थात्तस्याः कथञ्चन ।। (४७५)
तदप्रसिद्धावर्थस्य[४] स्वयमेवाप्रसिद्धितः ।
प्रत्यक्षाञ्च धियं दृष्ट्वा तस्याश्चेष्टाभिधादिकं ।। (४७६)
परचित्तानुमानञ्च न स्यादात्मन्यदर्शनात् ।
[सबन्धस्य] मनोबुद्धाव[र्थलिङ्गाप्रसिद्धितः] ।। (४७७)

[१] PVM. प्रत्यक्षाधिगतो ।
[२] PS. समुपलक्ष्यते ।
[३] PS. PVM. । ०त्यतिलौकिकं ।
[४] PS. तदप्रसिद्धार्थत्वस्य ।

प्रकाशिता कथम्वा स्यात् बुद्धिर्बुद्ध्यन्तरेण वः ।
अप्रकाशात्मनोः सा मा[१] व्यङ्ग्यव्यञ्जकता कुतः ॥ (४७८)
विषयस्य कथं व्यक्तिः प्रकाशे रूपसंक्रमात् ।
स च प्रकाशस्तद्रूपः स्वयमेव प्रकाशते ॥ (४७९)
तथाभ्युपगमे बुद्धेः बुद्धौ बुद्धिः स्ववेदिका ।
सिद्धान्यथा तुल्यधर्मा विषयोपि धिया सह ॥ (४८०)
इति प्रकाशरूपा नः स्वयं धीः संप्रकाशते[२] ।
अन्योस्यां [३]रूपसंक्रान्त्या प्रकाशः सम्प्रकाशते ॥ (४८१)
सादृश्येपि हि धीरन्या प्रकाश्या न तया मता ।
स्वयं प्रकाशना[४]दर्थस्तद्रूपेण प्रकाशते ॥ (४८२)
यथा प्रदीपयोर्दीपघटयोश्च तदाश्रयः ।
व्यङ्ग्यव्यञ्जकभावेन[५] व्यवहारः प्रतन्यते ॥ (४८३)
विषयेन्द्रियमात्रेण न दृष्टमिति निश्चयः ।
तस्माद्यतोयं तस्यापि वाच्यमन्यस्य दर्शनम् ॥ (४८४)

(३b.) स्वसंवित्तिसिद्धिः

स्मृतेरप्यात्मवित्सिद्धा ज्ञानस्यान्येन वेदने ।
दीर्घादिग्रहणन्न स्याद् बहुमात्रा[६]नवस्थितेः ॥ (४८५)
अवस्थितावक्रमायां सकृदाभासनान्मतौ ।
वर्णः स्यादक्रमो दीर्घः क्रमवानक्रमां कथं ॥ (४८६)
उपकुर्यादसंश्लिष्यन्वर्णभागः परस्परं (।)
अक्रमेण ग्रहादन्तक्रमवद्धीश्च नो भवेत् ॥ (४८७)
आन्त्यं पूर्वस्थितादूर्ध्वं वर्द्धमानो ध्वनिर्भवेत् ।
धियः स्वयञ्च न स्थानं तदूर्ध्वविषयास्थितेः ॥ (४८८)
स्थाने स्वयन्न नश्येत् सा पश्चादप्यविशेषतः ।
दोषोयं[७] सकृदुत्पन्नाक्रमवर्णस्थितावपि ॥ (४८९)
सकृद्यत्नोद्भवाद् व्यर्थः स्याद्यत्नश्चोत्तरोत्तरः ।
व्यक्तावप्येष वर्णानां दोषः समनुषज्यते ॥ (४९०)

---

[१] PVM. साम्यात् । [२] PS. ०रूपार्था धीः स्वयं सत्प्रकाशते ।
[३] PS. अन्योस्या । [४] PVM. प्रकाशमानार्थ० ।
[५] PS. PVM. व्यञ्जकभेदेन। [६] PS. ०वंशमात्रा० । [७] PS. हात्वायं ।



अनेकया तद्ग्रहणे यान्त्या धीः सानुभूयते ।
न दीर्घग्राहिका सा च तन्न स्याद्दीर्घधीस्मृतिः ॥ (४९१)
पृथक् पृथक् च बुद्धीनां सम्वित्तौ तु ध्वनिः श्रुतेः[१] ।
अविच्छिन्नाभता न स्याद् घटनञ्च निराकृतम् ॥ (४९२)
विच्छिन्नं शृण्वतोप्यस्य यद्यविच्छिन्नविभ्रमः ।
ह्रस्वद्वयोच्चारणेपि स्यादविच्छिन्नविभ्रमः ॥ (४९३)
विच्छिन्ने दर्शने चाक्षादविच्छन्नाधिरोपणं ।
नाक्षात्सर्व्वाद्य[२]बुद्धीनां वितथत्वप्रसङ्गतः ॥ (४९४)
सर्व्वान्त्योपि हि वर्णात्मा निमेषतुलितस्थितिः ।
स च क्रमादनेकाणुसम्बन्धेन [नि] न[३]तिष्ठति ॥ (४९५)
एकाणवत्ययकालश्च कालोणी[४]यान् क्षणो मतः ।
बुद्धिश्च क्षणिका तस्मात्क्रमाद्वर्णान्प्रपद्यते ॥ (४९६)
इति वर्णेषु[५] रूपादावविच्छिन्नावभासिनी ।
विच्छिन्नाप्यन्यथा[६] बुद्धिः सर्व्वा स्याद्वितथार्थिका ॥ (४९७)
घटनं यच्च भावानामन्यत्रेन्द्रियविभ्रमात् ।
भेदालक्षणविभ्रान्तं स्मरणान्तद्विकल्पकं । (४९८)
तस्य स्पष्टावभासित्वं जल्पसंसर्गिणः कुतः ।
नाक्षग्राह्येस्ति शब्दानां योजनेति विवेचितम् ॥ (४९९)
विच्छिन्नं पश्यतोप्यक्षैर्घटयेद्यदि कल्पना ।
अर्थस्य तत्सम्वित्तेश्च सततं भासमानयोः ॥ (५००)
बाधकेऽसति सन्न्याये विच्छिन्न इति तत्कुतः ।
बुद्धीनां शक्तिनियमादिति चेत्स कुतो मतः ॥ (५०१)
युगपद् बुद्ध्यदृष्टेश्चेत् तदेवेदं विचार्यते ।
तासां समानजातीये सामर्थ्यनियमो भवेत् ॥ (५०२)
तथाहि सम्यक् लक्ष्यन्ते विकल्पाः क्रमभाविनः ।

(४) प्रत्यभिज्ञाचिन्ता

एतेन यः समक्षेर्थे प्रत्यभिज्ञानकल्पनां (५०३)

---

[१] PS. ०त्तौ न तद्ध्वनिश्रुतिः । PVM. सम्वित्तौ तद् ।
[२] PVM. सर्वाक्षबु० । [३] PVM. नितिष्ठति ।
[४] PVM. कालोल्पीयान् । [५] PVM. वर्णेपि । [६] PVM. ०न्यया ।

स्पष्टावभासां प्रत्यक्षां कल्पयेत् सोपि वारितः[१] ।
केशगोलकदीपादावपि स्पष्टावभासनात् ॥ (५०४)
प्रतीतिभेदे[२]प्यध्यक्षा धीः कथन्तादृशो भवेत् ।
तस्मान्न प्रत्यभिज्ञानाद्वर्णाद्येकत्वनिश्चयः ॥ (५०५)
पूर्व्वानुभूतस्मरणात्तद्धर्मारोपणाद्विना ।
स एवायमिति ज्ञानं नास्ति तच्चाक्षजे कुतः ॥ (५०६)
न चार्थज्ञानसम्वित्त्योर्युगपत्सम्भवो यतः ।
लक्ष्यते प्रतिभासो वा[३] नार्थार्थज्ञानयोः पृथक् (५०७)
न ह्यर्थाभासि च ज्ञानमर्थो बाह्यश्च केवलः ।
एकाकारमतिग्राह्ये[४] भेदाभावप्रसङ्गतः । (५०८)
सूपलक्ष्येण भेदेन यौ सम्वित्तौ न लक्षितौ ।
अर्थार्थप्रत्ययौ पश्चात् स्मर्येते तौ पृथक् कथम् ॥ (५०९)
क्रमेणानुभवोत्पादेप्यर्थार्थमनसोरयं ।
प्रतिभासस्य नानात्वचोद्यदोषो दुरुद्धरः ॥ (५१०)
[५]अर्थसम्वेदनं तावत्ततोर्थाभासवेदनं (।)
न हि सम्वेदनं शुद्धं भवेदर्थस्य वेदनं ॥ (५११)
[तथा हि] नीलाद्याकार एक एकं च वेदनं (।)
लक्ष्यते न तु नीलाभे वेदने वेदनं परं[६] ॥ (५१२)
ज्ञानान्तरेणानुभवो भवेत्तत्रापि च[७] स्मृतिः ।
दृष्टा तद्वेदनं केन तस्याप्यन्येन चेदिमां ॥ (५१३)
मालां ज्ञानविदां कोयं जनयत्यनुवन्धिनीम् ।
पूर्व्वा धीः सैव चेन्न स्यात्सञ्चारो विषयान्तरे ॥ (५१४)
तां ग्राह्यलक्षणप्राप्तामासन्नां जनिकां धियं ।
अगृहीत्वोत्तरं ज्ञानं गृह्णीयादपरं कथम् ॥ (५१५)
आत्मनि ज्ञानजनने स्वभावे नियताञ्च तां ।
को नामान्यो विबध्नीयाद् बहिरङ्गे[८]ऽन्तरङ्गिकाम् ॥ (५१६)

---

[१] PS. स निवारितः। [२] PS. प्रतीतभे०। [३] PS. PVM. ०भासौ द्वौ।
[४] PS. एकाकारमिति ग्राह्ये। [५] PVM. नोपलभ्यतेऽस्य व्याख्यानं।
[६] PS. पृथक्। [७] PS. हि; NR. (पृ० २७७) ०भवे हीष्टा०; प्रमाणसमुच्चये १।१३ ० नान्तरेणाऽनुभवोऽनिष्टस्तत्र०। [८] PS. बहिरङ्गो।



बाह्यः सन्निहितोप्यर्थः तां विबन्धुं[१] हि न प्रभुः ।
धियं नानुभवेत् कश्चिदन्यथार्थस्य सन्निधौ ॥ (५१७)
न च[२][ा]सन्निहितार्थास्ति दशा काचिदतो धियः ।
उत्स[३]न्नमूला स्मृतिरप्युत्सन्नेत्युज्ज्वलं मतम् ॥ (५१८)
अतीतादिविकल्प(ा)नां येषां नार्थस्य सन्निधिः ।
सञ्चारकरणाभावादुत्सीदेदर्थचिन्तनम् ॥ (५१९)
आत्मविज्ञानजनने शक्तिसंक्षयतः शनैः ।
विषयान्तरसञ्चारो यदि सैवार्थधीः कुतः ॥[४] (५२०)
[५][शक्तिक्षये पूर्वधियो] नहि धीः प्राग्धिया विना ।
अन्यार्थाशक्तिविगुणे ज्ञाने ज्ञानोदयागतेः ॥ (५२१)
सकृद्विजातीयजातावप्येकेन पटीयसा ।
चित्तेनाहितवैगुण्यादालयान्नान्यसम्भवः ।[६] (५२२)
नापेक्षेतान्यथा साम्यं मनोवृत्तेर्मनोन्तरं ।
मनोज्ञानक्रमोत्पत्तिरप्यपेक्षाप्रसाधनी ॥ (५२३)
एकत्वान्मनसोन्यस्मिन्शक्तस्यान्या गतिर्यदि[७] ।
ज्ञानान्तरस्यानुदयो न कदाचित्सहोदयात् ॥ (५२४)
समवृत्तौ च तुल्यत्त्वात्सर्व्वदान्यागतिर्भवेत् ।
जन्म चात्ममनोयोगमात्रजानां सकृद् भवेत् ॥ (५२५)
एकैव चेत्क्रियैकः स्यात् किन्दीपो नैकदर्शनः ।
क्रमेणापि न शक्तं स्यात्पश्चादप्यविशेषतः ॥ (५२६)
अनेन देहपुरुषावुक्तौ संस्कारतो यदि ।
नियमः स कुतः पश्चात् बुद्धेश्चेदस्तु सम्मतम् ॥] (५२७)
42a न ग्राह्यतान्याजननाज्जननं ग्राह्यलक्षणं ।
अग्राह्यं न हि तेजोस्ति न च सौक्ष्म्याद्यनंश[८]के ॥ (५२८)

---

[१] PVM. विबध्नन्।
[२]PVM. न च सन्निहितार्था०। [३]PVM. उत्खात०।
[४] प्र० स० १।१३; NR. (पृ० २७७)० तथा नस्यात् स चेष्यते।
[५] PS. पूर्वधीशक्तिनाशे हि नार्थे संक्रमणं भवेत्—भो० भा०।
[६] PS. ०याद्याद्यसम्भवः। [७] PS. PVM. ०स्यान्यगतेर्यदि।
[८] VA. ०द्यनंगके—इति वा.

ग्राह्यताशक्तिहानिः स्यात् नान्यस्य जननात्मनः ।
ग्राह्यताया न खल्वन्यज्जननं ग्राह्यलक्षणे ॥ (५२९)
साक्षान्न ह्यन्यथाबुद्धे रूपादिरुपका[रकः ।
ग्राह्यताल[1]क्षणा]दन्यस्तद्भावनियमोऽस्य कः ॥ (५३०)
बुद्धेरपि तदस्तीति सापि तत्वे व्यवस्थिता ।
ग्राह्योपादानसंवित्ती चेतसो ग्राह्यलक्षणं ॥(५३१)

(५) योगिनां ज्ञानम्

रूपादेश्चेतसश्चैवमविशुद्धधियं प्रति ।
ग्राह्यलक्षणचिन्तेयमचिन्त्या योगिनां गतिः ॥ (५३२)
[तत्र सूक्ष्मादिभावेन][2] ग्राह्यमग्राह्यतां व्रजेत् ।
रूपादिबुद्धेः किं जातं पश्चाद् यत् प्राङ् न विद्यते ॥ (५३३)
सति स्वधीग्रहे[१] तस्मात्सैवान[२]न्तरहेतुता ।
चेतसो ग्राह्यता सैव ततोनार्थान्तरा गतिः[३] ॥ (५३४)
नानैकशक्त्यभावेपि भावो नानैककार्यकृत् ।
[प्रकृत्यैवेति गदितं ना]नैकस्मान्न चेद्भवेत ॥[3] (५३५)

(६) हेतु सामग्र्याः सर्वसम्भवः

न किञ्चिदेकमेकस्मात् सामग्र्याः सर्व्वसम्भवः ।
एकं स्यादपि सामग्र्योरित्युक्तं तदनेककृत् ॥ (५३६)[४]
अर्थपूर्व्वञ्च[५] विज्ञानं गृह्णीयाद् यदि धीः परा ।
पूर्वापरार्थभासित्वाच्चिन्तादावेकचेतसि[६] ॥ (५३७)
अभिलापद्वयं[4] नित्यं स्याद् दृष्टक्रममक्रमम् ।
द्विर्द्विरेकं च भासेत भासनादात्मतद्विदोः[७] ॥ (५३८)

(७) आत्मानुभूतं प्रत्यक्षम्

विषयान्तरसञ्चारे यद्यन्य[८]न्नानुभूयते ।
परानुभूति[९]वत्सर्व्वाननुभूतिः प्रसज्यते ॥ (५३९)

---

[१] PS. स्वध्यग्रहे । [२] VA. यैव । [३] PS. नार्थान्तरे ।
[४] VN. टीकायां पृ० ३९ (११) । [५] PS. अर्थं पूर्व० ।
[६] PS. चित्रा० । [७] PS. PVM. ०दात्मतद्धियोः ।
[८] PVM. यद्यन्य० । [९] PS. PVM. परानुभूत० ।



आत्मानुभूतं [प्रत्यक्षं नानुभूतं परैः यदि ।)[5]
आत्मानुभूतिः सा सिद्धा कुतो येनैवमुच्यते ॥ (५४०)
व्यक्तिहेत्वप्रसिद्धिः स्यात् न व्यक्तेर्व्यक्तमिच्छतः ।
व्यक्त्यसिद्धावपि व्यक्तं यदि व्यक्तमिदं जगत् ॥ (५४१)

इति प्रमाणवार्त्तिककारिका[सु] प्रत्यक्षपरिच्छेदस[तृती]यः[१] ॥ ॥[6]

---

[१] PS. प्रमाणवार्त्तिककारिकासु तृतीयः परिच्छेदः ।

# चतुर्थः परिच्छेदः

## परार्थानुमानम्

### १. परार्थानुमानलक्षणम् (दिग्नागस्य)

(१) तत्र स्वदृष्टग्रहणफलम्

42b परस्य प्रतिपाद्यत्वात् अदृष्टोपि स्वयं परैः ।
दृष्टः[१] साधनमित्येके तत्क्षेपायात्मदृग् वचः ॥ (१)
अनुमाविषये नेष्टं परीक्षितपरिग्रहात् ।
वाच्य[२]प्रामाण्यमस्मिन् हि नानुमानं प्रवर्त्तते ॥ (२)
बाधनायागमस्योक्तेः साधनस्य परं प्रति ।
सोप्रमाणं तदा [ऽ] सिद्धं तत्सिद्धम[खिलन्ततः ॥ (३)
तदागमवतः सिद्धं यदि[३] क][1]स्य क आगमः ।
बाध्यमानः प्रमाणेन स सिद्धः कथमागमः ॥ (४)
तद्विरुद्धाभ्युपगमस्तेनैव च कथं भवेत् ।
तदन्योपगमे तस्य त्यागाङ्गस्याप्रमाणता ॥ (५)
तत्कि[४]न्न साधनं प्रोक्तं स्वप्रतीतिर्यदुद्भवा ।
युक्त्या ययागमो ग्राह्यो ग्राहि[५]कास्यापि सा न किं ॥ (६)
[प्राकृतस्य सतः प्राग् यैः प्रतिपत्त्यक्षसं][2]भवैः[६] ।
साधनैः साधनान्यर्थशक्तिज्ञानेस्य तान्यलं ॥ (७)
विच्छिन्नानुगमा येपि[७] सामान्येनाप्यगोचराः ।
साध्यसाधनचिन्तास्ति न तेष्वर्थेषु काचन ॥ (८)

---

[१] PVM. दृष्टसाधनं । [२] PS.VA. PVM. वाचः ।
[३] PS. मिति । [४] PVM. तत्कस्मात्साधनं नोक्तं ।
[५] PVM. परस्यापि च । [६] PS.VA. PVM. सम्भवौ ।
[७] येऽपि विच्छिन्नसम्बन्धाः—भोटभाषान्तरे पाठः; VA. ये च ।



पुंसामभिप्रायवशात् तत्त्वातत्त्वव्यवस्थितौ ।
लुप्तौ हेतुतदाभासौ तस्य वस्त्वसमाश्रयात् ॥ (९)
स[न्नर्थो ज्ञानसापेक्षो नासन् ज्ञाने][3]न[१] साधकः ।
सतोपि वस्त्वसंश्लिष्टाऽसंगत्या सदृशी गतिः ॥ (१०)
लिङ्गं स्वभावः कार्यं वा दृश्यादर्शनमेव वा ।
सम्बद्धं वस्तुतस्सिद्धं[२] तदसिद्धं किमात्मनः ॥ (११)
परेणाप्यन्यतो गन्तुमयुक्तं परकल्पितैः ।
प्रसङ्गो द्वयसम्बन्धादेकाभावे[३]न्य[हानये ॥ (१२)

(२) तत्रार्थग्रहणफलम्

तदर्थग्रहणं शब्द][4]विकल्पारोपि[४]तात्मनां ।
अलिङ्गत्त्वप्रसिद्ध्यर्थमर्थादर्थ[५]प्रसिद्धितः ॥ (१३)
कल्पनागमयोः कर्त्तुरिच्छामात्रानुवृत्तितः[६] ।
वस्तुनश्चान्यथाभावात् तत्कृता[७] व्यभिचारिणः ॥ (१४)

### २. पक्षचिन्ता

(१) पक्षहेतुवचनमसाधनम्

अर्थादर्थगतेः शक्तिः पक्षहेत्वभिधानयोः ।
नार्थे तेन तयोर्न्न[ास्ति स्वतः साधनसंस्थितिः ॥ (१५)
त][5]त्पक्षवचनं वक्तुरभिप्रायनिवेदने ।
प्रमाणं संशयोत्पत्तेस्ततः साक्षान्न साधनं ॥ (१६)
साध्यस्यैवाभिधानेन पारंपर्येण नाप्यलं ।
शक्तस्य सूचकं हेतुवचोऽशक्तमपि स्वयं ॥ (१७)
हेत्वर्थविषयत्त्वेन तदशक्तोक्तिरीरिता ।
शक्तिस्त[स्यापि चेद्धेतुवचनस्य प्रवर्तनात् ॥][6] (१८)
43a तत्संशयेन जिज्ञासोर्भवेत्प्रकरणाश्रयः ।
विपक्षोपगमेप्येतत्तुल्यमित्यनवस्थितिः ॥ (१९)

---

[१] PS.VA. PVM. ज्ञानेन । [२] PS. VA. वस्तुतः सिद्धं ।
[३] PVM. ०देकापाये । [४] PS. VA. PVM. कल्पनारोपि० ।
[५] PVM. अर्थस्य सिद्धितः । [६] VA. ०मात्रानुरोधतः ।
[७] VA. कल्पिता ।

अन्तरङ्गं तु सामर्थ्यं त्रिषु रूपेषु संस्थितं ।
तत्र स्मृतिसमाधानं तद्वचस्येव संस्थितं ॥ (२०)
अख्यापिते हि विषये हेतुवृत्तेरसंभवात् ।
विषयख्यापनादेव सिद्धा[१] चेत् [इति(स्यात्) मतं॥ (२१)
व्याप्तिपूर्वे[२] विनाप्यस्मात्][1] कृतकः शब्द ईदृशः[३] ।
सर्व्वे [ऽ]नित्त्या इति प्रोक्तेप्यर्थात्तन्नाशधीर्भवेत् ॥ (२२)

(२) प्रतिज्ञा न साधनावयवः

अनुक्तावपि पक्षस्य सिद्धेरप्रतिबन्धतः ।
त्रिष्वन्यतमरूपस्यैवानुक्तिर्न्यूनतोदिता ॥ (२३)
साध्योक्तिं वा प्रतिज्ञां स वदन्[४] दोषैर्न्न युज्यते ।
साधनाधिकृतेरेव हेत्वाभासाप्रसङ्गतः ॥[५] (२४)
[अविशेषोक्तिरप्येकजा][2]तीये संशयावहा ।
अन्यथा सर्व्वसाध्योक्तेः प्रतिज्ञात्वं प्रसज्यते ॥ (२५)
सिद्धोक्तेः साधनत्त्वाच्चे[६]त्परस्यापि न दुष्यति ।
इदानीं साध्यनिर्द्देशः साधनावयवः कथं ॥ (२६)
साभासोक्त्याद्युपक्षेपपरिहारविडम्बना ।
असम्बद्धा [तथा ह्येष न न्याय इति सूचि][3]तं ॥ (२७)

(३) पक्षलक्षणकरणे प्रयोजनम्

गम्यार्थत्त्वेपि साध्योक्तेरसंमोहाय लक्षणं ।
तच्चतुर्लक्षणं रूपं निपातेषु[७] स्वयं पदैः ॥ (२८)
असिद्धासाधनार्थोक्तं वाद्य[८]भ्युपगम[९]ग्रहः ।
अनुक्तोपीच्छया व्याप्तः साध्य आत्मार्थवन्मतः ॥ (२९)
सर्व्वान्येष्टनिवृत्तावप्याशं[कास्थानवारणं ।
वृत्तौ स्वयं][4]श्रुतेः प्राह कृता चैषा तदर्थिका ॥ (३०)

---

[१] VA. सामर्थ्यमिति चेन्मतं; PS. PVM. ०ख्यापनावेव सिद्धौ चेत्तस्य शक्तता [२] PS. उक्तमत्र । [३] PVM. ईदशाः ।
[४] VA. सम्वदन् । [५] VA. हेत्वाभास प्र० ।
[६] PVM. साधनत्वाच्च । [७] PVM. VA. रूपनिपा ० ।
[८] VA. ०र्थोक्तवाद्य । [९] PVM. ०गतग्रहः ।



(४) आत्मार्थत्वविवादे दोषः

विशेषस्तद्व्यपेक्षा[१]तः कथितो धर्म्मधर्मिणोः ।
अनुक्तावपि वाञ्छाया भवेत्प्रकरणाद् गतिः ॥ (३१)
अनन्वयोपि[२] दृष्टान्ते दोषस्तस्य यथोदितं[३] ।
आत्मा परश्चेत्सोऽसिद्ध [इति तत्रेष्टघातकृ[४]त्॥][5] (३२)
साधनं यद्विवादे न न्यस्तं तच्चेन्न साध्यते ।
किं साध्यमन्यथानिष्टं भवेद्वैफल्यमेव वा ॥ (३३)
सद्वितीयप्रयोगेषु निरन्वयो विरुध्यते ।
एतेन कथिते साध्यं सामान्येनाथ सम्मतं ॥ (३४)
तदेवार्थान्तराभावाद् [देहानाप्तौ न सिध्यति ।][6]
वाच्यं शून्यं प्रलपतां तदेतज्जाड्यवर्ण्णितं[५] ॥ (३५)
तुल्यं नाशेपि चेच्छब्दघटभेदेन कल्पने ।
न सिद्धेन विनाशेन तद्वतः साधना[द्] ध्वनेः ॥ (३६)
तथार्थान्तरभावे स्यात्तद्वान् कुम्भोप्यनित्त्यता ।[7]
43b [विशि]ष्टो[६] ध्वनिनान्वेति नोचेन्नायोगवारणात् ॥ (३७)
द्विविधो हि व्यवच्छेदो वियोगापरयोगयोः ।
व्यवच्छेदादयोगे तु नान्येनानन्वयागमः[७] ॥ (३८)
सामान्यमेव तत् साध्यं न च सिद्धप्रसाधनं ।
विशिष्टं धर्मिणा तच्च न निरन्वयदोष[वत् ॥ (३९)
एतेन धर्म्मिधर्म्माभ्यां विशि][1]ष्टौ धर्म्मधर्म्मिणौ ।
प्रत्याख्यातौ निराकुर्व्वन् धर्म्मिण्येवमसाधनात् ॥ (४०)
समुदायापवादो हि न धर्म्मिणि विरुध्यते ।
साध्यं यतस्तथा नेष्टं साध्यो धर्म्मोत्र केवलः ॥ (४१)

[ इति संग्रहः ]

(५) स्वयंशब्दग्रहणफलम्

एकस्य धर्म्मिणः शास्त्रे नानाधर्मस्थितावपि ।
साध्य[ः स्यादात्मनैवेष्ट इत्युपात्ता][2] स्वयं श्रुतिः ॥ (४२)

---

[१] PVM. ०व्यपेक्षत्वात् । [२] VA. ० न्वयो हि । [३] VA. यथोदितः ।
[४] PVM. ०विघातवत् । [५] VA. जाड्यचिन्तितं ।
[६] PS. PVM. विशिष्टा । [७] PVM. वार्येनान० ।

शास्त्राभ्युपगमादेव समादानात्[१] प्रबाधने ।
तत्रैकस्यापि दोषः स्याद्यदि हेतुप्रतिज्ञयोः ॥ (४३)
शब्दनाशे प्रसाध्ये स्याद् गन्धे[२] भूगुणताक्षतेः ।
हेतुर्व्विरुद्धोप्रकृतेर्न्नो चेदन्यत्र सा समा ॥ (४४)
अथ [ात्र धर्मी प्रकृतस्तत्र शा][3]स्त्रार्थबाधनं[३] ।
अथ वादीष्टतां ब्रूयाद्धर्म्मिधर्म्मादिसाधनैः ॥ (४५)
कैश्चित्प्रकरणैरिच्छा भवेत्सा गम्यते च तैः ।
बलात्तवेच्छेयमिति व्यक्तमीश्वरचेष्टितं ॥ (४६)
वदन्न कार्यलिङ्गां तां व्यभिचारेण बाध्यते ।
अना[न्तरीयकेचार्थे बाधिते ][4]न्यस्य का क्षतिः ॥ (४७)

### ३. शब्दाप्रामाण्यचिन्ता

(१) शास्त्रविरोधोऽकिञ्चित्करः

उक्तञ्च नागमापेक्षमनुमानं स्वगोचरे ।
सिद्धं तेन सुसिद्धं [४]तन्न तदा शास्त्रमीक्ष्यते ॥ (४८)
वादत्यागस्तदा स्याच्चेन्न तदानभ्युपायतः ।
उपायो ह्यभ्युपाये[ऽ]यमनङ्गं स तदापि सन् ॥ (४९)
शास्त्रा[५][विशुद्धे विषयद्वये शास्त्रपरिग्र][5]हं ।
चिकीर्षोः स हि कालः स्यात्तदा शास्त्रेण बाधनं ॥ (५०)
तद्विरोधेन चिन्तायास्तत्सिद्धार्थेष्वयोगतः ।
तृतीयस्थानसंक्रान्तौ न्याय्यः शास्त्रपरिग्रहः ॥ (५१)
तत्रापि साध्यधर्म्मस्य[६] नान्तरीयकबाधनं[७] ।
परिहार्यं न [चान्येषामनवस्था प्रसङ्गतः ॥][6](५२)
44a केनेयं सर्व्वचिन्तासु शास्त्रं ग्राह्यमिति स्थितिः ।
कृतेदानीमसिद्धान्तैर्ग्राह्यो धूमेन नानलः ॥ (५३)
रिक्तस्य जन्तोर्ज्जातस्य गुणदोषमपश्यतः ।
विलब्धा वत केनामी सिद्धान्तविषमग्रहाः ॥ (५४)

---

[१] PS.VA. PVM. सर्व्वादानात् ।
[२] PVM. गन्धभूगुण० ।
[३] PS.VA. ०र्थसाधनं ।
[४] PS. प्रसिद्धं ।
[५] PS.VA. तथा । PVM. तदा ।
[६] PS. साध्यं ध० ।
[७] VA. सम्बद्धस्यैव बाधनं ।



यदि साधन एकत्र सर्व्वशास्त्रनिदर्शने[१] ।
दर्शयेत् साधनं स्यादित्येषा [लोकोत्तरा स्थितिः ॥ (५५)
असम्बद्धस्य धर्मस्य किमसि][1]द्धौ [न सिध्यति ।]
हेतुस्तत्साधनायोक्तः किं दुष्टस्तत्र सिध्यति ॥ (५६)
धर्म्मानननुपनीयैव दृष्टान्ते धर्म्मिणोऽखिलान् ।
वाग्धूमादेर्जनोन्वेति चैतन्यदहनादिकं ॥ (५७)
स्वभावं कारणं [२]वार्थोऽव्यभिचारेण साधयन् ।
कस्यचिद्वादि[३]बाध[ायां स्वभावान्न निवर्त्तते ॥ (५८)
प्रपद्यमानश्चान्य][2]स्तं नान्तरीयकमीप्सितैः ।
साध्यार्थैर्हेतुना तेन कथमप्रतिपादितः ॥ (५९)
उक्तोनुक्तोपि चे[४]द्धेतुर्विरोधो[५] वादिनोत्र किं ।
न हि तस्योक्तिदोषेण स जातः शास्त्रबाधनः ॥ (६०)
बाधकस्याभिधानाच्चेद्दोषो यदि [वदेन्न सः ।
किन्न बाधेत सोऽकुर्वन्न][3]युक्तं केन दुष्यति ॥ (६१)
अन्येषु हेत्वाभासेषु स्वेष्टस्यैवाप्रसाधनात् ।
दुष्येद् व्यर्थाभिधानेन नात्र तस्य प्रसाधनात् ॥ (६२)
यदि किञ्चित् कचिच्छास्त्रे न युक्तं प्रतिषिध्यते ।
ब्रुवाणो युक्तमप्यन्यदिति राजकुल[स्थितिः ॥ (६३)
सर्वानर्थान् समीकृत्य वक्तुं][4]शक्यं न साधनं ।
सर्व्वत्र तेनोत्सन्नेयं[६] साध्यसाधनसंस्थितिः ॥ (६४)
विरुद्धयोरेकधर्म्मिण्ययोगादस्तु बाधनं ।
विरुद्धैकान्तिकेनात्र तद्वदस्ति विरोधिता ॥ (६५)
अबाध्यबाधकत्त्वेपि तयोः शास्त्रार्थविसवात् ।
[असम्बन्धेपि बाधा चेत् स्यात् सर्व्वं][5]सर्व्वबाधकं[७] ॥ (६६)
सम्बन्धस्तेन तत्रैव[८] बाधनादस्ति चेदसत् ।
हेतोः सर्व्वस्य चिन्त्यत्वात् स्वसाध्ये गुणदोषयोः ॥ (६७)

---

[१] PS.VA. PVM. सर्वं शास्त्रं निदर्शने ।
[२] PVM. चार्थौ ।
[३] PS.VA. PVM. ०चिद्वाद ।
[४] PVM. वा हेतु० ।
[५] PVM. विरोद्धा ।
[६] PVM. तेन सुच्छन्नेयं ।
[७] VA. ०बाधनं ।
[८] PVM. तस्यैव ।

नान्तरीयकता साध्ये सम्बन्धः सेह नेष्यते ।
केवलं शास्त्रबाधेह[१] दोषः सान्य[कृते समा[२] ॥ ६८]
44b (शास्त्राभ्युपगमात् साध्यः [९]शास्त्रदृष्टोऽखिलो यदि ।[३]
प्रतिज्ञा[ऽ]सिद्धदृष्टान्ते हेतुवादः प्रसज्यते ॥ (६९)
उक्तयोः साधनत्त्वेन नो चेदीप्सितबाधतः[४] ।
न्यायप्राप्तं न साध्यत्त्वं वचनाद्विनिवर्त्तते ॥ (७०)
अनीप्सितमसाध्यञ्चेद्वादिनान्योप्यनीप्सितः ।
धर्म्मे[ ]ऽसाध्यस्तदाऽसाध्यं बाधमानं विरोधि किम् ॥][1] (७१)

(२) अन्यथा स्वयंशब्दोऽनर्थकः

पक्षलक्षणबाह्यार्थः स्वयंशब्दोप्यनर्थकः ।
शास्त्रेष्विच्छाप्रवृत्यर्थो यदि शङ्कांगतो हि यः[५] ॥ (७२)
सोनिषिद्धः प्रमाणेन गृह्णन् केन निवार्य्यते ।
निषिद्धश्चेत्प्रमाणेन वाचा केन प्रवर्त्त्यते[६] ॥ (७३)
पूर्व्वमप्येष सिद्धान्तं स्वेच्छयैव गृहीत[वान् ।
कथ[७]ञ्चिदन्यं न[८] पुनर्ग्रही][2] तुं लभते न किं ॥ (७४)
दृष्टेर्व्विप्रतिपत्तीनामत्राकार्षीत् स्वयं श्रुतिं ।
इष्टाक्षतिमसाध्यत्त्वमनवस्थाञ्च दर्शयन् ॥ (७५)
समयाहितभेदस्य परिहारेण धर्म्मिणः ।
प्रसिद्धस्य गृहीत्यर्था[९] जगादान्यः स्वयं श्रुतिं ॥ (७६)
वि[चारप्रस्तुतेरेव प्रसिद्धः सिद्ध आ][3] श्रयः ।
स्वेच्छाकल्पितभेदेषु पदार्थेष्वविवादतः ॥ (७७)
असाध्यतामथ प्राह सिद्धादेशेन धार्मिणः ।
स्वरूपेणैव निर्देश्य इत्यनेनैव तद्गतं ॥ (७८)

---

[१] PS. VA. PVM. ०पीडेह ।  [२] PS. समः ।
[३] VA. PS. PVM. शास्त्राभ्युपगमात् साध्यः शास्त्रदृष्टोखिलो यदि ।
[४] PS. VA. PVM. ०वादतः  [५] PS. VA. PVM. शङ्का कुतोन्वियं ।  [६] PS. निवर्त्यते ।
[७] PVM. किञ्चि० ।  [८] PVM. PS.VAB. स ।
[९] VA. ०त्यर्थं ।



सिद्धसाधनरूपेण निर्देशस्य हि सम्भवे ।
सा[ध्यत्वेनैव निर्देश्य इतीदं फल][4] वद्भवेत् ॥ (७९)
अनुमानस्य सामान्यविषयत्त्वञ्च वर्णितं ।
इहैवं न ह्यनुक्तेपि किञ्चित्पक्षे विरुध्यते ॥ (८०)
कुर्याच्चेद्धर्म्मिणं साध्यं ततः किन्तन्न शक्यते ।
कस्माद्धेत्वन्वयाभावान्न च[१] दोषस्तयोरपि[२] ॥ (८१)
[उत्तरावयवापेक्षो न दो][5]षः पक्ष इष्यते ।
तथा हेत्वादिदोषोपि पक्षदोषः प्रसज्यते ॥ (८२)
सर्व्वैः पक्षस्य बाधातस्तस्मात्तन्मात्रसङ्गिनः ।
पक्षदोषा मता नान्ये प्रत्यक्षादिविरोधवत् ॥ (८३)
हेत्वादिलक्षणैर्व्वाध्यं मुक्त्वा पक्ष [स्य लक्षणं ।
45a उच्यते परिहारार्थं][6] न[३] व्याप्तिव्यतिरेकयोः ॥ (८४)
स्वयन्निपातरूपाख्या व्यतिरेकस्य बाधिकाः ।
सह[४] निराकृतेनेष्टश्रुतिरव्याप्तिबाधिनी[५] ॥ (८५)
साध्याभ्युपगमः पक्षलक्षणं तेष्वपक्षता ।
निरा[कृते बाधनतः शेषेऽलक्षणवृत्तितः ॥ (८६)
स्वयमिष्टाभिधानेन गतार्थेप्यवधारणे ।
कृत्यान्तेनाभिसम्बन्धादुक्तं काला][1]न्तरच्छिदे ॥ (८७)
इहानङ्गमिषेन्निष्टा तेनेप्सितपदे पुनः ।
अङ्गमेव तयाऽसिद्धहेत्वादि प्रतिषिध्यते ॥ (८८)
अवाचकत्त्वाच्चायुक्तं तेनेष्टा[६] स्वयमात्मना ।
अन[पेक्ष्याखिलं शास्त्रं तद[७]भीष्टस्य साध्यता ॥ (८९)
तेनानभीष्टसंसृष्टस्येष्टस्यापि हि बाधने ।
यथा साध्यमबा][2] धातः पक्षहेतू न दुष्यतः ॥ (९०)

---

[१] VA. ०न्ननु ।  [२] PS.VA. ० योरयम् ।
[३] PS.VA. PVM. म ।
[४] PS.VA. PVM. सहा ।  [५] PS.VA. PVM. बाधनी ।
[६] PS.VA. PVM. तेनेष्टं ।
[७] PVM. तद्वादीष्टस्य ।

(३) सहानिराकृतग्रहणफलम्

अनिषिद्धः प्रमाणाभ्यां स चोपगम इष्यते ।
सन्दिग्धे हेतुवचनाद् व्यस्तो हेतोरनाश्रयः ॥ (९१)

(४) बाधा चतुर्विधा

अनुमानस्य भेदेन सा बाधोक्तिः[1] चतुर्व्विधा ।
अत्रा[2][भ्युपायः कार्याङ्गं स्वभावाङ्गं जगत्स्थितिः॥ (९२)

(५) आगमस्ववचनयोस्तुल्यबलता

आत्मापरोधाभिम][3] तो भूतनिश्चययुक्तवाक् ।
आप्तः स्ववचनं शास्त्रं चैवमुक्तं समत्त्वतः[3] ॥ (९३)
यथात्मनोऽप्रमाणत्त्वे वचनं न प्रवर्त्तते ।
शास्त्रसिद्धे[4] तथा नार्थे विचारस्तदनाश्रये ॥ (९४)
तत्प्रस्तावाश्रयत्त्वे हि [शास्त्रं वाधकमित्यमुम् ।
वक्तुमर्थं स्ववाचास्य सहोक्तिः साम्यदृष्टये ॥ ][4] (९५)
उदाहरणमप्यत्र सदृशं तेन दर्शितं[5] ।
प्रमाणानामभावे हि शास्त्रवाचोरयोगतः ॥ (९६)
स्ववाग्विरोधे विस्पष्टमुदाहरणमागमे ।
दिङ्मात्रदर्शनं तत्र प्रेत्य धर्म्मो [सुखप्रदः ॥ (९७)
शास्त्रिणोप्यतदालम्बे विरुद्धोक्तौ तु वस्तुनि ।
न बा][5]धा प्रतिबन्धः स्यात्तुल्यशक्तितया[6] द्वयोः ॥ (९८)
यथा स्ववाचि तच्चास्य तदा स्ववचनात्मकं ।
तयोः प्रमाणं[7] यस्यास्ति तत्स्यादन्यस्य बाधकं ॥ (९९)
प्रतिज्ञामनुमानं वा प्रतिज्ञा[पेतयुक्तिका ।
तुल्यकक्ष्या यथार्थम्वा[8] बाधेत कथमन्यथा ॥][6] (१००)

---

[1] PS. VA. PVM. ०धोक्ता । [2] VA. PVM. तत्र ।
[3] VA. समन्ततः PVM. चैक० त्वतः ।
[4] VA. शास्त्रदृष्टे । [5] PS. VA. PVM. वर्णितं ।
[6] PS. VA. PVM. तुल्यकक्षतया; VB. PVM. ०तया तयो ।
[7] VB प्रामाण्यं । [8] PS. PVM. VB. तुल्यकक्षा ।



45b प्रामाण्यमागमानाञ्च प्रागेव विनिवारितं ।
अभ्युपाय[1]विचारेषु तस्माद्दोषोयमिष्यते ॥ (१०१)

[इत्यन्तरश्लोकः ।]

तस्माद्विषयभेदस्य दर्शनार्थं[2] पृथक् कृतः ।
अनुमानाबहिर्भूतोप्यभ्युपायः प्रबाधनात् ॥ (१०२)
अन्यथातिप्रसङ्ग[ः स्याद् व्यर्थता वा पृथक्कृतेः ।
भेदो वाङ्मात्रवचने प्रतिबन्धः[1] स्ववाच्यपि ॥ (१०३)
तेनाभ्युपगमाच्छास्त्रं प्रमाणं सर्व्ववस्तुषु ।
बाधकं[3] यदि नेच्छेत्स बाधकं किम्पुनर्भवेत् ॥ (१०४)
स्ववाग्विरोधोऽभेदः स्यात् स्ववाक्शास्त्रविरोधयोः ।
पुरुषेच्छा [कृता चास्य परिपूर्ण्णा प्रमाणता ॥ (१०५)
तस्मात् प्रसिद्धेष्वर्थेषु शास्त्रत्या ][2] गेपि न क्षतिः ।
परोक्षेप्यागमाऽनिष्टौ[4] न चिन्तैव प्रवर्त्तते ॥ (१०६)
विरोधा[5]द्भावनप्राया परीक्षाप्यत्र तद्यथा ।
अधर्ममूलं रागादि स्नानञ्चाधर्म्मनाश[6]नं ॥ (१०७)

(६) प्रसिद्धिवाधनमयुक्तम्

शास्त्रं य[त्सिद्धया युक्त्या स्ववाचा च न बाध्यते ।
दृष्टेऽदृष्टेपि तद् ग्राह्यमिति चिन्ता][3] प्रवर्त्तते[7] ॥ (१०८)
अर्थेष्वप्रतिषिद्धत्त्वात् पुरुषेच्छानुरोधिनः ।
इष्टशब्दाभिधेयत्त्वस्याप्तो वाक्षत[8]वाग्जनः ॥ (१०९)
उक्तः प्रसिद्धशब्देन[9] धर्म्मस्तद्व्यवहारजः ।
प्रत्यक्षादि [मिता मानश्रुत्यारोपेण सूचिताः ॥ (११०)

---

[1] VA. अभ्युपेत । [2] VA. दर्शनाय ।
[3] PS. बाधेत । [4] PS. VA. PVM. परोक्षेष्वागमानिष्टौ ।
[5] PVM. विरोधोद्भावन० ।
[6] VA. धर्मशोधनं । [7] PVM. प्रवर्त्यंते ।
[8] PS. VA. त्राक्षत । [9] VA. प्रसिद्धि० ।

तदाश्रयभुवामिच्छावर्त्तित्वाद्][4]निषेधितां[1] ।
कृतानामकृतानां वा[2] योग्यं विश्वं स्वभावतः ॥ (१११)
अर्थमात्रानुरोधिन्या भाविन्या भूतयापि वा ।
वाध्यते प्रतिरुन्धानः शब्दयोग्यतया [तया ॥ (११२)
तद्योग्यताबलादेव वस्तुतो घटितोध्वनिः ।
सर्व्वोस्यामप्रतीतेपि][5] तस्मिंस्तत्सिद्धता ततः ॥ (११३)
असाधारणता न स्यात् बाधाहेतोरिहान्यथा[3] ।
तन्निषेधो[4]ऽनुमानात् स्याच्छब्दार्थेऽनक्षवृत्तितः ॥ (११४)
असाधारणता तत्र हेतूनां यत्र नान्वयि ।
सत्वमित्यस्योदाहारो हेतोरेवं कुतो मतः ॥ (११५)
[ संकेतसंश्रयाः शब्दाः स चेच्छामात्रसंश्रयः ।
वा[5]सिद्धः शब्दसिद्धानामिति शाब्दप्रसिद्ध[6]वाक् ॥ (११६)
अनुमानप्रसाध्येषु[7] विरुद्धाव्यभिचारिणः ।
अभावं दर्शयत्येवं प्रतीतेरनुमात्वतः ॥ (११७)
अथवा ब्रुवतो लोकस्यानुमाऽभाव उच्यते ।
किन्तेन भिन्नविषया प्रतीतिरनुमानतः ॥ (११८)
तेनानुमानाद् वस्तूनां सदसत्तानुरोधिनः ।
भिन्नस्यातद्वशा[8]द् वृत्तिस्तदिच्छाजेति सूचितं ॥ (११९)
चन्द्रतां शशिनोऽनिच्छन् कां प्रतीतिं स वाञ्छति ।
इति तं प्रत्यदृष्टान्तं तदसाधारणं मतं ॥ (१२०)
नोदाहरणमेवैकमधि[9]कृत्येदमुच्यते ।
लक्षणत्वात् तथाऽवृक्षो धात्री[10]त्युक्तौ च बाधनात् ॥ (१२१)
अत्रापि लोके दृष्टत्वात् कर्पूररजतादिषु ।
समयाद् वर्त्तमानस्य काऽसाधारणताभि[11]धा ॥ (१२२)

---

[1] PS. VA. निषेधिनां। [2] VA. च।
[3] PS. बाधातोन्विहान्यथा। [4] PS. तन्निषेधानु० ।
[5] PVM. नासिद्धिः । [6] VB. प्रसिद्धि ।
[7] PVM. प्रसिद्धेषु । [8] PVM. ०तद्वशा ।
[9] VB. मेवैतदधि; PVM. मेवेदमधि । [10] PVM. वृक्षोऽधात्री ।
[11] PVM. ०पि वा।



यदि तस्य क्वचित् सिध्येत् सिद्धं वस्तुवलेन तत् ।
प्रतीतिसिद्धोपगमेऽशशिन्यप्यनिवारणा[1]त् ॥ (१२३)
तस्य वस्तुनि सिद्धस्य शशिन्यप्यनिवारणं ।
तद्व[2]त् स्वभावे शशिनि वारणेपि न दुष्यति ॥ (१२४)
तस्मादवस्तुनियतसंकेतध्वनि[3]भाविनाम् ।
योग्याः पदार्था धर्माणामिच्छाया अनिरोधनात् ॥ (१२५)
तां योग्यतां नि[4]रुन्धानं संकेताप्रतिषेधजा ।
प्रतिहन्ति प्रतीताख्या[5] योग्यताविष[6]याऽनुमा ॥ (१२६)
शब्दानामर्थनियमः संकेतानुविधायिनां ।
नेत्यनेनोक्तमत्रैषां प्रतिषेधो विरुध्यते ॥ (१२७)
नैमित्तिक्याः श्रुतेरर्थमर्थम्वा पारमार्थिकं ।
शब्दानां प्रतिरुन्धानो न वाध्यस्तेन[7] वर्णितः ॥ (१२८)
तस्माद् विषयभेदस्य दर्शनाय पृथक्कृता ।
अनुमानावहिर्भूता प्रतीतिरपि पूर्व्ववत् ॥ (१२९)
सिद्धयोः पृथगाख्याने दर्शयँश्च प्रयोजनम् ।
एते सहेतुके प्राह नानुमाध्यक्षबाधने ॥ (१३०)

(७) प्रत्यक्षबाधा

तत्रा[8]प्यध्यक्षबाधायां नानारूपतया ध्व[9]नेः ।
प्रसिद्धस्य श्रुतौ रूपं यदेव प्रतिभासते ॥ (१३१)
अद्वयं शबलाभासस्यादृष्टेर्बुद्धिजन्मनः ।
तदर्थार्थोक्तिरस्यैव क्षेपेध्यक्षेण बाधनं ॥ (१३२)

## ४. सामान्यचिन्ता

### (१) सामान्यं व्यावृत्तिलक्षणम्

तदेव रूपं तत्रार्थः शेषं व्यावृत्तिलक्षणं ।
अवस्तुरूपं[10] सामान्यमतस्तन्नाक्षगोचरः ॥ (१३३)

---

[1] PVM. ०वारणं। [2] PVM. तद्वस्त्वभावे।
[3] PPM. ०संकेतबल०। [4] PVM. विरू०।
[5] PVM. प्रतीत्या०। [6] PVM. ०विषये० ।
[7] VB. वाध्यस्तेन; PS. न तेनेकोसि बाधनात्। PVM. बाधनार्हो हि।
[8] PS. अत्रा०। [9] PVM. ध्वनौ। [10] PVM. अवस्तुभूतं।

[१]तेन सामान्यधर्माणामप्रत्यक्षत्वसिद्धितः ।
प्रतिक्षेपेप्यबाधेति श्रावणोक्त्या प्रकाशितम् ॥ (१३४)
सर्व्वथाऽवाच्यरूपत्वात् सिद्धा तस्य समाश्रयात् ।
बाधनात् तद्बलेनोक्तः श्रावणेनाक्षगोचरः ॥ (१३५)

(२) स्वधर्मिग्रहणप्रयोजनम्

सर्व्वत्र वादिनो धर्मो यः स्वसाध्यतयेप्सितः ।
तद्धर्मवति बाधा स्यान्नान्यधर्मेण धर्मिणि ॥ (१३६)
अन्यथास्योपरोधः को बाधितेन्यत्र[२] धर्मिणि ।
गतार्थे लक्षणे नास्मिन् स्वधर्मिवचन पुनः ॥ (१३७)
बाधायां धर्मिणापि स्यात् वाधेत्यस्य प्रसिद्धये ।
आश्रयस्य विरोधेन तदाश्रितविरोधनात् ॥ (१३८)
अन्यथैवम्विधो धर्मः साध्य इत्यभिधानतः ।
तद्बाधामेव मन्येत स्वधर्मिवच[३]नन्ततः ॥ (१३९)
नन्वेतदप्यर्थसिद्धं सत्यं केचित्तु धर्मिणः ।
केवलस्योपरोधेपि दोषवत्तामुपागताः ॥ (१४०)
यथा परैरनुत्पद्यापूर्व्वरूपन्न खादिकं ।
सकृच्छब्दाद्यहेतुत्वादित्युक्ते प्राह दूषकः ॥ (१४१)
तद्वद् वस्तुस्वभावोऽसन् धर्मी व्योमादिरित्यपि ।
नैवमिष्टस्य साध्यस्य बाधा क्वचन विद्यते ॥ (१४२)
द्वयस्यापि हि साध्यत्वे साध्यधर्मोपरोधि यत् ।
बाधनं धर्मिणस्तत्र बाधेत्येतेन वर्णितम् ॥ (१४३)
तथैव धर्मिणोप्यत्र साध्यत्वात् केवलस्य न ।
यद्येवमत्र बाधा स्यात् नान्यानुत्पाद्यशक्तिकः ॥ (१४४)
सकृच्छब्दाद्यहेतुत्वात् सुखादिरिति पूर्व्ववत् ।
विरोधिता भवेदत्र हेतुरैकान्तिको यदि ॥ (१४५)
क्रमक्रियाऽनित्यतयोरविरोधाद् विपक्षतः ।
व्यावृत्तेः संशयादेष[४] शेषवद् भेद इष्यते ॥ (१४६)

[१] PS. नस्तः कारिकाद्वयं । [२] PS. ०प्यत्र ।
[३]PVM. स्वधर्मिग्रहण० । [४] PVM. संशयान्नायं ।



(३) धर्मिस्वरूपनिरासः

स्वयमिष्टो यतो धर्मः साध्यस्तस्मात् तदाश्रयः ।
बाध्यो न केवलो नान्यसंश्रयो वेति सूचितम् ॥ (१४७)
स्वयं श्रुत्यान्यधर्माणां बाधाऽबाधेति कथ्यते ।
तथा स्वधर्मिणान्यस्य धर्मिणोपीति कथ्यते ॥ (१४८)

## ५. पक्षदोषाः

(१) हेतुनिरपेक्षः पक्षदोषः

सर्व्वसाधनदोषेण पक्ष एवोपरुध्यते ।
तथापि पक्षदोषत्वं प्रतिज्ञामात्रसंज्ञिनः ॥ (१४९)
उत्तरावयवापेक्षो यो दोषः सोनुबध्यते ।
तेनेत्युक्तमतोऽपक्षदोषो सिद्धाश्रयादिकः ॥ (१५०)]
47a धर्म्म[१]धर्म्मिविशेषाणां स्वरूपस्य च धर्म्मिणः ।
बाधा साध्याङ्गभूतानामनेनैवोपदर्शिता ॥ (१५१)

(२) अवयविनिरासः

तत्रोदाहृतिदिङ्मात्रमुच्यतेऽर्थस्य दृष्टये ।
द्रव्यलक्षणयोक्तो[२]न्यः संयोगेर्थोस्ति दृष्टिभाक् ॥ (१५२)
अदृश्यस्य[ा]वि[३]शिष्टस्य [प्रतिज्ञा निष्प्रयोजना ।
इष्टोह्यवयवी कार्य]1 दृष्टादृश्येष्व[४]सम्भवि ॥ (१५३)
अविशिष्टस्य साध्यस्य[५] साधने सिद्धसाधनं ।
गुरुत्वाधोगती स्यातां यद्यस्य स्यात् तुलानतिः[६] ॥ (१५४)
तन्निर्गुणक्रियस्तस्मात् समवायि न कारणं ।
तत एव न दृश्योसावदृष्टेः का[र्यरूपयोः ॥ (१५५)
तद्बाधान्यविशेषस्य नान्त]1रीयकभाविनः ।
आसूक्ष्माद् द्रव्यमालायास्तौल्यत्त्वादङ्शुपातवत् ॥ (१५६)

[१] PVM. धर्मिधर्म० । [२] PS. VA. PVM. युक्तो ।
[३] PVM. अदृश्यस्य विशिष्टस्य ।
[४] VA. दृष्टाऽदृक्ष्येष्व । PVM. दृष्ट्वाऽदृश्येष्व ।
[५] PS. VA. वान्यस्य । PVM. चान्यस्य ।
[६] VA. यद्यसौ स्यात्तुलानतिः ।

द्रव्यान्तरगुरुत्त्वस्य गतिर्न्नेत्यपरोब्रवीत् ।
तस्य क्रमेण संयुक्ते पांशुराशौ सकृद्युते ॥ (१५७)
भेदः स्याद् गौरवे तस्मात् पृथक् [सह च तोलिते ।
क्रमेण[१] माष][2]कादीनां संख्यासाम्यं न युज्यते ॥ (१५८)
सर्षपादेर्महाराशेरुत्तरोत्तरवृद्धिमत्[२] ।
गुरु[३]त्त्वं कार्यमालाया यदि नैवोपलक्ष्य[४]ते ॥ (१५९)
आसर्षपाद् गुरु[५]त्वन्तु[दुर्ल्ल]क्षितम[न]ल्पकं ।
तौल्यं तत्कारण [ङ् कार्यगौरवानुपलक्षणात् ][5] ॥ (१६०)
नन्वदृष्टोंऽशुवत्[६] सोर्थो न च तत्कार्यमीक्ष्यते ।
गुरुत्वागतिवत् सर्वतद्गुणा[७]नुपलक्षणात ॥ (१६१)
मास[? ष]कादेरनाधिक्यमनतिः सोपलक्षणं ।
यथास्वमक्षेणादृष्टे[८] रूपादावधिकाधिके ॥ (१६२)
अभ्यु[९]पायः स्ववागा][6] दिबाधायाः सम्भवेन तु ।
उदाहरणमप्यन्यद्दिशा गम्यं यथोक्तया ॥ (१६३)

(३) नैयायिकपक्षलक्षणे दोषः

त्रिकालविषयत्त्वात्तु कृत्यानामतथात्मकं ।
तथा परं प्रतिन्यस्तं साध्यं नेष्टं तदापि तत् ॥ (१६४)
प्रत्यायनाधिकारैः स[१०] [सर्व्वासिद्धावरोधिनी[११] ।[6]
47b त[१२]स्मात् ] साध्यश्रुतिर्न्नेष्टं[१३] विशेषमवलम्बते ॥ (१६५)
तेनाप्रसिद्धदृष्टान्ते[१४] हेतूदाहरणं कृतं ।
अन्यथा शशशृङ्गादौ सर्व्वासिद्धेपि साध्यता ॥ (१६६)

---

[१] PS. PVM. सुवर्ण ।
[२] VA. ० वृत्तिमत्; PS. PVM. सर्षपादाम० वृद्धिमत् ।
[३] PVM. गौरवं ।
[४] PVM. ० पलभ्यते ।
[५] PVM. गौरव० । दुर्लक्षत० ।
[६] PS. न च दृष्टो० ।
[७] VA. तत्तुला ।
[८] PS. यथास्वमुत्क्ष ।
[९] PVM. अभ्युपायस्ववागाद्यबाधायाः ।
[१०] PS. VA. PVM. ० कारे तु ।
[११] PS. ० नुरोधिनी ।
[१२] PVM. यस्मात् ।
[१३] PS. ० न्नेष्टा वि ० ।
[१४] VA. सन्दिग्ध० । PVM. ०दृष्टान्तहेतू० ।



सर्व्वस्य चाप्रसिद्धत्त्वात्[१] कथञ्चित्तेन न क्षमाः ।
कर्म्मादिभेदोपक्षेपपरिह[ा]राविवेचने ॥ (१६७)
प्रागसिद्धस्वभावत्त्वात्[२] साध्या[३]वयव इत्यसत् ।
तुल्या सिद्ध[न्ततातो[४] हि येनोपगमलक्ष][1]णाः ॥ (१६८)
समुदायस्य साध्यत्त्वेप्यन्योन्यस्य विशेषणं ।
साध्यं द्वयं तदाऽसिद्धं हेतुदृष्टान्तलक्षणं ॥ (१६९)
असम्भवात् साध्यशब्दो धर्म्मिवृत्तिर्यदोष्यते ।
शास्त्रेणालं यथायोगं लोक एव प्रवर्त्ततां ॥ (१७०)
साधनाख्यानसामर्थ्यात्तदर्थे साध्यता गता[५] ।
हेत्वादिवचनैर्व्याप्ते[रनाशङ्क्यञ्च साधनं] ॥[2] (१७१)

(४) प्रतिज्ञालक्षणे दोषः

पूर्व्वावधारणे तेन प्रतिज्ञालक्षणाभिधा ।
व्यर्था व्याप्तिफला सोक्तिः सामर्थ्याद् गम्यते ततः ॥ (१७२)
विरुद्धतेष्टासम्बन्धोऽनुपकारसह[ा]स्थितीः ।
एवं सर्व्वाङ्गदोषाणां[६] प्रतिज्ञादोषता भवेत् ॥ (१७३)
पक्षदोषः परापेक्षो नेति च प्रतिपादितं ।
[इष्टासम्भव्यसिद्धश्च, स एव स्यात् निरा][3] कृतः ॥ (१७४)
अनित्यत्वसहेतुत्त्वे शब्द एवं प्रकीर्त्तयेत् ।
दृष्टान्ताख्यानतोऽन्यत्किमस्त्यत्रार्थ(ानु)दर्शनं[७] ॥ (१७५)

(५) सामान्यचिन्ता

विशेषे[८] भिन्नमाख्याय सामान्यस्यानुर्त्तवने ।
न तद् व्या[९]प्तेः फलं वा किं सामान्येनानुवर्त्तने[१०] ॥ (१७६)

---

[१] VA. ० सिद्धत्वं ।
[२] VA. स्वरूपत्वात् ।
[३] VA. साध्यो ।
[४] PVM. सिद्धान्तता ते ।
[५] VA. मता ।
[६] सर्वलिंगदोषाणां—भो० भा० ।
[७] VAB. किमस्त्यर्थानुदर्शनं । PS. किमत्यत्रार्थदर्शनं ।
[८] PS. विशेषभि० ।
[९] PVM. व्याप्तिः ।
[१०] VAB. सामान्यस्यानुवर्त्तने ।

स्यान्निराकरणं श[ब्दः स्थितेनैवेत्यतोऽब्रवीत ।][4]
विरुद्ध[१]विषयेऽन्यस्मिन् वदन्नाहान्यतां श्रुतेः ॥ (१७७)
स[ा]च भेदाप्रतिक्षेपात् सामान्यानान्न विद्यते[२] ।
वृक्षो न शिंशपैवेति यथाप्रकरणे क्वचित् ॥ (१७८)
सर्व्वश्रुतेरेकवृत्तिर्न्निषेधः स्यान्न चेयता[३] ।
सो सर्व्वः सर्व्वभेदाना[मतत्वे तदसम्भवात् ॥ (१७९)
ज्ञाप्यज्ञापकयोर्भे][५]दाद्धर्म्मिणो हेतुभाविनः ।
असिद्धेर्ज्ञापकत्त्वस्य धर्म्म्यसिद्धः स्वसाधने ॥ (१८०)
धर्म्मधर्म्मिविवेकस्य सर्व्वभावेष्वसिद्धितः[४] ।
सर्व्वत्र दोषस्तुल्यश्चेन्न संवृत्या विशेषतः ॥ (१८१)
परमार्थविचारेषु तथाभूता [५]प्रसिद्धि[तः ।
तत्वान्यत्वं पदार्थेषु साम्वृतेषु निषिध्यते ॥][6] (१८२)
48a अनुमानानुमेयार्थव्यवहारस्थितिस्त्वियं ।
भेदं प्रत्ययसंसिद्धमवलम्ब्यावकल्पते[६] ॥ (१८३)
यथास्वं भेदनिष्ठेषु प्रत्ययेषु विवेकिनः ।
धर्म्मी धर्म्माश्च भासन्ते व्यवहारस्तदाश्रयः ॥ (१८४)
व्यवहारोपनीतोऽत्र स एवाश्लिष्टभेदधीः ।
साध्यः[७] साधनतां नीत[स्तेनासिद्धः प्रकाशितः[८] ॥ (१८५)
भेदसामान्ययोर्द्धर्म्म][1]भेदादङ्गाङ्गिता ततः ।
यथा[ऽ] नित्त्यः प्रयत्नोत्थः प्रयत्नोत्थतया[९] ध्वनिः ॥ (१८६)
पक्षाङ्गत्त्वेप्यबाधत्त्वान्नासिद्धिर्भिन्नधर्म्मिणि ।
यथाश्वो न विषाणित्त्वादेष पिण्डो विषाणवान् ॥ (१८७)
साध्यकालाङ्गता वा न निवृत्तेरुपलक्षणात्[१०] ।
विशेष[ ोपि प्रतिज्ञार्थो धर्मभेदान्न युज्यते ॥][2] (१८८)

---

[१] PS. विरुद्धं । [२] VAB. युज्यते ।
[३] स्याच्चेयता—भो॰भा॰; VAB. तावता । [४] भावेष्वभावतः—भो॰भा॰ ।
[५] PS. तस्य भूताप्र॰ । [६] VAB. ॰म्ब्य प्रकल्प्यते ।
[७] धर्म्मी—भो॰ भा॰ । [८] VB. प्रसिद्धितः ।
[९] PS. प्रमेयोत्थतया । [१०] PS. VAB. PVM. ॰लक्ष्य तत् ।



## ६. हेतुचिन्ता

### (१) हेतुलक्षणम्

पक्षधर्म्मप्रभेदेन सुखग्रहणसिद्धये ।
हेतुप्रकरणार्थस्य सूत्रसंक्षेप उच्यते ॥ (१८९)
अयोगं योगमपरैरत्यन्तायोगमेव च ।
व्यवच्छिनत्ति धर्म्मस्य निपातो व्यतिरेचकः ॥ (१९०)
विशेषणविशेष्याभ्यां क्रियया च सहोदितः ।
विवक्षातोऽ[प्र]यो[गेपि तस्यार्थोयं प्रतीयते ॥ (१९१)
व्यव][3]च्छेदफलं वाक्यं यतश्चैत्रो धनुर्धरः ।
पार्थो धनुर्धरो नीलं सरोजमिति वा यथा ॥ (१९२)
प्रतियोगिव्यवच्छेदस्तत्राप्यर्थेषु गम्यते ।
तथा प्रसिद्धेः सामर्थ्याद् विवक्षानुगमाद् ध्वनेः ॥ (१९३)
तदयोगव्यवच्छेदाद् धर्म्मि[१]धर्म्मविशेषणं ।
त[द्विशिष्टतया धर्मो न निरन्वयदो][4]षभाक् ॥ (१९४)

### (२) हेतुभेदाः

स्वभावकार्यसिध्यर्थं द्वौ द्वौ हेतुविपर्ययौ ।
विवादाद्भेदसामान्ये शेषो व्यावृत्तिसाधनः ॥ (१९५)
न हि स्वभावादन्येन व्याप्तिर्गम्यस्य कारणे ।
सम्भवाद् व्यभिचारस्य द्विधा वृत्तिफलं ततः ॥ (१९६)
प्रयत्नानन्तरं ज्ञानं [प्राक् सतो नियमेन न ।][5]
तस्यावृत्त्यक्षशब्देषु सर्व्वथानुपयोगतः ॥ (१९७)
कदाचिन्निरपेक्षस्य कार्याऽकृति[२]विरोधतः ।
कादाचित्कफलं सिद्धं तल्लिङ्गं ज्ञानमीदृशं ॥ (१९८)

### (३) कार्यस्वभावहेत्वोर्निर्देशस्य फलम्

एतावतैव[३] सिद्धोपि स्वभावस्य पृथक्कृतिः ।
कार्येण सह निर्देशे मा ज्ञासीत्स[र्व्वमीदृशं॥ (१९९)

---

[१] PS. VAB. PVM. धर्मी । [२] PS. कार्यंकृति ।
[३] VAB. एतेनैव प्र॰ PS. PVM. ॰सिद्धेपि ।

व्युत्पत्यर्था च][6] हेतूक्तिरुक्तार्थानुमितौ कृता ।
प्रभेदमात्रमाख्यातं[१] लक्षणन्तु न भिद्यते ॥ (२००)
तेनात्र कार्यलिङ्गेन स्वभावोप्येकदेशभाक् ।
सदृशोदाहृतिश्चातः प्रयत्नाद् व्यक्तिजन्मनः[२] ॥[7] (२०१)
48b यन्नान्तरी[ि]यका सत्ता यो वात्मन्य[३]विभागवान् ।
स तेनाव्यभिचारी[४] स्यादित्यर्थं तत्प्रभेदनं ॥ (२०२)
संयोगादिषु[५] येष्वस्ति प्रतिबन्धो न तादृशः ।
न ते हेतव इत्युक्तं व्यभिचारस्य[६] सम्भवात् ॥ (२०३)
सति वा प्रतिबन्धेस्तु स एव गतिसाधनः ।
नियमो ह्यविनाभावे[७]ऽनियतश्च न साधने[८] ॥ (२०४)

(४) विवादाद् भेदसामान्य इत्यस्य व्याख्यानम्

[ऐकान्तिकत्वं व्यावृत्तेरविनाभा][1]व उच्यते ।
तच्च नाप्रतिबद्धेषु तत एवान्वयि[९]स्थितिः ॥ (२०५)
स्वात्मत्त्वे हेतुभावे वा सिद्धे हि व्यतिरेकिता ।
सिध्येदतो विशेषे न व्यतिरेको न चान्वयः ॥ (२०६)
अदृष्टिमात्रमादाय केवलं व्यतिरेकिता ।
उक्ताऽनैकान्तिकस्तस्मादन्यथा गमको भवेत् ॥ (२०७)

(५) साध्याभावस्य साधनाभावेन न व्याप्तता

[प्राणाद्यभावो नैरात्म्येव्या][2]पीति विनिवर्त्तने[१०] ।
आत्मनो विनिवर्त्तेत प्राणादिर्यदि तच्च न ॥ (२०८)
अन्यस्य विनिवृत्त्यान्यविनिवृत्तेरयोगतः ।
तदात्मा तत्प्रसूतश्चे[११]न्नैतदात्मोपलम्भने ॥ (२०९)

---

[१] VAB. मारख्यातुं । PVM. अत्र प्रभेद आख्यातः । [२] PS. जन्मतोः ।
[३] PS. ०वात्मा सोऽवि० । VAB. यो वात्मो सो ।
[४] PS. स तेन व्य० । [५] PVM. संयोग्यादिषु ।
[६] PS. प्रतिबन्धस्य । [७] PS. PVM. ह्यविनाभावो ।
[८] VAB. PVM. साधनं । [९] VAB. PVM. ०न्वय ।
[१०] PS. विनिवर्त्तते । [११] PS. PVM. तत्प्रसूति ० ।



तस्योपलब्धावगतावगतौ च प्रसिध्यति ।
ते चात्यन्तपरोक्षस्य दृष्ट्यदृष्टी न सिध्यतः ॥ (२१०)
[अन्यत्रादृष्टरूपस्य घटादौ][3] नेति वा कुतः ।
अज्ञातव्यतिरेकस्य व्यावृत्तेर्व्यापिता[१] कुतः ॥ (२११)
प्राणादेश्च क्वचिद् दृष्ट्या सत्त्वासत्त्वं प्रतीयते ।
तथात्मा यदि दृश्येत सत्त्वासत्त्वं प्रतीयते[२] ॥ (२१२)
यस्य हेतोरभावेन घटे प्राणो न दृश्यते ।
देहेपि यद्यसौ [न स्याद् युक्तो देहे न सम्भवः॥][4] (२१३)
भिन्नेपि किञ्चित् साधर्म्याद् यदि तत्त्वं प्रतीयते ।
प्रमेयत्त्वाद् घटादीनां सात्मत्त्वं किन्न मीयते ॥ (२१४)
अनिष्टञ्चेत्[३] प्रमाणं हि सर्व्वेष्टीनां निबन्धनं ।
भावाभावव्यवस्थां कः कर्त्तुं तेन विना प्रभुः ॥ (२१५)
स्मृती[च्छायत्नजः प्राणनिमेषादिस्तदुद्भवः ।][5]
विषयेन्द्रियवित्तिभ्यस्ताः[४] स्वजातिसमुद्भवाः ॥ (२१६)
अन्योन्यप्रत्ययापेक्षा अन्वयव्यतिरेकभाक् ।
एतावत्यात्मभावोयमनवस्थान्यकल्पने ॥ (२१७)
श्रावणत्त्वेन तत्तुल्यं प्राणादिव्यभिचारतः ।
न तस्य व्यभिचारित्त्वा[द् व्यतिरेकेपि चेत् कथं ॥][6] (२१८)
नासाध्यादेव विश्लेषस्तस्य नन्वेवमुच्यते[५] ।
साध्येपि[६] वृत्त्यभावोर्थात्तस्यान्यत्राप्यसौ समः ॥ (२१९)
असाध्यादेव विच्छेद इति साध्येस्तितोच्यते ।
अर्थापत्त्याऽत एवोक्तमेकेन द्वयदर्शनं[७] ॥[7] (२२०)
49a [ईदृ]गव्यभिचारोतोऽनन्वयेषु[८] न सिध्यति ।
प्रतिषेधनिषेधश्च विधानात् कीदृशोऽपरः ॥ (२२१)
निवृत्तिर्न्नासतः साध्यादसाध्येष्वेव नो ततः ।
नेति सैव निवृत्तिः किं निवृत्तेरसतो मता ॥ (२२२)

---

[१] PS. VAB. व्यावृत्तिव्यापिता । [२] PS. नास्ति कारिकार्द्धम् ।
[३] PS. PVM. अनिष्टेश्चेत् । [४] PVM. चित्तेभ्यस्ताः ।
[५] PS. ०वमिष्यते । [६] PS. VAB. PVM. साध्येनु ।
[७] PVM. नोभयदर्श० । [८] PVM. ०न्वयिषु ।

निवृत्त्यभावस्तु विधिर्व्वस्तुभावोऽसतोपि सन् ।
वस्त्वभावस्तु नास्तीति [पश्य बान्ध्यविजृम्भितम् ॥ (२२३)
निवृत्तिर्यदि तस्मिन्न हेतोर्वृत्तिः किमि][1] ष्यते ।
सा पि न प्रतिषेधोयं निवृत्तिः किं निषिध्यते ॥ (२२४)
विधानं प्रतिषेधञ्च मुक्त्वा शाब्दोस्ति नापरः ।
व्यवहारः स चासत्सु नेति प्राप्तात्र मूकता ॥ (२२५)
सताञ्च न निषेधोऽस्ति सोऽसत्सु च न वर्त्तते[1] ।
जगत्यनेन न्यायेन नञर्थः प्रलयङ्गतः ॥ (२२६)
देशकालनिषेधश्चेद् य][2]थास्ति स निषिध्यते ।
न तथा न यथा सोस्ति तथापि न निषिध्यते ॥ (२२७)
तस्मादाश्रित्य शब्दार्थं भावाभावसमाश्रयं ।
अबाह्याश्रयमत्रेष्टं सर्व्वं विधिनिषेधनं ॥ (२२८)
ताभ्यां स धर्म्मी सम्बद्धः ख्यात्यभावेपि तादृशः ।
[शब्दप्रवृत्तेरस्तीति सोपीष्टो व्यवहारभाक् ॥][3] (२२९)
अन्यथा स्यात् पदार्थानां विधानप्रतिषेधने ।
एकधर्म्मस्य सर्व्वात्मविधानप्रतिषेधनं ॥ (२३०)
अनानात्मतया[2] भेदे नानाविधिनिषेधवत्[3] ।
एकधर्म्मिण्यसंहारो विधानप्रतिषेधयोः[4] ॥ (२३१)
एकं धर्म्मिणमुद्दिश्य नानाधर्म्म[समाश्रयं ।
विधावेकस्य तद्भाजमिवान्येषा[5]][4]मुपेक्षकं ॥ (२३२)
निषेधे तद्विविक्तञ्च तदन्येषामपेक्षकं[6] ।
व्यवहारमसत्यार्थं प्रकल्पयति धीर्यथा ॥ (२३३)
तं तथैवाविकल्पार्थं[7] भेदाश्रयमुपागताः ।
अनादिवासनोद्भूतं बाधन्तेऽर्थं न लौकिकं ॥ (२३४)

---

[1] PS. PVM. न विद्यते ।
[2] VB. अनात्मात्मतया ।    [3] PS. भेदेनान्येन विधिनिषेधनात् ।
[4] VA. विहितप्रतिषिद्धयोः; VB. ० प्रतिषेधयोः ।
[5] PS. मित्यन्येषा ।    [6] PS. नास्ति कारिकार्द्धम् ।
[7] VA. विकल्पार्थः ।



तत्फलोऽत[त्फलश्चार्थो भिन्न एकस्ततस्ततः ।
तैस्तैरुपप्लवैर्न्नीत[5]]सञ्चयापचयैरिव ॥ (२३५)
अतद्वानपि सम्बन्धात् कुतश्चिदुपनीयते ।
दृष्टि[1] भेदाश्रयैस्तेपि तस्मादज्ञातविप्लवाः ॥ (२३६)
सत्तासाधनवृत्तेश्च सन्दिग्धः स्यादसन्न सः ।
असत्त्वञ्चाभ्युपगमादप्रमाण[ा]न्न युज्यते ॥ (२३७)
असतोऽव्य[ तिरेकेपि ][6] सपक्षाद् विनिवर्त्तनं ।
सन्दिग्धं तस्य सन्देहाद् विपक्षाद् विनिवर्त्तनं ॥ (२३८)
एकत्र नियमे सिद्धे सिध्यत्त्यन्य[2]निवर्त्तनं ।
द्वैराश्ये सत्य[3]दृष्टेपि स्याददृष्टेषु[4] संशयः ॥ (२३९)
अव्यक्तिव्यापिनोप्यर्थाः सन्ति तज्जा[तिभाविनः ।
49b क्वचिन्न नियमो दृष्ट्या[5] पा ][7] थवा लोहलेख्यवत् ॥ (२४०)
भावे विरोधस्यादृ[6]ष्टौ कः सन्देहं निवर्त्तयेत्[7] ।
क्वचिद् विनियमात् कोन्यस्तत्कार्यात्मतया स च ॥ (२४१)
नैरात्म्यादपि तेनास्य सन्दिग्धं विनिवर्तनं ।
अस्तु नाम तथाप्यात्मा नानैरात्म्यात् प्रसिध्यति ॥ (२४२)
येनासौ व्य [तिरेकस्य नाभावं भावमिच्छति ।
यथा नाव्य ][1] तिरेकेपि प्राणादिर्न्न सपक्षतः[8] ॥ (२४३)
सपक्षाव्यतिरेकी चेद्धेतुर्हेतुरतोन्वयी ।
नान्वय्यव्यतिरेकी चेदनैरात्म्यं न[9] सात्मकं ॥ (२४४)
यन्नान्तरीयकः स्वात्मा यस्य सिद्धः[10] प्रवृत्तिषु ।
निवर्त्तकः स एवातः प्रवृत्तौ च प्र[वर्त्तकः ॥ (२४५)
नान्तरीयकता सा च साधनं सम][2] पेक्षते ।
[11]कार्ये दृष्टिरदृष्टिश्च कार्यकारणताहिता[12] ॥ (२४६)

---

[1] PS. दृष्टं ।    [2] VA. सिध्यत्येव ।    [3] PVM. सति दृष्टेषु ।
[4] SP. PVM. ददृष्टेपि ।    [5] PS. क्वचित् तन्निश्चयो दृष्टया ।
[6] PVM. ०दृष्टेः ।    [7] VA. PVM. निवारयेत् ।
[8] VA. सपक्षे प्राणतादिकः ।    PS. यथेष्टो व्यतिरेकोपि० ।
[9] PS. नैरात्म्यान्न ।    [10] PS. यस्यासि० ।
[11] PS. अकार्ये ।    [12] PS.VA. ०ताहिते ।

अर्थान्तरस्य तद्भावेऽभावो[1] नियमतोऽगतिः ।
अभावासम्भवात्तेषामभावे नित्त्यभाविनः ॥ (२४७)

(६) सामग्रीशक्तिभेदाद् विश्वरूपता

कार्यस्वभावभेदानां कारणेभ्यः समुद्भवात् ।
तैर्विना भवतोन्यस्मात् तज्जं रूपं कथम्भवे][8] त् ॥ (२४८)
सामग्रीशक्तिभेदाद्धि वस्तूनां विश्वरूपता[2] ।
सा चेन्न भेदिका प्राप्तमेकरूपमिदं जगत् ॥ (२४९)
भेदकाभेदकत्त्वे स्याद् व्याहता भिन्नरूपता ।
एकस्य नानारूपत्त्वे ते[3] रूपे पावकेतरौ ॥ (२५०)
[तत्तस्या जननं[4] रूपमन्यस्य यदि सैव सा ।][4]
न तस्याजननं रूपं तत्तस्याः सम्भवः[5] कथं ॥ (२५१)
ततः स्वभावौ नियतावन्योन्यं हेतुकार्ययोः ।
तस्मात् स्वदृष्टाविव तद् दृष्टे कार्येपि गम्यते ॥ (२५२)
एकं कथमनेकस्मात् क्लेदवद् दुग्धवारिणः ।
द्रवशक्तेर्य[तः क्लेदः सा त्वेकैव द्वयोरपि ॥ ][5] (२५३)
भिन्नाभिन्नः किमस्यात्मा भिन्नोथ[6] द्रवता कथं ।
अभिन्नेत्युच्यते बुद्धेस्तद्रूपाया अभेदतः[7] ॥ (२५४)
तद्वद्भेदेपि दहनो दहनप्रत्ययाश्रयः ।
येनाङ्शेनादधद्धूमं तेनाङ्शेन तथा गतिः ॥ (२५५)
दहनप्रत्ययाङ्गादे[वान्यापेक्षात् समुद्भवात् । ][6]
धूमोतद्व्यभिचारीति सि[8]द्धं कार्यं तथापरं ॥ (२५६)
धूमेन्धनविकाराङ्गं[9] तत्पदे दहनस्थितेः[10] ।
अनग्निश्चेदधूमोऽसौ सधूमश्चेत् सपावकः ॥ (२५७)
[11][नान्तरीयकता ज्ञेया यथास्वं हेत्वपेक्षया ।
स्वभावस्य यथोक्तं प्राक् विनाशकृतकत्वयोः ॥ (२५८)

---

[1] PS. PVM. ०ऽभावा । [2] VB. भिन्नरूपता ।
[3] PVM. VA. द्वे । [4] PS. तत्तस्माज्जनना ।
[5] VA. PVM. सम्भवेत्; PS. स भवेत् कथं । [6] VA. भिन्ने च ।
[7] PS. अयोगतः । [8] PVM. तद्वत् । [9] VA. PVM. राङ्गं० ।
[10] VB. स्थितिः । [11] VA. २६०–२८३ c. ।



[1]अहेतुत्वगतिन्यायः सर्व्वोयं व्यतिरेकिणः ।
अभ्यूह्यः श्रावणत्वोक्तेः कृतायाः साम्यदृष्टये ॥ (२५९)

७. अनुपलब्धिचिन्ता

हेतुस्वभावव्या[2]वृत्त्यैवार्थव्या[2]वृत्तिवर्णनात् ।
सिद्धोदाहरणेत्युक्तानुपलब्धिः पृथग् न तु ॥ (२६०)
तत्राप्यदृश्यात् पुरुषात् प्राणादेरनिवर्त्तनात् ।
सन्देहहेतुता ख्यात्या दृश्यार्थे[3] सेति सूचितं ॥ (२६१)
अनङ्गीकृतवस्त्वंशो निषेधः साध्यतेनया ।
वस्तुन्यपि तु पूर्व्वाभ्यां पर्युदासो विधानतः ॥ (२६२)
न ह्यन्यानुपलम्भेषु नास्ति नानुपलम्भनात्[4] ।
इत्यज्ञज्ञापनायैकानुपाख्योदाहृतिर्मता ॥ (२६३)
विषयासत्वतस्तत्र विषयि प्रतिषिध्यते ।
ज्ञानाभिधानसन्देहं यथाऽदाहादपावकः ॥ (२६४)
तथान्यानोपलभ्येषु[5] नास्तितानुपलम्भनात् ।
तज्ज्ञानशब्दाः साध्यन्ते तद्भावात् तन्निबन्धनाः ॥ (२६५)
सिद्धो हि व्यवहरोयं दृश्यादृष्टावसन्निति ।
तस्याः सिद्धावसन्दिग्धौ तत्कार्यत्वेपि धीध्वनी ॥ (२६६)
विद्यमाने हि विषये मोहादत्राननुब्रुवन् ।
केवलं सिद्धसाधर्म्यात् स्मार्यते[6] समयं परः ॥ (२६७)

इति संग्रह(श्लोकः) ॥

कार्यकारणता यद्वत् साध्यते दृष्टयदृष्टितः ।
कार्यादिशब्दा हि तयोर्व्यवहाराय कल्पिताः ॥ (२६८)
कारणात् कार्यसंसिद्धिः स्वभावान्तर्गमादियं ।
हेतुप्रभेदाख्याने न दर्शितोदाहृतिः पृथक् ॥ (२६९)
एकोपलम्भानुभवादिदं नोपलभे इति ।
बुद्धेरुपलभे वेति कल्पिकायाः समुद्भवः ॥ (२७०)

---

[1] PS. सहेतु० । [2] PVM. ०निवृत्यै० । ०निवृत्ति० ।
[3] PS. दृश्येर्थे । [4] PS. PVM. तत्रोपलभ्येष्वस्तित्वमुपलब्धेर्न चापरं ।
[5] PS. न चान्यानुपलभ्येषु । [6] PS. स्मर्यते ।

विशेषो गम्यतेर्थानां विशिष्टादेव वेदनात् ।
तथाभूतात्मसंवित्ति[1]र्भेदधीहेतुरस्य च ॥ (२७१)
तस्मात् स्वतो धियोर्भेदसिद्धिस्ताभ्यां तदर्थयोः ।
अन्यथा ह्यनवस्था[2]नाद् भेदः सिध्येन्न कस्यचित् ॥ (२७२)
विशिष्टरूपानुभवान्नातोन्यान्यं[3] निराक्रिया ।
तद्विशिष्टोपलम्भोतः तस्याप्यनुपलम्भनं ॥ (२७३)
तस्मादनुपलम्भोयं स्वयं प्रत्यक्षतो गतः ।
स्वमात्रवृत्तेर्गमकस्तदभावव्यवस्थितेः ॥ (२७४)
अन्यथार्थस्य नास्तित्वं गम्यतेनुपलम्भतः ।
उपलम्भस्य नास्तित्वमन्येनेत्यनवस्थितिः ॥ (२७५)
अदृश्ये निश्चयायोगात् स्थितिरन्यत्र वार्यते[4] ।
यथाऽलिङ्गोन्यसत्वेषु[5] विकल्पादिर्न सिध्यति ॥ (२७६)
अनिश्चयफला ह्येषा नालं व्यावृत्तिसाधने ।
आद्याधिक्रियते[6] हेतोर्न्निश्चयेनैव[7] साधने[8] ॥ (२७७)
तस्याः स्वयं प्रयोगेषु स्वरूपं वा प्रयुज्यते ।
अर्थबाधनरूपम्वा भावे भावादभावतः ॥ (२७८)
अन्योन्यभेदसिद्धेर्व्वा ध्रुवभावविनाशवत् ।
प्रमाणान्तरबाधाद् वा सापेक्षध्रुवभाववत्[9] ॥ (२७९)
हेत्वन्तरसमूहेस्य[10] सन्निधौ नियमः[11] कुतः ।

८. भावस्वभावचिन्ता

भावहेतुभवत्वे किं पारम्पर्यपरिश्रमैः ॥ (२८०)
नाशनं जनयित्वान्यं स हेतुस्तस्य नाशनः[12] ।
तमेव नश्वरं भावं जनयेद् यदि किम्भवेत् ॥ (२८१)
आत्मोपकारकः कः स्यात् तस्य सिद्धात्मनः सतः ।
नात्मोपकारकः कः स्यात् तेन यः समपेद्यते ॥ (२८२)

---

[1]PVM. संपत्ति ।　[2]PVM. ०स्थातः ।　[3]PVM. ० वादन्यथान्य ।
[4] PVM. बाध्यते ।　[5] PS. यथा विकल्पोन्य ० ।
[6] PS. तापोधि ० ।　[7] PVM. निश्चितेनैव ।　[8] PS. साधनात् ।
[9] PS. कादाचित्कोनपेक्षणात् ।　[10] PS. PVM. ० त्वन्तरसमुत्थस्य ।
[11] PVM. नियतः ।　[12] PVM. नाशकः ।



अनपेक्षश्च किम्भावोऽतथाभूतः कदाचन ।
5 1a यथा न क्षेपभागिष्टः] स एवोद्भूतनाशकः ॥ (२८३)
क्षणमप्यनपेक्षत्वे भावो भावस्य नेति चेत् ।
भावो हि स तथाभूतोऽभावे भावस्तथा कथं ॥ (२८४)
येऽपरापेक्षत[1]द्भावास्तद्भावनियता हि ते ।
[असम्भवाद् विबंधे च सामग्री कार्यकर्म्मणि[2] ॥ (२८५)
अनध्यवसितावगाहनमनल्पधीशक्तिना-
प्यदृष्टपरमार्थसारमधिकाभियोगैरपि ।
मतं मम जगत्यलब्धसदृशप्रतिग्राह[कं
प्रयास्यति पयोनिधेः पय इव स्वदे][2]हे जरां ॥[3]

प्रमाणवार्त्तिककारिकासु चतुर्थः परिच्छेदः ॥
कृतिरियमाचार्यधर्म्मकीर्त्तिपादानामिति[4] ॥

प्रमाणपरिच्छेदे ग्रन्थ(संख्या प्रथमपरिच्छेदे श्लोक ३४२) द्वितीये[3]
श्लोक (२)८(५$\frac{1}{3}$) तृतीये श्लोक ५३९ चतुर्थे श्लोक २८८ ।
श्रुतार्थिना लिखितमिदं पुस्तकं पक्कडिद्वीप(?)मण्डलपालेने(ति ॥)

---

[1]VA. ०पेक्ष्य
[2] .. .. .. .. .. ][1] देकत्र सन्मतिः ।
तथापि विजयस्तस्या यदि धन्याः परीक्षकाः ॥

इयन्तु केवलं PH.

[3] भोटभाषान्तर इयं २८६ तमा कारिका स्वल्पभेदेन वादन्यायटीकायां पृ० १४३(४७) PVM. VA. नास्ति ।

[4] भोटभाषान्तर इदमपि दृश्यते—"(१) भारतीयपण्डितेन सुभूति-श्रीशान्तिना भोट(देशीय)लोकचक्षुषा भिक्षुणा कल्याणमतिना (द्गे-वऽि-ब्लो-ग्रोस्) च...नृपतेः इन्द्रसेन(द्वङ-स्दे 1080 A. C. ?)स्याज्ञया... अनूदितम् ।...। (ततः) ... (२) कश्मीरविद्वच्चूडामणिना ... महापण्डितेन भव्यराजेन भोटमहालोकचक्षुषा भिक्षुणा धीमत्प्रज्ञेन (ब्लो-ल्दन्-शेस्-रब् 1059-1108 A. C.) च (पुनः) अनूदितम् ।...(३) पश्चात्काले... महापण्डपातिक-शाक्यश्रीभद्र(1127-1225 A. C.)ादिभिः शाक्यभिक्षुणा आनन्दध्वजश्रीभद्रेण (1182-1251 A. C.) च (पुनः) अनूदितम् ।...

## APPENDIX I

# उदाहरणानुक्रमणी


| उदाहरण | कारिका |
|---|---|
| अक्षम् | ३।४०६ |
| अग्निजन्यः। अन्– | ३।३९५ |
| अनिताम्रद्रवत्वम् | २।६२ |
| अग्निः शीतनोदनः | १।३३२ |
| अग्निहोत्रं जुहुयात् | १।३२० |
| अङ्कुरः | २।२५ |
| अङ्गुलिः | २।९८,२३१ |
| अञ्जनादि | १।१४९ |
| अयोगोलकम् | ३।२७७ |
| अलातदृष्टिः | ३।१३५ |
| अंशुपातः | ४।१५६ |
| अंशुवात् | ४।१६१ |
| अश्ववान् | १।२५ |
| अश्वो न विषाणी | ४।१८७ |
| आलोकः | ३।२६५,४०६ |
| इन्धनम् | १।१०; १।३०९; १।२५७ |
| एकभाण्डे पाकः | १।३३३ |
| औषधयः | १।७५ |
| औष्ण्यम् | २।१७२ |
| कर्पूरम् | ४।१२२ |
| काष्ठं | १।२४४; १।२७२; १।२७४; २।१२४ |

| उदाहरण | कारिका |
|---|---|
| काष्ठविकारः | २।५५ |
| कामिनी | १।२१३ |
| कामीव | २।२४० |
| कीटसंख्या | २।३१ |
| कुण्डादि | १।१४६; २।६० |
| कुम्भकारः | २।१३ |
| केशगोलकम् | ३।५०४ |
| केशादयः | २।२२८; ३।७ |
| क्षेत्रादिभेदः | १।७६ |
| क्लेदवत् | ४।२५३ |
| खड्गः (=प्रत्येकबुद्धः) | २।१३८ |
| गजनिमीलनम् | ३।२१९ |
| गजस्नानम् | १।२३२ |
| गवादिः | ३।२३७ |
| गृद्ध्राः | २।३३ |
| गेही | ३।१५५ |
| गोगवयादि | २।६१ |
| गोत्वादि | १।१५१ |
| गोपालः | ३।९९ |
| गोप्रत्ययः | ३।२२५ |
| गोमान् | १।२६ |
| घटः | २।१०२ |
| घटः | ३।४८३ |

घटादिः १।१८०; २।१३; ४।२११,२१३
चक्रभ्रान्तिः ३।१४०
चक्षुरादि १।१४२
चन्दनं २।२५२
चन्द्रः (कर्पूरम्) ४।१२२
चन्द्रम् । द्वि– ३।२९४
चित्रः ३।२०२,२०८
चित्रपतङ्गादि ३।२००
ज्वरादिशमनम् १।७५
तन्तुः ३।१४९,१५१
ताम्रद्रवत्वम् ३।६२
तिमिरम् ३।२९३
तिमिरादि ३।२१७
तिलादिः ३।१९७
तुलानतिः ४।१५४
तैक्ष्ण्यादि २।१८०
तैमिरादि ३।३६३
दण्डादिः ३।१५४
दण्डी ३।१४६
दहनः ४।२५५,२५६
दहनेन्धनवत् १।३०९
दाराः १।६८
दीपतेजः १।८२
दीपप्रभा २।७४
दीर्घः ३।४८६
दीर्घग्राहिका ३।४९१
दुग्धम् ४।२५३
देशभ्रान्तिः ३।१३
देहेः ४।२१३,२१४
धनुर्धरः ४।१९२
धवलादयः २।१५९,१७३
धात्री, अवृक्षः ४।१२०
धूमः १।३५; ३।३९३; ४।२५६, २५७
धूमाभासा ३।३९६
धूमेन्धनविकारवत् १।१०
ध्वनिः १।१३०; ४।१८७
निमेषादिः ४।२१६
नीलम् ३।२९४,३८९
नीललोहितभास्वरम् ३।४०३
नीलादि ३।१५,२३,२०१, २२०,३७२,३८६,४३२
नीलादिनेत्रविज्ञानं १।१०५
नीलाद्याकारः ३।५१२
पञ्चायतनमैहिकम् २।११५
पटः ३।१४९
पटादिः ३।३५,३२२
पतङ्गादि ३।२००
पयः (=जलम्) ४।२८६
पयोनिधिः ४।२८६
पशुसंशयः १।२५
पाण्यादिकम्पः २।८४
पार्थिवम् ४।२४०
पारदम् २।१२४
पावकः ४।४५७, २६४ (द्र. अग्नि र्दहनश्च)
पांशुराशिः
पितरौ ३।३६९
पीतम् ३।३८९
पुमान् ३।२७२
पुरुषः १।१८०; ४।२६१
प्रदीपः ३।४०७,४८३
प्रदीपप्रभा ३।५७





प्रदीपादि ३।४०३
प्रवाहः ३।२८०
प्राणनिमेषादिः ४।२१६
प्राणादिः ३।४०३; ४।२१८, २४३,२६१
प्रासादः ३।१५५
बान्ध्यविजृम्भितम् ४।२२३
बालाः ३।१४१
बाहुलेयः १।१४०
बीजम् २।२७३
बीजप्रभवा २।१२९
बीजसंज्ञा १।७३
बीजादि २।२५८,३,४
भस्म १।७
मणिप्रदीपप्रभे ३।५७
मणिरूपम् ३।२०१
मत्तकासिनी २।२३३
मदादिशक्तिः २।१६०
मदोनैकस्त्रीनियतः २।१५४
मनस्कारः ३।४०६
मनोजयः १।३००
मंत्रादि ३।३५५
मन्दनेत्रः २।८२
मन्दश्वसितम् २।११०
मयूरचन्दकम् ३।४०३
माला ३।१५५,१५७,५१४
मायागोलकम् ३।१०४
माशकादयः ४।१५८,१६२
मुनि। महा–तापादयः २।१५२
मूकता ४।२२५
यमलादयः ३।३८४
यमलादिः ३।४२५
रजतम् ४।१२२
रजताकारः १।४५
रूपादि २।१७४; ३।१८१
लङ्घनम् २।१२७
लंघनोदकतापवत् २।१२०
लोहलेख्यम् ४।२४०
वदरादिः १।१४६
वनिता २।२४०
वर्ण्णः ३।४८६
वह्निः ३।२७७
वारि ४।२५३
वाससि रागः १।३३
वासी २।२५२
विषाणी। अश्वो न– ४।१८७
विषाणवान् २।१५
वृक्षो न शिंशपा ४।१७८
व्योमादिः ४।१४२
शक्रमूर्द्धा (=बल्मीकः) १।३७
शबलाभासस्य ४।१३२
शब्दाः १।९३।१२७
शशशृंङ्गम् ४।१६६
शशादिः २।१५
शशी अचन्द्रः ४,१२०।१२३।१२४
शाटी ३।१५१
शार्दूलशोणितादि २।७७
शावलेयः १।१४०
शिंशपा। वृक्षोन— ४।१७८
शीतनोदनः १।३३२
श्रावणत्वम् ४।२१८
श्रुतिः ३।१६३
श्वमांसं खादेत् १।३२०
षण्ढः १।२१३

| | | | |
|---|---|---|---|
| षण्णगरी | १।६८ | स्थाणुः | १।३२७; २।२२ |
| सर्पादिः | ३।२९७ | स्थालीतण्डुलपाकवत् | १।१४ |
| सर्षपादयः | ४।१५९,१६० | स्वप्नेऽपि स्मृतिः | ३।२८२ |
| सास्नादिः | ३।२२५ | स्वर्गः | १।३२२ |
| सितादिकम् | ३।४३८,३९ | हन्तृघातः | १।२७४ |
| सिंहता | १।२५१ | हुतभुग् | १।३५ |
| सिंहो माणवकः | ३।३६ | हेम् | २।८८।१२४ |
| सुवर्णे। काष्ठ– | २।५६ | हेम्नि खरत्वम् | २।५७ |
| सूतः | २।८८ | | |


---

# APPENDIX 2

## नामानुक्रमणी


| | | | |
|---|---|---|---|
| उर्वशी | १।३२२ | बौद्धः | २।१९ |
| औलूक्यः (=कणादः) | २।१९ | भगवान् (=बुद्धः) | २।७ |
| कापिलाः (=सांख्याः) | २।१७ | मुनिः। महा– (=बुद्धः) | २।१३८ |
| चैत्रो धनुर्धरः | ४।१९२ | म्लेच्छः | १।२४७ |
| न्यायविद् (=दिग्नागः) | १।३३३ | समन्तभद्रः | १।१ |
| न्यायवादी (=दिग्नागः) | १।२१४ | सांख्यः | २।१६५ |
| पयः (=जलम्) | ४।२८६ | सुगतः (=बुद्धः) | २।१३९ |
| पार्थो धनुर्धरः | ४।१९२ | सूत्रम् (प्रमाणसमुच्चयः) | ४।१८९ |


---

*Printed by M. N. Pandey at the Allahabad Law Journal Press, Allahabad*
*Published by the Bihar and Orissa Research Society, Patna*

creative commons

## Attribution-NonCommercial-ShareAlike 3.0 Unported

### You are free:

**to Share** — to copy, distribute and transmit the work

**to Remix** — to adapt the work

### Under the following conditions:

**Attribution** — You must attribute the work in the manner specified by the author or licensor (but not in any way that suggests that they endorse you or your use of the work).

**Noncommercial** — You may not use this work for commercial purposes.

**Share Alike** — If you alter, transform, or build upon this work, you may distribute the resulting work only under the same or similar license to this one.

### With the understanding that:

**Waiver** — Any of the above conditions can be **waived** if you get permission from the copyright holder.

**Public Domain** — Where the work or any of its elements is in the **public domain** under applicable law, that status is in no way affected by the license.

**Other Rights** — In no way are any of the following rights affected by the license:

- Your fair dealing or **fair use** rights, or other applicable copyright exceptions and limitations;
- The author's **moral** rights;
- Rights other persons may have either in the work itself or in how the work is used, such as **publicity** or privacy rights.

**Notice** — For any reuse or distribution, you must make clear to others the license terms of this work. The best way to do this is with a link to this web page.

This is a human-readable summary of the Legal Code (the full license). Disclaimer